प्रास्ताविक

आ विजयदेव माहात्म्य १७ मा सैकाना जैन धर्मना इतिहासनी दृष्टिए एक घणो उपयोगी ग्रन्थ छे. जैन आचार्योंमां विजयदेवसूरि ए छेल्ला प्रभावशाली आचार्य गणी शकाय. एमना समयमां जैन यति-समुदायमां अने श्रावक-वर्गमां घणी घटनाओ अने क्रान्तिओ थई. धार्मिक अने सामाजिक परिस्थितिना अवलोकननी दृष्टिए ए घटनाओनो इतिहास घणो रोचक अने सूचक छे; तेथी ए आखो इतिहास आ ग्रन्थना बीजा भाग प्रकट करवानो विचार राख्यो छे. तेमां आ आखा ग्रन्थनो सार आपवामां आव अने ते साथे विस्तृत ऊहापोह करवामां आवशे ग्रन्थकार श्रीवल्लभ पाठकनो परिचय पण तेमां ज अपाशे. तेथी आ भाग केवल मूल ग्रन्थ तरीके ज प्रकट कराय छे.

–जिन विजय

નોંધ:—આ ગ્રંથનું છપામણુ ખર્ચ, અમદાબાદ નિવાસી મર્હુમ રા. બા. ગિરધરલાલ ઉત્તમલાલ પારેખે શેઠ પ્રેમચંદ દોલતરામના સ્મરણાર્થે મુકેલ રકમમાંથી, તેના ટ્રસ્ટીઓ તરફથી આપવામાં આવ્યું છે. મર્હુમની ઇચ્છાનુસાર આ પુસ્તક, એના યોગ્ય અભ્યાસીઓને વિના મૂલ્યે આપવાનું ઠરાવ્યું છે. તેથી ગ્રંથ મેળવવા ઇચ્છનાર, વકીલ કેશવલાલ પ્રેમચંદ મોદી, હાજાપટેલની પોળ, અમદાબાદ; એમના ઉપર પોસ્ટેજ પુરતું ખર્ચ મોકલી મેળવી શકશે.

—વ્યવસ્થાપક.

श्रीवल्लभोपाध्यायविरचितं

जयदेवसूरि-माहात्म्यम् ।

...गणाधिराज भ० १९ श्रीविजयदेवसूरिगुरुभ्यो नमः ॥

...स्वस्तीव स्वस्तिकारकम् । वर्द्धमानं जिनं नौमि जगतः परमप्रियम् ॥१॥

...—अहं वर्धमानं जिनं नौमीति क्रियान्वयः सुगमः। कथम्०? वर्धमानं स्वस्ति-
...न, संवृत्तो–मिलितो, य स तथा तम्। किमिव? स्वस्तीव–स्वस्तिशब्द इव।
...स्वस्ति कल्याणमित्यर्थेन मिलितं–व्याप्तं, यत्तत्तम्। तथा तत्स्वस्ती-
त्यर्थस्य स्वस्तिशब्द एव विद्यमानत्वात्। न तु घटादौ शब्दवृन्दे,
...र्थबाधकत्वात्। न च कल्याणादिशब्दवृन्देऽपि, कल्याणादिशब्दवृन्दस्य
स्वाधकत्वात्; सुवर्णादीनामपि पर्यायत्वात्। केनापि 'कल्याणमस्तु'
...र्णमस्तु इत्यप्यर्थप्रतीतेः। पुनः कथंभूतं वर्धमानं? स्वस्तिकारकं–
स्वस्तीव–स्वस्तिशब्दवत्। यथा स्वस्तिशब्दः केनाप्युच्चरितः श्रुतः सन्
...स्य कस्यचित् स्वस्तिकारी स्यात्, तथा वर्धमानजिनोऽपीति। स्वस्तीव
... इत्यत्र प्रकृतशब्दनिर्देशत्वात् अव्ययत्वात्; द्वितीयविभक्त्येक-
...नामिति वाग्भटवचनात्। भिन्नलिङ्गोपमां बुधाः क्वापि प्रयुञ्जते
इति वाग्भटेन तत्रैव कथितत्वात्। मुखं चन्द्रमिवालोक्य
लिङ्गोपमादोषोऽपि नेति। ननु पुंल्लिङ्गस्त्रीलिङ्गशब्दान् विहाय
किं प्रयोजनम्। अव्ययशब्दानां नपुंसकलिङ्गत्वात्। नपुंसकस्य च
...न्यैवम्–'प्रणवश्चाथ शब्दश्च, द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा
...॥ १ ॥' इति प्राचां वचनात्; प्रथादिशब्दवत् स्वस्तिशब्दस्य
इकारककाराभ्यामवश्यं सर्वार्थत्वात् स्वस्तीत्यस्य अव्ययस्य नपुंसकस्य
। अथवा 'सदृशं त्रिषु लिङ्गेषु' इत्युक्तत्वात्, अव्ययानां त्रिष्वपि
...स्वस्तीत्यनयोः उभयोरुपमापदयोः पुंल्लिङ्गद्वितीयैकवचनेमवावसे–
...त्र अव्ययोपमापदयोः प्रयोगे–'सदृशं त्रिषु लिङ्गेषु, सर्वासु च
...न व्येति तदव्ययम्॥१॥' इत्युक्तत्वात्। यथा अव्ययशब्दो लिङ्गादिषु
श्रीविजयदेवमाहात्म्यनामकं काव्यमपि। स्वास्तित्वं कर्तृभोक्तृ
...न व्येतीति कवेरभिप्रायः। पुनः कथंभूतं वर्धमानं जिनं?
तार्थमेवदुभयोर्विशेषणं इति श्लोकार्थः ॥ १ ॥

सद्गत मोदी श्रीयुत प्रेमचंद दोलतराम स्मारक-ग्रन्थांक २

अमदावाद निवासी सद्गत श्रावक श्रीयुत प्रेमचंद दोलतराम मोदीना पुण्यस्मरणार्थे, तेमना स्नेही रा. रा. श्रीगिरधरलाल उत्तमराम पारेख, बी. ए., एलूएल्. बी. (प्लिडरमोसीक्युटर-अमदावाद) एमणे अर्पण करेला द्रव्यमांथी आ ग्रन्थ प्रकाशित करवामां आव्यो छे.

जैन साहित्य
संशोधक ग्रन्थमाला

विजयदेव-माहात्म्यम्

सम्पादक
भिक्षु जिन विजय

जैन साहित्य संशोधक ग्रन्थमाला

ग्रन्थाङ्क-१

श्रीश्रीवल्लभपाठक-विरचितं

विजयदेव-माहात्म्यम्

(प्रथम भाग-मूलमात्र)

संशोधक तथा संपादक

भिक्षु जिन विजय

[आचार्य-गूजरात पुरातत्त्व मन्दिर-अमदावाद]

प्रकाशक

जैन साहित्य संशोधक समिति मारफत

मर्हुम रा. बा. गीरधरलाल उत्तमराम पारीख

बी. ए. एलएल. बी. ना ट्रस्टीओ

अमदावाद

Edited by Muni Jin Vijayaji Jaina Sahitya Samsodhaka Karyalaya Ahmedabad and Published by K. P. Modi the trustee of late R. B. Girdharlal Uttamram Parikh Haja Patel's Pole Ahmedabad and Printed at the Diamond Jubilee Printing Press, Salapose Road Ahmedabad by Devidas Chhaganlal Parikh, 1928.

1st Edition. 500 Copies.

वि. सं. १९८४] [ख्रि. सं. १९२८

प्रास्ताविक

आ विजयदेव माहात्म्य १७ मा सैकाना जैन धर्मना इतिहासनी दृष्टिए एक घणो उपयोगी ग्रन्थ छे. जैन आचार्योमां विजयदेवसूरि ए छेल्ला प्रभावशाली आचार्य गणी शकाय. एमना समयमां जैन यति-समुदायमां अने श्रावक-वर्गमां घणी घटनाओ अने क्रान्तिओ थई. धार्मिक अने सामाजिक परिस्थितिना अवलोकननी दृष्टिए ए घटनाओनो इतिहास घणो रोचक अने सूचक छे; तेथी ए आखो इतिहास आ ग्रन्थना बीजा भागरूपे प्रकट करवानो विचार राख्यो छे. तेमां आ आखा ग्रन्थनो सार आपवामां आवशे अने ते साथे विस्तृत ऊहापोह करवामां आवशे. ग्रन्थकार श्रीवल्लभ पाठकनो परिचय पण तेमां ज अपाशे. तेथी आ भाग केवल मूल ग्रन्थ तरीके ज प्रकट कराय छे.

—जिन विजय

નોંધઃ—આ ગ્રંથનું છપામણ ખર્ચ, અમદાબાદ નિવાસી મર્હુમ રા. બા. ગિરધરલાલ ઉત્તમલાલ પારેખે શેઠ પ્રેમચંદ દોલતરામના સ્મરણાર્થે મુકેલ રકમમાંથી, તેના ટ્રસ્ટીઓ તરફથી આપવામાં આવ્યું છે. મર્હુમની ઇચ્છાનુસાર આ પુસ્તક, એના યોગ્ય અભ્યાસીઓને વિના મૂલ્યે આપવાનું ઠરાવ્યું છે. તેથી ગ્રંથ મેળવવા ઇચ્છનાર, વકીલ કેશવલાલ પ્રેમચંદ મોદી, હાજાપટેલની પોળ, અમદાબાદ; એમના ઉપર પોષ્ટ જ પુરતું ખર્ચ મોકલી મેળવી શકશે.

—વ્યવસ્થાપક.

श्रीवल्लभोपाध्यायविरचितं

विजयदेवसूरि-माहात्म्यम् ।

ॐ ॥ श्रीतपागच्छाधिराज भ० ६९ श्रीविजयदेवसूरिगुरुभ्यो नमः ॥

स्वस्तीव स्वस्तिसंपृक्तं स्वस्तीव स्वस्तिकारकम् । वर्द्धमानं जिनं नौमि जगतः परमप्रियम् ॥१॥

१–ऐं नमः। व्याख्या–अहं वर्धमानं जिनं नौमीति क्रियान्वयः सुगमः। कथम्०? वर्धमानं स्वस्ति-संपृक्तं–स्वस्ति–कल्याणेन, संपृक्तो–मिलितो, यः स तथा तम्। किमिव? स्वस्तीव–स्वस्तिशब्द इव। कथंभूतं स्वस्ति? स्वस्तिसंपृक्तं–स्वस्ति कल्याणमित्यर्थेन मिलितं–व्याप्तं, यस्तथा। यथा तत्स्वस्ति-स्वरूपार्थस्य कल्याणापरपर्यायस्य स्वस्तिशब्द एव विद्यमानत्वात्। न तु घटादौ शब्दवृन्दे, घटादिशब्दानां अपरपदार्थवाचकत्वात्। न च कल्याणादिशब्दवृन्देऽपि, कल्याणादिशब्दवृन्दस्य स्वस्तिशब्दस्य पर्यायान्तरवाचकत्वात्; सुवर्णादीनामपि पर्यायत्वाच्च। केनापि 'कल्याणमस्तु' इत्याशीर्वचने निवेदिते स्वर्णमस्तु इत्यप्यर्थप्रतीतेः। पुनः कथंभूतं वर्धमानं? स्वस्तिकारकं–कल्याणकारकम्। किमिव? स्वस्तीव–स्वस्तिशब्दवत्। यथा स्वस्तिशब्दः केनाप्युच्चरितः श्रुतः सन् स्वस्तिमयोऽस्वस्तिमयो वा यस्य कस्यचित् स्वस्तिकारी स्यात्, तथा वर्धमानजिनोऽपीति। स्वस्तीव इत्युभयोरुपमापदयोः स्वस्ति इत्यत्र अव्ययशब्दनिर्देशत्वात् अव्ययत्वात्; द्वितीयविभक्त्येक-वचनलोपः विभिन्नलिङ्गवचनानामिति वाग्भटवचनात्। भिन्नलिङ्गोपमां बुधाः क्वापि प्रयुञ्जते तथापि लिङ्गभेदं तु मेनिरे; इति वाग्भटेन तत्रैव कथितत्वात्। मुखं चन्द्रमिवाभोजम् इत्याद्युदाहरणवत्। नपुंसकलिङ्गोपमादोषोऽपि नेति। ननु पुंलिङ्गस्त्रीलिङ्गशब्दान् विहाय कारित एव अव्ययशब्दप्रयोगे किं प्रयोजनम्? अव्ययशब्दानां नपुंसकलिङ्गत्वात्। नपुंसकस्य च कार्यकरणे असमर्थत्वात् इति चेन्नैवम्–'ओंकारश्चाथ शब्दश्च, द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ, तस्मान्माङ्गलिकावुभौ ॥ १ ॥' इति भाष्ये वचनात्; अथादिशब्दवत् स्वस्तिशब्दस्य नपुंसकलिङ्गत्वेऽपि मङ्गलवाचककार्यकारकत्वाभ्यामवश्यं सर्वाधिपत्यात् स्वस्तीत्यस्य अव्ययस्य नपुंसकस्य प्रथमतः प्रयोगो न दोषायेति। अथवा 'सदृशं त्रिषु लिङ्गेषु' इत्युक्तत्वात्, अव्ययानां त्रिष्वपि लिङ्गेषु समानरूपत्वात्, इह स्वस्तीत्यनयोः उभयोरुपमापदयोः पुंलिङ्गद्वितीयैकवचनेऽव्यय-त्वमिति। यथा स्वस्तीत्यत्रोभयत्र अव्ययोपमापदयोः प्रयोगे–'सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु, यन्न व्येति तदव्ययम्॥१॥' इत्युक्तत्वात्। यथा अव्ययशब्दो लिङ्गादिषु कदापि न व्येति तथा एतत् श्रीविजयदेवमाहात्म्यनामकं काव्यमपि। स्वस्तिमयत्वे वर्धनं च व्येतृप्रभृतीनां स्वस्तिकर्तृत्वे च न व्येतीति कवेरभिप्रायः। पुनः कथंभूतं वर्धमानं जिनं? जगतो लोकस्य परमप्रियं प्रकटार्थमेतदुभयोर्विशेषणं इति श्लोकार्थः ॥ १ ॥

प्रास्ताविक

आ विजयदेव माहात्म्य १७ मा सैकाना जैन धर्मना इतिहासनी दृष्टिए उपयोगी ग्रन्थ छे. जैन आचार्योमां विजयदेवसूरि ए छेल्ला प्रभावशाली आचार्य गणाय. एमना समयमां जैन यति-समुदायमां अने श्रावक-वर्गमां घणी मटनाओ क्रान्तिओ थई. धार्मिक अने सामाजिक परिस्थितिना अवलोकननी दृष्टिए ए इतिहास घणो रोचक अने सूचक छे; तेथी ए आखो इतिहास आ ग्रन्थना बीजा भागमां प्रकट करवानो विचार राख्यो छे. तेमां आ आखा ग्रन्थनो सार आपवामां आवशे अने ते साथे विस्तृत ऊहापोह करवामां आवशे. ग्रन्थकार श्रीवल्लभ पाठकनो परिचय पण तेमां ज अपाशे. तेथी आ भाग केवल मूल ग्रन्थ तरीके ज प्रकट कराय छे.

–जिन विजय

નોંધઃ—આ ગ્રંથનું છપામણુ ખર્ચ, અમદાબાદ નિવાસી મર્હુમ ગિરધરલાલ ઉત્તમલાલ પારેખે શેઠ પ્રેમચંદ દોલતરામના સ્મરણાર્થે રકમમાંથી, તેના ટ્રસ્ટીઓ તરફથી આપવામાં આવ્યું છે. મર્હુમની ઇચ્છા આ પુસ્તક, એના યોગ્ય અભ્યાસીઓને વિના મૂલ્યે આપવાનું ઠરાવ્યું ગ્રંથ મેળવવા ઇચ્છનાર, વકીલ કેશવલાલ પ્રેમચંદ મોદી, હાજાપટેલ અમદાબાદ; એમના ઉપર પોષ્ટે જ પુરતું ખર્ચ મોકલી મેળવી શકશે

—વ્યવસ્થાપક

पत्युक्तं वच ईदृक्षं श्रुत्वा सा मुमुदे हृदि । मम स्वामिन् सुतो भावी येनेति मागचिन्तयम् ॥
पत्या सार्धं शुभान् भोगान् देवतास्पर्द्धयेव किम् । भुञ्जाना मायरङ्गभं सा ततस्तनचित्तमुद् ॥
उत्सवेन सुखेनापि निराबाधतया तथा । तस्याः कुक्षौ सरस्यां सन् गर्भः पद्म इवैधत ॥१६॥
धर्मकर्माणि कुर्वन्ती पूरयन्ती च दोहदान् । गर्भयोग्यानि भोज्यानि भुञ्जाना चाप्यवर्तत ॥
चतुस्त्रिंशत्तमे वर्षे षोडशस्य शतस्य हि । पौषे मासे सिते पक्षे त्रयोदश्यां दिने रवौ ॥१८॥
नक्षत्रे रोहिणीनाम्नि सम्यग्योगसमन्विते । सर्वास्वाशासु सौम्यासु निष्पन्नाखिलनीवृत्सु च ॥
स्थिरे वरे वृषे लग्ने शोभमाने शुभग्रहैः । उच्चस्थानस्थितैः सर्वैः स्वस्वस्वामिभिरीक्षिते ॥२०॥
परिपूर्णे तथा सार्धे नवमासावधौ शुभे । पुत्रं प्रासूत सा पूतनाग्रज्ज्योतिस्तनूदयम् ॥२१॥
निरातङ्का निरातङ्कं निश्शोका शोकवर्जितम् । सुभगा सुभगं सौम्या सौम्याकारं सुखाकरम् ॥

—षड्भिः कुलकम् ।

स सदोचितबालाख्यगोत्रोदयकरोऽस्फुरत् । जगज्ज्योतिष्करोऽगारान्तःस्थः स्वर्योऽर्यमेव हि ॥
अगायन् जन्मयोग्यानि गीतानि च शुभोपिताः । वाद्यान्यवादयत् श्रेष्ठी विचित्राणि दिवानिशम् ॥
ततः प्रातः स्थिरश्रेष्ठी समाहूय महाजनान् । तेभ्योऽदाग्नालिकेराणि सुतजन्म निवेदयन् ॥२५
अभूज्जयजयाकारः सारः श्रेष्ठिस्थिरालये । आत्मसम्बन्धिनश्चान्ये लोका उद्गर्वमानसाः ॥ २६

१५–भोगान् शब्दादीन् भुञ्जाना अनुभवन्ती । भुञ्जाना इत्यत्र 'ताच्छील्यवयोवचनशक्तिषु चानश्' इत्यानश् ताच्छील्यार्थः ।

१६–पद्मशब्दः कमलवाची पुंनपुंसकलिङ्गत्वात् पुल्लिङ्गो ज्ञातव्यः ।

१७–दोहदशब्दः पुंनपुंसकः ।

२३–स बालोऽस्फुरत् अशोभत । कथंभूतो बालः ? सदा उचितबालाख्यगोत्रोदयकरः । कथंभूतः च बालः ? अगारान्तःस्थः सन् गृहमध्यस्थितः सन् जगज्ज्योतिष्करः । क इव ? स्वर्योऽर्यमेव; हि निश्चयेन स्वर्यः आकाशस्थितः अर्यमेव सूर्य इव । कथंभूतः सूर्यः ? सदा उचितबालाख्यगोत्रोदयकरः–उचिता योग्या बाला प्रथमतया उदितत्वात् बालक इत्यन्वर्था नाम यस्य सः उचितबालाख्यः तत्कालोदितः सूर्यो बाल एवोच्यते । गोत्रे अद्रौ उदयाचले उदयं प्रकटमभं करोतीति गोत्रोदयकरः । उचितबालाख्यश्चासौ गोत्रोदयकरश्चेति कर्मधारये उचितबालाख्यगोत्रोदयकरः । पुनः कथंभूतः अर्यमा ? जगज्ज्योतिष्करः ।

२५–तेभ्यो नालिकेराणि, दत्तौ महत्क्षमः सुत–इति पाठान्तरम् ।

२६–गुं प्रसवैश्वर्ययोः, गतावप्येके; भ्वादि. परस्मैपदी इत्यस्य अनद्यतनी इत्यस्य पुरुषबहुवचनं अदसवन् सारवान् अभूदित्यर्थः । तदर्थोपति–

माहात्म्यं पूर्वसूरीणामतिशेतेऽत्र भूतले । विजयदेवसूरीणां माहात्म्यमधिकं सदा ॥२॥
विजयदेवमाहात्म्यं वर्ण्यतेऽत्र यतोऽद्भुतम् । विजयदेवमाहात्म्यं नाम काव्यं ततः स्मृतम् ॥३॥
विजयदेवमाहात्म्यनाम काव्यं कविप्रियम् । श्रीवल्लभ उपाध्यायः कुरुते स्वार्थसिद्धये ॥४॥
विजयदेवसूरीणां प्रगुणाः सद्गुणा गुणाः । विदिता अवदाताश्च प्रेरयन्ति यतोऽत्र माम् ॥५॥ युग्मम्
भास्वच्छ्रीभारते क्षेत्रे, धरालङ्करणं सदा । पुराणां भाति राजेव श्रीईडरपुरं पुरम् ॥६॥
तत्र श्रेष्ठी स्थिरो नाम श्रेष्ठश्रेष्ठिशिरोमणिः । ऋद्धिमान् भूपतेः प्रेष्ठः श्रेष्ठः सर्वमतिष्ठया ॥७॥
रूपानाम्नी सुरूपा स्त्री तस्यासीच्छुभलक्षणा । विनयादिगुणोपेता रूपवत्स्वप्रियप्रिया ॥८॥
एतौ जायापती भोगान् शचीशक्राविवानिशम् । अभुञ्जातामयुञ्जातां रतिप्रीतीव चेतसि ॥९॥
सुखसुप्तैकदा रूपा स्वप्ने सिंहं व्यलोकयत् । एतत्प्रभावान्मे पुत्रो भावी चेति व्यचिन्तयत् ॥१०॥
उत्थाय मातराहेति पतिं प्रति पतिव्रता । अद्यापश्यमहं रात्रौ स्वप्ने सिंहं सह श्रिया ॥११॥
इति श्रुत्वा वचस्तस्याः स्थिरः स्थिररतिः पतिः । अभवच्छुभवद्वाक्यं श्रुत्वा प्रीतो भवेन्न कः ॥१२॥
पतिः पत्नीं प्रति प्राह तव पुत्रो भविष्यति । सूर्यवद्भुवि तेजस्वी सर्वसर्वसहाधिपः ॥१३॥

५—प्रगुणाः प्रकृष्टाः अन्यसूरिजनापेक्षया, क्रोधाक्रोशगालिप्रमुखप्रतिकूलदोषरहितत्वात्, एकैकतोऽधिकत्वाच्च; गुणा भयानकमनोहरत्वादयो येषां ते प्रगुणाः । गुणाः शौर्यौदार्यसौन्दर्यशौण्डीर्यादयः । 'पडिरूवो १ तेयस्सी २' इत्यादयः षट्त्रिंशत्सूरिसम्बन्धिनः, सप्तविंशतिः साधुसम्बन्धिनो वा । कथंभूताः गुणाः सद्गुणाः सन्तो विद्यमानाः सत्याः प्रशस्याः अर्चिता वा; पूर्वसूरीणां अपरसाधुजनानां च गुणानामपेक्षया सुभगत्वादयस्तत्तद्गुणप्रतिकूलाऽसुभगत्वादिदोषरहितत्वात्; येषां ते सद्गुणा इति गुणविशेषणं युक्तम् ॥५॥

६—श्रीईडरपुरमित्यत्र सन्ध्यऽकरणं प्रकटावबोधार्थं, सन्धौ हि डरपुरमित्यनिष्टनामाशङ्कानिरासार्थं च; विवक्षितत्वात् सन्धेः, 'भो भगो अघो अपूर्वस्येति' पाणिनीयसूत्रवत्; 'अइउऋऌ समानाः' इति सारस्वतसूत्रादिवत् । अहं पूर्वो अहं पूर्वे इत्यहंपूर्विका क्रियाभिविनोदवचनवच्च । न चात्र 'संहितैकपदे नित्या' इति कथनात् श्रीईडरपुरमित्येकपदत्वात् नित्यसन्धिविधानाशङ्का करणीया; भो भगो अघो अपूर्वस्येत्यत्रैव एकपदत्वे सत्यपि सन्धेरकरणे ज्ञापकात् । श्रीईडरपुरं पुरं क इव राजेव । कथंभूतो राजा ? सदा धरालङ्करणं पृथिव्या अलङ्कारः । अलङ्करणशब्दस्य अजहल्लिङ्गत्वात् राज्ञो विशेषणे नपुंसकवचनं न दुष्टम् । पुरविशेषणे तु पुरशब्दस्य नपुंसकत्वात् नपुंसकवचनं विशिष्टमेवेति ॥६॥

८—रूपवत् सौन्दर्यमिव नाम्नैव वा यथा सौन्दर्यं नाणकं वा वल्लभं भवेत् तथा रूपा नार्या पत्युः ।

१३—सर्वंसहायाः सर्वसहायाः पृथिव्याः अधिपः स्वामी सर्वसर्वसहाधिपः ।

प्रत्युक्तं च इदं श्रुत्वा सा मुमुदे हृदि । मम स्वामिन् सुतो भावी येनेति प्रागचिन्तयम् ॥
पत्या सार्धं शुभान् भोगान् देवतास्पर्द्धयेव किम् । भुञ्जाना साधरद्गर्भं सा तत्सन्ततिचित्तमुत् ॥
उत्सवेन सुतेनापि निराबाधतया तथा । तस्याः कुक्षौ सरस्यां सन् गर्भः पद्म इवैधत ॥१६॥
धर्मकर्माणि कुर्वन्ती पूरयन्ती च दोहदान् । गर्भयोग्यानि भोज्यानि भुञ्जाना चाप्यवर्तत ॥
चतुस्त्रिंशत्तमे वर्षे षोडशस्य शतस्य हि । पौषे मासे सिते पक्षे त्रयोदश्यां दिने रवौ ॥१८॥
नक्षत्रे रोहिणीनाम्नि सम्यग्योगसमन्विते । सर्वास्वाशासु सौम्यासु निष्पन्नासावनीषु च ॥
स्थिरे चरे वृषे लग्ने शोभमाने शुभग्रहैः । उच्चस्थानस्थितैः सर्वैः स्वस्वस्वामिभिरीक्षिते ॥२०॥
परिपूर्णे तथा सार्धे नवमासावधौ शुभे । पुत्रं प्रासूत सा पूतजाग्रज्ज्योतिस्तनूद्भवम् ॥२१॥
निरातङ्का निरातङ्कं निश्शोका शोकवर्जितम् । सुभगा सुभगं सौम्या सौम्याकारं सुखाकरम्॥

—षड्भिः कुलकम् ।

स सदोचितबालाख्यगोत्रोदयकरोऽशुभत् । जगज्ज्योतिष्करोऽगारान्तःस्थः खस्थोऽर्यमेव हि ॥
अगायन् जन्मयोग्यानि गीतानि च सुयोषितः । वाद्यान्यवादयच्च श्रेष्ठी विविधानि दिवानिशम्॥
ततः प्रातः स्थिरश्रेष्ठी समाहूय महाजनान् । तेभ्योऽदान्नालिकेराणि सुतजन्म प्रियं यतः ॥२५
अभूज्जयजयाकारः सारः श्रेष्ठिस्थिरालये । आत्मसम्बन्धिनधाम्नि लोका उदसवंस्तदा ॥ २६

१५—भोगान् शब्दादीन् भुञ्जाना अनुभवन्ती । भुञ्जाना इत्यत्र 'ताच्छील्यवयोवचनशक्तिषु चानश्' इत्यानश् ताच्छील्यार्थः ।

१६—पद्मशब्दः कमलवाची पुंनपुंसकलिङ्गत्वात् पुल्लिङ्गो व्याख्येयः ।

१७—दोहदशब्दः पुंनपुंसकः ।

२३—स बालोऽशुभत् अशोभत । कथंभूतो बालः ? सदा उचितबालाख्यगोत्रोदयकरः । कथंभूतः स बालः ? अगारान्तःस्थः सन् गृहमध्यस्थितः सन् जगज्ज्योतिष्करः । क इव ? खस्थोऽर्यमेव; हि निश्चयेन खस्थः आकाशस्थितः अर्यमेव सूर्य इव । कथंभूतः सूर्यः ? सदा उचितबालाख्यगोत्रोदयकरः—उचिता योग्या बालः प्रथमवस्तत्कालोद्गतत्वात् बालक इत्याख्या नाम यस्य सः उचितबालाख्यः तत्कालोद्गतः सूर्यो बाल एवोच्यते । गोत्रे अर्थाद् उदयाचले । उदयं उद्गमनं करोतीति गोत्रोदयकरः । उचितबालाख्यश्चासौ गोत्रोदयकरश्चेति कर्मधारये उचितबालाख्यगोत्रोदयकरः । पुनः कथंभूतः अर्यमा ? जगज्ज्योतिष्करः ।

२५—तेषां सनालिकेराणि, ददौ यद्वल्लभः सुतः—इति पाठान्तरम् ।

२६—सुं प्रसवैश्वर्ययोः, गतावप्येके; भ्वादिः परस्मैपदी इत्यस्य अनद्यतनी प्रथमपुरुषबहुवचनं उदसवन् उत्सवान् चक्रुरित्यर्थः । तद्दर्शयति—

वर्द्धापकं गृहीत्वाशु योषितो यान्तु तद्गृहम् । सङ्गीतानि च गायन्तु स्फिराङ्गनानिर्यनः ॥ २७
ततोऽह्नि पञ्चमेऽर्कस्य दर्शनं शशिनो निशि । कारयामासतुस्तस्य पितरौ परमोत्सवात् ॥२८॥
एवं जन्मोत्सवे दिव्ये जायमाने दिवानिशम् । आजगाम श्रियां धाम दशमं सुदिनं दिनम् ॥
सगोत्रानादरात्तत्र निमन्त्र्य च महाजनान् । भक्तितो भोजयामास मृष्टान्नं लप्सिकादिकम्॥
तेषामिभ्यः सभ्यानां नालिकेराण्यदात्ततः । चिरं जीव्यादयं बालो ददुरित्याशिषं च ते॥३१
वसत्यस्मिन् सदा लक्ष्मीर्वलवांश्च कुमारवत् । इति वासकुमारोऽयं पिता नामावदत्तदा ॥ ३२
दिव्यदेवाङ्गनं चाथ जलयात्रां महोत्सवात् । पुत्रस्याकुरुतां रूपं पितरौ प्रीतचेतसौ ॥ ३३ ॥
एवं जन्मोत्सवं तस्य कृत्वा तुतुषतुस्तराम् । पितरौ च तथैवान्ये तुतुषुर्नागरा नराः ॥ ३४ ॥
अथ वासकुमारोऽसाववर्धत दिने दिने । कलारूपप्रतापाद्यैर्द्वितीयाचन्द्रमा इव ॥ ३५ ॥
श्रीमान् प्रसादनीयश्च सुरम्यो दर्शनीयकः । प्रतिरूपो ऽभिरूपश्च कलाकलितपुद्गलः ॥ ३६॥
—युग्मम् ॥

धात्रीभिः पञ्चभिः सम्यक् पाल्यमानो दिवानिशम् । स प्रापत्सप्तमं वर्षं पठनार्हं सदा शिशोः॥
शुभे मासे सिते पक्षे वरवारे वरे तिथौ । सुमुहूर्ते शुभे लग्ने सुयोगे सुदिने दिने ॥ ३८ ॥
कृत्वा महोत्सवं दिव्यं गजाश्वादि विराजितम् । नानाप्रकारवाद्यानां शब्दसन्दोहसुन्दरम् ॥
कान्तासन्ततिसंगीतगीताद्भुतविधायकम् । गीयमानयशःकीर्तिं विबुधैर्मागधादिभिः ॥ ४० ॥
विद्वदध्यापकाभ्यासे पिताऽध्यापयति स्म तम् । विद्याः सोऽधीतवान् सर्वाः पूर्वाधीत इवैव यत् ॥
——चतुर्भिः कलापकम् ।

अधीतसर्वविद्यं तं विलोक्य विनयान्वितम् । पितरौ सममोदेतां तस्मिंश्चास्निह्यतांतराम् ॥४२॥

२९—सुदिनशब्दः शोभनपर्यायः ।

३१—तेषामित्यत्र सम्प्रदानाभावान्न चतुर्थी ।

३३—प्रशस्तकुरुतामिति अकुरुतां रूपम् ।

३६—प्रसादनीयः पश्यतां जनानां मनःप्रसन्नताकारी । सुरम्यः सुष्ठु रमणीयः । दर्शनीयकः पश्यतां जनानां नेत्राणां न श्रमकारकः । प्रतिरूपः पश्यन्तो लोकाः पृथक् पृथक् प्रतिबिम्बमिव पश्यन्ति । अत एव अभिरूपो मनोहरः । अत एव कलाकलितपुद्गलः कलासहितशरीरः । असौ वासकुमारो द्वितीया चन्द्रमाश्च एभिर्विशेषणैः सदृशौ येषेतामित्यर्थः । कुमारपक्षे कलाकलितपुद्गलः विज्ञानकौशलान्वितवतुः । चन्द्रपक्षे षोडशांशान्वितवतुरित्यर्थः ।

नव्यो नव्योऽभवत्स्नेहः पुत्रे पित्रोः क्षणे क्षणे। पितृपुत्रदशां वक्तुं नाशक्नोत्कोऽपि पण्डितः ॥
भ्रममाणे तथागाधे पुत्रप्रेमसरोवरे । पितरौ रसिकावास्तां हंसाविव निरन्तरम् ॥ ४४ ॥
श्रीमद्वासकुमारस्य दर्शने जनचेतसाम् । इच्छा न घटतेऽक्षीच्छा लभते च श्रमं न हि ॥ ४५ ॥
दिव्यं वासकुमारास्यपद्मं लोका व्यलोकयन् । वरं रूपरसं चैव मापिबन् भ्रमरा इव ॥ ४६

एवं वासकुमारजन्मन इमं रम्योत्सवं सोत्सवाः,
श्रुत्वा धर्मविधायिनो भविजना धर्मे कुरुध्वं रतिम् ।
श्रीमद्वासकुमार उत्तमकुले पुण्याद् यथा धोत्तमाद्,
दिव्याः सम्पद आपदापद्युता यूयं यथा माप्नुत ॥

इति श्री बृहत्खरतरगच्छीय श्रीजिनराजसूरि सन्तानीय पाठक श्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराजपातशाह श्रीअकब्बर प्रदत्तजगद्गुरु-बिरुद-धारक श्रीहीरविजयसूरीश्वर पट्टालङ्कार पातिशाहि श्रीअकब्बरसभासंलब्ध दुर्वादिजयवाद भट्टारक श्रीविजयसेनसूरीश्वर पट्टपूर्वोपचलसहस्रकरानुकारि पातिशाहि श्रीजिहांगीर प्रदत्त-महातपाबिरुदधारि श्रीविजयदेवसूरीश्वर गुणवर्णन प्रबन्धे श्रीविजयदेवमाहात्म्य नाम्नि महा-काव्ये श्रीविजयदेवसूरि जन्मोत्सववर्णनो नाम प्रथमः सर्गः ॥ १ ॥

४३–पितृपुत्रदशां पिता च पुत्रश्च पितृपुत्रौ तयोर्दशां व्यवस्थां पितृपुत्रदशाम् । तत्र पितृदशां नवनवोत्सवकरणभव्यभव्यमहामूल्यवस्त्रसुवर्णालङ्कारादिवितरणपरमप्रेमधरणलक्षणाम् । पुत्रदशां विविधपाणक्यादिराजनीतिशास्त्राध्ययनविनयशौर्यौदार्यसौन्दर्यशौण्डीर्य-चातुर्यादिलक्षणामवस्थाम् । कोऽपि पण्डितो वक्तुं न शक्नोत् न समर्थोऽभवत् ।

४४–हंसाविति हंसश्च हंसी च इति द्वन्द्वे पुमान् स्त्रिया इत्यनेन सहोक्तौ पुंसः शेषे हंसौ इति सिद्धिः । यथा ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ तथा हंसावित्यपि ।

४५–घटचेष्टायां चेष्टा ईहा भ्वादौ घटादिः, धातूनामनेकार्थत्वादीहार्थोऽपि घटवि-धातुरत्र हीनार्थो ज्ञेयो न ईहार्थः । ततोऽयमर्थः–न घटते वर्धते इत्यर्थः ।

४७–माप्नुतेति माङ् व्याप्तौ लिङाद्यप्रत्यये प्रथमपुरुषैकवचने सिद्धमित्यर्थः ।

द्वितीयः सर्गः

अथ वासकुमारस्तद् भोगार्हं प्राप यौवनम् । यस्मिंस्त्यजति सच्छीलमर्यादां मौनयौवनम् ॥१॥
मोमुह्यन्ते जना भोगे संसारारण्यचारिणः । यल्लब्ध्वांभसि मोहेन मृगतृष्णां मृगा इव ॥२॥
दुष्करं सुकरं कर्म सुकरं च तृणोपमम् । यल्लब्ध्वा वेत्त्यमत्तोऽपि मर्त्योऽनिमदमत्तवत् ॥३॥
इन्द्रियाणि सुरम्याणि विकसन्ति दिने दिने । यस्मिन् सूर्योदये किं न पद्मानीव सुखाय तत् ॥४॥
ईदृशं यौवनं प्राप्तो जयदत्त इवाबभौ । श्रीमान् वासकुमारः स रूपवद् रूपमेव यः ॥ ५ ॥
अथ पुण्यात्मने तस्मै महान्तो व्यवहारिणः । ददुः कन्या जगन्मान्या लावण्यादिगुणैः शुभैः ॥६॥
तथाप्येकस्य सभ्यस्य महेभ्यस्य यशस्विनः । कन्यामनन्यसौजन्यलावण्यां पुण्ययौवनाम् ॥७॥
दृष्ट्वा मीतात्मभूतां तत् पितरौ तद्गुणेरितौ । विज्ञायात्मीयपुत्रस्य योग्यां सौभाग्यसम्पदम् ॥८॥
विवाहयितु कामौ तौ तां च तत्पितराविति । अयाचेतामिमां कन्यां दत्तमस्मत्सुताय हि ॥९॥
तदा च पितरौ तस्या अब्रूतां विनयादिति । अनयोरस्तु वीवाहः उभयेषां सुखावहः ॥१०॥
श्रुत्वेतीत्थं स्थिरः श्रेष्ठी वचः कन्यापितुः शुचि । आननन्द हृदानन्ददायी पाणिग्रहो न किम् ॥११॥
एवं वीवाहसद्वार्तां व्यदधातां परस्परम् । प्रेमतो जातरोमाञ्चौ पितरौ पुत्रकन्ययोः ॥१२॥
स्वयं वासकुमारोऽथ प्रत्यबुध्यत सन्मतिः । प्रत्येकबुद्धवच्छुद्धसिद्धान्तोदितधर्मवित् ॥ १३ ॥

१—मौनं च मुनिसमूहः यौवनं च युवतीनां समूह इति समाहारद्वन्द्वे मौनयौवनम् ऋषीणां समूहो युवतीनां समूहश्च यस्मिन् यौवने वयसि सच्छीलमर्यादां त्यजति । मुनीनां समूहो वृन्दं मौनं यौवनमिति चन्द्राचार्याद्यभिप्रायेण; वस्तुतस्तु तद्धितप्रत्ययोत्पत्तेः प्रागेव पुंवद्भावेन भवितव्यम्; ततो युवतीनां समूहो यौवनं भिक्षादेरित्यणि जामिश्वाणिनाद्वितयत्परे इति पुंवद्भावेतीति वर्णलोपे यौवनं चतुर्थवर्गपञ्चमांतोयम् । यत उक्तवान् भाष्यकारः—भिक्षादिषु युवतिग्रहणानर्थक्यं पुंवद्भावस्य सिद्धत्वात् । प्रत्ययविधाविति यथा—'सुरूपमतिनैपथ्यं, कलाकुशलयौवनम् । यस्य पुण्यकृतः प्रेष्यं, सफलं तस्य यौवनम् ॥' इति ।

५—रूपवत् मनुष्याकारधारि रूपमेव सौन्दर्यमेव ।

८—तत्पितरौ वासकुमारस्य मातरपितरौ तद्गुणेरितौ तस्याः कन्यायाः गुणा सौजन्यद्यस्तैरीरितौ प्रेरितौ यौ तौ तद्गुणेरितौ ।

९—तौ श्रीवासकुमारस्य पितरौ कर्तृपदमेतत्, तत्पितरौ तस्याः कन्यायाः पितरौ तत्पितरौ तौ तथा कर्मपदमिदं तां कन्यां इति अयाचेतां याचतिर्धातुर्द्विकर्मकः इतीति । इमां कन्यामस्मत्सुताय दत्तम् । त्रिभिर्विशेषकम् ।

वचोभिर्विविधैरेवं प्रोक्तैः पित्रातिरागतः । नाभ्यमन्यत वीवाहं स कुमारः कुमारवत् ॥ ३३ ॥
एवं मात्रादिभिर्लोकैर्बन्धुभिस्स निवेदितः । नाङ्गीचकार वीवाहं शीलव्रतधृतिर्यतः ॥ ३४ ॥
लक्ष्मीं यशः प्रतापं च माहात्म्यं चाप्यरोगताम् । नरः प्राप्नोति शीलस्य प्रभावाद्वाञ्छितं यथा ॥
शीलप्रभावतो हेला सकलात्र टलेद्भुवि । उत्पद्येत सदा सौख्यं दुःखमात्रं कदापि न ॥ ३६ ॥
पालयेदमलं शीलं यो नरः शीलपालकः । वशीभवन्ति तस्याशु देवाः सर्वे च मानवाः ॥ ३७ ॥
अनेके सन्ति दातारो ऽनेके सत्पुरुषा अपि । तपस्विनोऽप्यनेके च न कश्चित् शीलपालकः ॥
तपस्विनो महान्तोऽत्र लोके द्वैपायनादयः । श्रूयन्ते तेऽपि च भ्रष्टाः शीलतः कीलिता इव ॥
दानतस्तपसोऽप्युग्राद् भावनायाश्च धर्मतः । ज्ञात्वा सुदुष्करं शीलं यतध्वं तत्र पण्डिताः ॥४०॥
ब्रह्मचर्यव्रते सम्यक् पालिते पालितानि यत् । शेषव्रतानि चत्वारि महान्ति यतिनामपि ॥
महाव्रतानि पञ्चैव पालनीयानि यत्नतः । स्वर्गापवर्गसौख्यानां दायकानि यतः किल ॥४२॥
चारित्रग्रहणाचानि पालयेयुर्मुमुक्षवः । मनोवचःकायशुद्ध्या विनातीचारसंचरम् ॥ ४३ ॥
विचिन्त्येति च निश्चित्य स्वचित्ते शीलपालनम् । अङ्गीचकार चारित्रग्रहणं स कुमारकः ॥४४
शिरोऽग्रे प्रतीतिस्म विनयात्समुदैकदा । यथाज्ञा भवतोमें स्याद् गृह्णीयां चरणं तदा ॥ ४५ ॥
कुमार किमीदृशमिदं वदसि फद्भद । बाल्ये वयसि चारित्रग्रहणं युज्यते कथम् ॥ ४६ ॥
दुष्करस्योदिता दीक्षा मुमुक्षूणां जिनेश्वरैः । सा ग्राह्या वार्धके प्रान्ते भुक्तभोगैर्नृभिः खलु ॥
क्षुत्पिपासादयो यस्यां द्वाविंशति परीषहाः । यादृशैस्तादृशैः पुंभिस्सहनीया न दुस्सहाः ॥४८॥
वत्सः सोढुं कथं रे तान् कथं तांश्च सहिष्यसि । बाललीलाकलाशीली यतः कोमलपुद्गलः ॥
अहरहर्भोगभोगं कन्दर्पो दर्पतो नरम् । दुष्करं रक्षितुं शीलं यौवने व्यथते तराम् ॥५०॥
भजो भोगान् नरैर्भोग्यान् नरयोग्यान् सुरेप्सितान् । विलासिन्या सहाजस्रं विलसालससत्कल्प ॥
पूर्वोपार्जिताः प्राप्ता इमा लक्ष्म्यो मनीषिताः । अनेके सेवका एते तत्कालाज्ञाविधायकाः ॥
मरुभूर्मनिभं दिव्यं मन्दिरं स्वर्गृहोपमम् । भाण्डागारमिदं सर्वं धान्यागाराण्यमूनि च ॥५३॥
गर्भगेहानि तिष्ठन्ते तव शुभोत्तमालये । एतदर्थे शुभांगोऽन्ये विक्लश्यन्तो नाप्नुवंति हि ॥ ५४ ॥
धनोपार्जनचिन्तापि कश्चनापि निवारकः । शरीरं रोगचिन्तापि नास्ति पुण्यात्पुराकृतात् ।
इमे हि द्विरदा अश्वा इमे उष्ट्रा इमे रथाः । वल्गन्तो बलीवर्दा इमे सन्ति पुरस्तव ॥ ५६ ॥

३३—स कुमार वामकुमारो वीवाहं नाभ्यमन्यत । किंवत् ? कुमारवत्—स्वामि [illegible]वत् । स्वामि[illegible]को हि न परिणीतवान इति प्राचीडिः । अथवा कुमारवत् बालकवत् यथा बालको [illegible] [illegible] [illegible] हितमहितं वा मनीषितमेव मन्यते न वस्तु [illegible] । तथा कुमारोऽपि [illegible] हितं वीवाहं न मन्यते स्म ।

खल्लूरिकायां त्वं पुत्र तेषामर्वाक् पराग्भ्रमः । रमस्व सुरलीं कुर्वन् मवयः सखिभिः सह ॥५७॥
पश्यन्तस्त्वां तदा लोकास्त्वदालोकनलोचनाः । कोऽयं राजकुमारोऽयं भणिष्यन्ति मिथोन्विति॥
इति प्रेमवचोऽवोचत् पिता पुत्रं तथापि हि । न व्यरंसीत्स चारित्राचारित्रिकृतिर्यतः ॥५९॥
इत्यादिवचनैः पुत्रं प्रतिबोधयितुं पिता । कदाग्रहे क्षमा नाभूद्सोऽपीन्दुरिवाम्बुजम् ॥ ६० ॥
दृढधर्मा प्रियधर्मानन्तशब्दद्वयीति यत् । सिद्धा व्याकरणे शब्दादर्यांषास्मिन् स्थिरौ स्थिता ॥
जगदुः कवयो लोका नागराः इति सूनृतम् । दृढधर्मा पुमानेष प्रियधर्मा तथा तदा ॥ ६२ ॥
मोक्तः संसारसौख्यार्थमिति पित्रादिभिर्जनैः । संसारं त्यक्तुकामः स नाभ्यमन्यत तद्वचः ॥
एवं च पितरौ ज्ञात्वा चारित्रग्रहणे दृढम् । चेतः पुत्रस्य तच्चेतःप्रीतये वदतामिति ॥ ६४ ॥
चारित्रग्रहणे पित्रोरनुज्ञास्ति तवाधुना । सगोत्रादिपरीवारयुक्तयोरावयोरपि ॥ ६५ ॥
अददातामथैवं तौ शिक्षां गद्गदया गिरा । दीक्षामादाय पुत्र त्वं साध्वाचारान् समाचरेः ॥६६॥
भणेयाः प्रवणीभूय ग्रन्थान् व्याकरणादिकान् । सिद्धान्तान् ज्योतिषग्रन्थान् तर्कग्रन्थांश्च भूयसः॥
विनयैः प्रणयैः प्रीतो निर्णयैः पुत्र चेतसा । गुरोः पृष्टं परैः प्रोक्तं सूनृतं येन वानृतम् ॥६८॥
स्मरेर्ग्रन्थान् पुराधीतान् सूत्रतश्च तथार्थतः । विस्मृतं स्मारयेरन्यान् पठितं पाठयेः पुत्र ॥
पञ्चेन्द्रियाणि संयम्य नियम्य विषयान् पुनः । संयमं पालयेः पुत्र स्वकीयगुरुवदनारे ॥ ७० ॥
गोपयित्वा प्रवर्तेथाः सर्वथेन्द्रियपञ्चकम् । पुत्र कूर्म इव ग्रीवाचतुश्चरणपञ्चकम् ॥ ७१ ॥
भवेर्निरुपलेपस्त्वं कर्मलेपेन सर्वदा । पयःकर्दमलेपेन पद्मपत्रमिवाम्बुज ॥ ७२ ॥
ग्रामदङ्गकुलादीनि नालम्बेथाः कदापि हि । स्तम्भादीनि समाकाशमिव प्रोक्तवाक्... ॥
सौम्यलेश्यां दधीयास्त्वं चन्द्रमा इव सर्वदा । आदित्य इव तेजस्वी स्यास्तपस्तेजसा भृशम् ॥
उत्पन्ने सुखदुःखादौ समचित्तो भवे भवेः । धैर्यगांभीर्यसंयुक्तः समुद्र इव सर्वदा ॥ ७६ ॥

५७—हे पुत्र ! खल्लूरिकायां चौगान इति भाषाप्रसिद्धायां क्रमसाधनाभूमौ तेषामवारी-सामवाङ् पराग् भ्रमे 'वरहापरहा फेरवानइ विषइ' इति भाषाप्रसिद्धे सुरलीं अभ्यासं कुर्वन् रमस्व ।

५८—तदा खल्लूरिकायां अश्वादीनां अर्वाक्पराग् भ्रमणावसरकाले कौतुकेन त्वां पश्यन्तो नु वितर्कं इति मिथो भणिष्यन्ति । इतीति किम् ? एवः कश्चिदि—कोऽयम् ? अपर आह—राजकुमारोऽयम् ।

६८—भो पुत्र ! गुरोः विनयैः विनयं कुर्वाणः हार्षेः । भो पुत्र ! प्रणयैः ... । भो पुत्र ! चिरकालीनैर्व्याख्यानिभिः साधुभिः परिचयकालिभिः साधुभिः अन्यैः ... इत्यादिभिर्वा प्रोक्तं कथितं सूनृतं सत्यं वा अनृतमसत्यं वा इति निर्णयैः निर्णयं कुर्वाणः कथं भूतस्त्वं ? चेतसा प्रीतः ।

पुस्तकानेकसच्छिप्यश्रावकादिपरिच्छदे । पक्षीव ममतां सर्वां विमुञ्चेस्त्वमात्मज ॥
समुत्पन्ने न कम्प्येथाः परीषहाद्युपद्रवे । दुःखदायिनि देहस्य पुत्रमेरुरिवोत्तम ॥ ७७ ॥
त्वं भवेः सर्वथा शुद्धहृदयः सर्वसाधुषु । शारदाम्भ इव प्रायः सर्वेहेतुषु सुनिर्मलम् ॥ ७८ ॥
मद्दाद्यन्यादिकां शिक्षां शिक्षादानविचक्षणौ । प्रपन्नचक्षुरमू तौ व्यरजेतां तदा सुतात् ॥ ७९ ॥
दीक्षादेवं च सच्छिक्षां दीक्षाया रक्षणे तदा । लब्ध्वा वासकुमारोऽयं हृदये सुमुदेतराम् ॥ ८० ॥
चारित्रं द्विविधं प्रोक्तं सर्वतो देशतस्तथा । साधूनां च गृहस्थानां मनीषितफलप्रदम् ॥ ८१ ॥
इति वासकुमारोऽथ चिन्तयामास मानसे । सर्वविरतिचारित्रमाशु अंगीकरवाण्यहम् ॥ ८२ ॥
धर्मेऽन्तराया भूयांसः संभवन्ति यतः सदा । अतो यतेयं चारित्रग्रहणे त्वरितं खलु ॥ ८३ ॥
देशविरतिचारित्रं पाल्येयमयो पुरा । वीरसेनमहीपाल इवेति स व्यचारयत् ॥ ८४ ॥

तथया—देशविरतिचारित्रं स यावत्तत पालयन् ।
सर्वविरतिचारित्रं जिघृक्षीयुस्ततः पुनः ॥ ८५ ॥

एवं कुर्वन् गुरोर्वर्यां परीक्षां सर्वसाधुषु । श्रद्धायां च ततश्चारु चारित्रे सर्वतः स्फुटम् ॥ ८६ ॥
चारित्रं सर्वसाराणां पठनं संयमस्तपः । इत्यादि निर्वहेत्सम्यक् संयोगे सद्गुरोर्यतः ॥ ८७ ॥

एवं वासकुमार एष चरणे येनो यथाचीकरत्
श्रीश्रीवल्लभपाठकेन पठितं पाठ्यमाने बुधैः ।
श्रुत्वा तत्र तथा जनाः सुमनसः संसारवासोद्भवम्
मौर्ख्यं वैषयिकं विहाय विमलं तस्मिन् कुरुध्वं मनः ॥ ८८ ॥

इति श्री बृहत्खरतरगच्छीय श्रीजिनराजसूरि सन्तानीय पाठक श्रीज्ञानविमल[illegible] श्रीवल्लभोपाध्याय[illegible] विरचिते श्रीमत्पातसाहि श्रीअकब्बर प्रदत्तयुगप्रधान-बिरुद[illegible] श्रीजिनचन्द्रसूरीश्वर पट्टालङ्कार पातिसाहि श्रीअकब्बरसमानंदप्रद[illegible] [illegible] श्रीजिनसिंहसूरीश्वर पट्टपूर्वाचलसहस्रकरानुकारि पातिसाहि श्रीजहांगीर प्रदत्त [illegible] श्रीजिनराजसूरीश्वर गुणवर्णनमये श्रीमद्विजयदेवमाहात्म्ये [illegible] श्रीजिनराजसूरि [illegible] द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः

अथ वासकुमारः सन् कुर्वन् गुरुपरीक्षणम् । लब्धवान् सद्गुरुं तं च बुद्धवान् गौतमाधिकम् ॥१॥

तद्यथा—अथाभूत्स पुरा वीरश्चतुर्विंशो जिनेश्वरः ।
शासने यस्य भूयांसो गच्छाः सन्त्युदितश्रियः ॥२॥

तेषु गच्छस्तपानाम प्रसिद्धोऽस्ति प्रसिद्धिमान् । विधानात्तपसः शश्वद्बुस्तपस्यविशेषतः ॥३॥

तत्र वीरजिनाधीशपट्टानुक्रमसंश्रितः । षट्पञ्चाशपदं सूरिरानन्दविमलोऽश्रयत् ॥४॥

आचारं शिथिलं त्यक्त्वा व्यधादाचारमुत्कटम् । श्राद्धलोकांश्च्युतान्धर्मादादधार च यः क्षणात् ॥

महेभ्यानां महेभ्यानां पुत्राणां च शतानि च । त्याजयित्वा कुटुम्बादि मोहं दीक्षयसिस्म च ॥

आनन्दविमलसूरेः सप्तपञ्चाश[त्]त्पदे । विजयदानसूरीन्द्रः सोभाद् भानुरिवोदये ॥ ७ ॥

श्रीस्तम्भतीर्थ-पत्तन-श्रीराजनगरादिषु । जिनबिम्बशताब्जानि प्रतिष्ठां योऽनयत् क्षणैः ॥८॥

४-६—सन्ततपागच्छे स आनन्दविमलसूरिः षट्पञ्चाशपदं षट्पञ्चाशत: पूरणं षट्पञ्चाशं तच्च तत्पदं च स्थानं षट्पञ्चाशपदं ५६ तत् अश्रयत् असेवत । कथंभूतः आनन्दविमलसूरिः? वीरजिनाधीशपट्टानुक्रमसंश्रितः वीरजिनाधीशात्पट्टानां योऽनुक्रमस्तं संश्रितो यः स तथा; द्वितीयाश्रितातीतेति द्वितीया तत्पुरुषः । स कः य आनन्दविमलसूरिः शिथिलं आचारं त्यक्त्वा उत्कटं आचारं सिद्धान्तप्रणीतगौतमादिगणधरस्थूलभद्रादिसाधुयथाविधिविहिततपःक्रियादि-समाचरणं व्यधात् । यः पुनः धर्माच्च्युतान् श्राद्धलोकान् क्षणात् आदधार उद्धृत-वान् । तथा चात्र वार्तालेशः—श्रीआनन्दविमलसूरिः क्रियाशिथिलबहुलसाधुलोकपरिवृतोऽपि संवेगरङ्गतरङ्गनिश्चलभावितचेताः श्रीविक्रमनृपाद् द्व्यशीत्यधिक पञ्चदशशत १५८२ वर्षे कतिचित्साधुपरिवृतः श्रीमदर्हत्प्रतिमाप्रतिषेध १ साधुजननिषेध २ प्रमुखोत्सूत्रप्ररूपणरूप-समुद्रे मुद्गतोऽनेकलोकान् विलोक्य करुणारसरसिकमानसः श्रीहेमविमलसूरिगुरुप्रवराज्ञया शिथिलाचारपरिहरणलक्षणक्रियोद्धरणप्रवहणेन तान् सत्काअरसमुद्धृतवान् । तथा महेभ्यानां महेभ्यपुत्राणां चानेकानि शतानि प्रतिबोध्य कुटुम्बधनधान्यादि मोहं प्रतिषेध्य च प्राव्राजितवान् इति श्लोकद्वयार्थः । एवं चास्यानेके अवदाताः सन्ति तांश्चात्र ग्रन्थविस्तरभिया नाकथयाम नचालिखाम ।

७-८—उदये उदयाचले नीराभावणे अस्य द्विकर्मरतान् । जिनबिम्बशताब्जानि प्रतिष्ठाभिरनुम-यत्र कर्म । क्षणैरुत्सवैः । श्रीराजनगरादिषु इत्यत्र आदिशब्दात् महीशानक-गन्धारबन्दिरादिग्राह्यम् ।

शत्रुञ्जयगिरेर्मुक्तिं पाण्मासिकीमकारयत् । यस्योपदेशसम्बुद्धो श्रुतपूर्वां रराज सः ॥९॥
सुरत्राणमहिमूंद-राजमान्यो महर्द्धिकः । गलराजाभिधो मन्त्री यात्रां चक्रे च चक्रिवत् ॥१०॥
तत्पट्टमुद्रिकाहीरो हीरविजयसूरिराट् । सोऽष्टपञ्चाशत्पट्टलक्ष्म्या लसति विष्णुवत् ॥ ११ ॥
यस्य सौभाग्यवैराग्यनिःस्पृहत्वादिसद्गुणैः । रञ्जितः स्तम्भतीर्थस्य व्ययं सङ्घो व्यरीरचत्
इतीति किं तदाह—
व्याख्यानादिषु कार्येषु कार्येषु वरसूरिभिः । कोटिमेकां सटङ्कानां तस्मिन्नव्यययत् स्थिते ॥
यस्य प्रतिपदं पादपद्मन्यासे सदाऽभवत् । सुवर्णटङ्करूप्यादि नाणकानां प्रमोचनम् ॥ १४ ॥
मुक्ताफलादिभिर्द्रव्यैर्बहुमूल्यैः शुभप्रदम् । रचनं स्वस्तिकानां च पुरस्सोभिनन्दिनि ।युग्मम्।

९-१०—स विजयदानसूरिः रराज । स कः ? यस्योपदेशसम्बुद्धो गलराजाभिधो मन्त्री अश्रुतपूर्वां पाण्मासिकीं शत्रुञ्जयगिरेर्मुक्तिं अकारयत् । च पुनः चक्रिवत् भरतचक्रिवत् यात्रां चक्रे । कथंभूतो गलराजभिधो मन्त्री ? सुरत्राण-महिमून्दराजमान्यः-सुरत्राणमहिमूंदः पातसाहिः प्रसन्नमनाः श्रीगलराजमन्त्रिणे पर्यस्तिकावाहनं 'नगदलमलिक' इति बिरुदं च दत्तवान् । पुन क० महर्धिकः । श्रीविजयदानसूरिप्रदत्तोपदेशप्रतिबुद्धः प्रबुद्धशत्रुञ्जयतीर्थयात्राफलः श्रीसुत्राण-माहिमून्दभूपतिमाननीयो मन्त्रिगलराजोऽपरनाम श्रीनगदलमलिकोऽश्रुतपूर्वां पाण्मासिकीं शत्रुञ्जयमुक्तिं कारयित्वा सर्वदेशनगरपुरग्रामादिषु कुङ्कुमपत्रिकाप्रेषणनिमन्त्रणानेकदेशनगर-ग्रामाद्यागतश्रीसङ्घसमेतः श्रीशत्रुञ्जययात्रां मुक्ताफलादिना श्रीशत्रुञ्जयवर्धापनं च श्रीभरत-चक्रवर्तीव चकारेति ।

११—स हीरविजयसूरिराट् अष्टपञ्चाशत्पट्टलक्ष्म्या लसति क्रीडते । किं वत् ? विष्णुवत् नारायण इव । स कः ? यत्तदोर्नित्याभिसम्बन्धात्—यः तत्पट्टमुद्रिकाहीरः श्रीविजय-दानसूरिपट्टरूपमुद्रिकायां हीरोपमः अधिकशोभाविधायित्वात् । श्रीहीरविजयसूरीणां विक्रमनृपात् त्र्यशीत्यधिके पञ्चदशशत वर्षे १५८३ मार्गशीर्षशुदि नवमीदिने प्राल्हादनपुरवास्तव्यः श्रीऊकेशज्ञातीय साह कुंरा भार्या नाथी गृहे जन्म, षण्णवत्यधिके पञ्चदशशत वर्षे १५९६ कार्तिकवदि द्वितीयादिने पत्तननगरे दीक्षा, सप्ताधिके षोडशतवर्षे १६०७ नारदपुर्यां श्रीऋषदेव प्रासादे पण्डितपदम्, अष्टाधिके षोडशशतवर्षे १६०८ माघ सुदि पञ्चमी दिने नारदपुर्यां श्री वरकाणकपार्श्वनाथसनाथे श्रीनेमिनाथप्रासादे वाचकपदम्, पञ्चादशाधिके षोडशशतवर्षे १६१५ सीरोहीनगरे सूरिपदं बभूवेति ।

१२-१३—स श्रीस्तम्भतीर्थवासी सङ्घः तस्मिन् श्रीहीरविजयसूरौ स्थिते एकां टङ्कानां कोटिं अव्ययत् प्रभावनादिभिर्द्रव्यव्ययं चकार । व्ययण् वित्तसमुत्सर्गे चुरादौ अदन्तः पर-स्मैपदी । केषु व्याख्यानादिषु कार्येषु कर्मसु, कथंभूतेषु वरसूरिभिः कार्येषु ।

बिम्बानि कुन्थुनाथस्य प्रत्यतिष्ठिप उत्सवात् । सीरोहीनगरे भाति स हीरविजयो गुरुः ॥
तथा नारदपुर्यां यः प्रत्यतिष्ठिपन्महोत्सवात् । जिनबिम्बान्यनेकानि स सूरिर्वर्तते भुवि ॥१७॥
श्रीस्तम्भतीर्थ-पत्तन-श्रीराजनगरादिषु । सहस्रशोऽर्हतां बिम्बप्रतिष्ठां सोऽस्ति यो व्यधात् ॥१८॥
लुङ्कामतपतिर्बुद्धः स लल्लौ मेघजी ऋषिः । दीक्षां नवीनां यस्याग्रे स सूरिर्भुवि भासते ॥१९॥
श्रीमत्यहम्मदावादनगरे नगरोत्तमे । ज्ञात्वा लुङ्कामतैश्वर्यमिति दुर्गतिकारणम् ॥२०॥
आधिपत्यं च दीक्षां च त्यक्त्वा लुङ्कामतस्य हि । साधुभिः पञ्चविंशत्या संयुतोऽर्हन्मतौ रतः ॥
सूरिसेवैकचित्तोऽदात् पातिसाहिरकब्बरः । स्ववादित्राण्यनेकानि यस्य दीक्षामहोत्सवे ॥२२॥
—चतुर्भिर्विशेषकम् ॥

ख्यातोऽवदात एतादृक् श्रुतपूर्वो न कस्यचित् । तमवाप यदा सूरिरासील्लोके तदाद्भुतम् ॥
यदीयोपशमादीनां गुणानां सत्यवर्णनाम् । प्रधानपुरुषैः मोक्तमशृणोदेकदा तदा ॥२४॥
कालेऽस्मिन्नीदृशः कः स्यादिति चित्ते चमत्कृतः । तदेत्यचिन्तयच्चित्ते पातिसाहिरकब्बरः ॥२५
इत्यचिन्तयत्-इतीति किं तदाह—　[—युग्मम् ।
समाकार्य निरीक्षेय परीक्षेय च तद्गुणान् । पृच्छेयं च नृपः कीदृक् ततो वन्देय भक्तितः ॥२६
सोऽभ्यपृच्छच्चदा चैवं प्रधानपुरुषान्प्रति । विचरत्यधुना कुत्र क्व च तिष्ठति तद्वद ॥ २७ ॥
ते प्राहुस्तद्वचःप्रीता इति प्राञ्जलयस्तदा । गन्धारबन्दिरे स्वामिन्, सूरिर्वसति सम्प्रति ॥२८॥
आकर्ण्यैत्सुभयाकर्णि जातरोमाञ्चिताङ्गरुक् । कदागच्छेत्कदा तं च देयौत्सुक्यपनस्त्विति ॥२९॥
फुरमानं तदाहूत्यै लेखयामि तदाद्भुतम् । स्वीयनामाङ्कितं सत्यमिति चित्ते व्यचिन्तयत् ॥३०॥
लेखयित्वा तदा दिव्यं सकाशात्स्वनियोगिनः । फुरमानं घनामानबहुमानमनोहितम् ॥३१॥
आज्ञाविधायिनो विज्ञान्स प्रेष्यान् प्रेषयत्तराम् । तेषां पाणौ च दत्त्वाशु प्रति गन्धारबन्दिरम्

१९-२०—स सूरिः श्रीहीरविजयसूरिर्भुवि भासते शोभते । स कः यस्य श्री हीरविजयसूरेरग्रे स मेघजी ऋषिर्नवीनां दीक्षां लल्लौ । कथंभूतो मेघजीऋषिः लुङ्कामतपतिः । पुन कथंभूतो मेघजीऋषिर्बुद्धः प्रतिबुद्धः अर्हत्प्रतिमापूजावन्दनादीनामाज्ञानात् । किं कृत्वा ? लुङ्कामतैश्वर्यं दुर्गतिकारणमिति ज्ञात्वा । क्व दीक्षां लल्लौ ! श्रीमति अहम्मदावादनगरे । कथंभूते नगरोत्तमे । पुनः किं कृत्वा हि निश्चितं लुङ्कामतस्य आधिपत्यं पुनर्दीक्षां त्यक्त्वा । पुनः कथं० मेघजीऋषिः ? पञ्चविंशत्या साधुभिः संयुतः । पुनः कथं० अर्हन्मतौ रतः अर्थात् अर्हत्प्रतिमाया अतिशयपूजनप्रणमनादीनङ्गीकरणे रतः । स कः ? यस्य मेघजीऋषेर्दीक्षा महोत्सवे अकब्बर पातिसाहिः अनेकानि स्ववादित्राण्यदात् । कथं० अकब्बरपातिसाहिः सूरिसेवैकचित्तः—सूरेः श्रीहीरविजयनाम्नो भट्टारकस्य सेवायां एकं चित्तं यस्य स तथा । मेघजी ऋषिरित्यत्र ऋतहस्वक इति प्रकृतिभावः ।

दीपज्योतिरिवान्योऽन्यं सम्मिलितपृथक् स्थितः। ज्योतिरूपं चिदानन्दं धरन् भायात्म ईश

—इति परमेश्वरस्वरूप

दयासंयमसंयुक्ते तपश्चरणतोऽचिरात्। साक्षात्पुण्यात्मभिः पुंभिः प्राप्यते परमेश्वरः॥ ६६

—इति परमेश्वरप्राप्ति

वाक्यैरित्यादिभिस्तत्त्वं प्रत्यबोध्यत तेन सः। मृष्टैर्मध्वाज्यैः स्पष्टैः क्षीराज्यघृताज्यैः॥६६

अमरत्सूरिः पायोदस्तद्धृदयसरस्तदा। गुरुधर्मेश्वरास्तित्वज्ञानाङ्गीकारवारिणा॥ ६७॥

तद्धृदयं सरोरम्यं सूरिमेव इवाभरत्। गुरुधर्मेश्वरास्तित्व-ज्ञानाङ्गीकृतिभी रसैः॥ ६८॥

अनेकच्छेकसूरीन्द्रसाधुश्रावकपक्षिभिः। सेव्यमानं तदा दीव्यत् तद्धर्मजललब्धये॥ ६९

आगरानगराद् यावदजमेरपुरं पथि। मनारान् कूपिकोपेतान् प्रतिक्रोशमकारयत्॥७०॥

स्वकीयमृगयारङ्गत्कलाकुशलतां जनान्। ज्ञापयितुं मृगानेकशृङ्गध्वजविराजितान्॥७१॥

पापीयानीदृशोऽनेकजीवहिंसापरायणः। अभवत्स पुरा नित्यं रूपभृत्पापमेव यत्॥ ७२॥

—त्रिभिर्विशेषकम्

हीरविजयसूरीन्द्रसद्गुरोर्योगतोऽधुना। दयादानानागरादिसङ्गरङ्गो बभूव सः॥ ७३॥

सद्गुरौ जिनधर्मे च प्रीतचेतास्ततोऽथ सः। इत्याह जगदाश्चर्यकारणं श्रीगुरुं प्रति॥ ७४

ग्रामान् द्रङ्गान् गजानश्वान्द्रव्याणि प्रचुराणि च। ददाम्यहं गृहाण त्वमिति, चानुगृहाण मो

गुरुराह ततो–भूप, त्यक्त्वैतान् सत आलये। भिक्षे वस्तूचितं युक्तो नैतेषां संग्रहो मम॥७

धन्योऽयं निःस्पृहः सर्वसांसारिकसुवस्तुषु। स्वोचितं वस्तु यल्लाति, स तदेति व्यचिन्तय

ततः पुनरिति स्वीये हृद्यालोचयति स्म सः। एतद्योग्यं गृहे मेऽस्ति पुस्तकं तद्ददाम्यहम्

विचार्यैवं तदा चित्ते कृत्वा च प्रचुराग्रहम्। ददौ श्रीगुरवे दिव्यं सिद्धान्तादिकपुस्तकम्

पुत्र मित्रे कलत्रे च धनस्वजनभूवने। ग्रामे द्रङ्गे गजादौ च निरीहाय महात्मने॥ ८०

—युग्मम्

६७—तद्धृदयं तस्य पातिसाहेरकब्बरस्य हृदयमेव सरस्तद्धृदयसरः तद्धृदयं अ
श्वरपातिसाहिहृदयं रसैः पानीयैरित्यर्थः।

७०-७२—स अकब्बरपातिसाहिः आगरानगरात् अजमेरनगरं यावत् मार्गे प्रतिक्रो
कूपिकोपेतान् मनारान् कारयित्वा स्वकीयाखेटककलाकौशल्यप्रकटनकृते प्रतिमनारं शत
हरिणविषाणरोपणकारणादिना प्रथमतो जन्तुं जातवधाघातसंजातचेतोरतिः स भूपतिवतिपा
र्थी अकब्बरपातिसाहिः हीरविजयसूरिसद्गुरोर्योगतः सम्बन्धात् अधुना दयादानानागरा
संगरंगो बभूव।

७५—अनुगृहाण अनुग्रहं कुरु प्रसादं कुरु इत्यर्थः।

स जगादादरात्पूर्णं गम्यानुग्रहदर्शने । नीरागोऽपि निरीहोऽपि धर्मलाभाय भूपते ॥८१॥
ततः सूरिः समादाय तदा तत्सत्यपुस्तकम् । आगरानगरेऽमुष्मन्सारस्कोशपालयात् ॥८२॥
स्थापितवरं धारणार्थकस्योपविश्य च । गोष्ठीं धर्मस्य सो कृत्वा मिथस्तुष्टप्रफुल्लगाः ॥ ८३॥
श्रीसाहिसदनुज्ञातस्ततः सूरिः समाययौ । उपाश्रये सहानेकलोकैर्वाद्यैरवरोत्सवैः ॥ ८४ ॥
तत्र गच्छे स्वके जाते सज्जनोन्नतिः । यस्यान्यस्यापि सदानन्दि सतां चातुरं महः ॥८५॥
तस्मिन्वर्षे चतुर्मासीकरणानन्तरं मुदा । आगरानगरात्सौरीपुरेऽगात् सूरिसत्तमः ॥८६॥
नेमिनाथजिनेन्द्रस्य यात्रया तत्र पुण्यया । साधुभार्द्धैः सहानेकैः पवित्रात्मा च सोऽभवत् ॥८७॥
तत्र श्रीनेमिनाथस्य प्रतिमाद्वितयं तदा । तत्कालनिर्मितश्रीमन्नेम्यर्हत्पादुकायुगम् ॥८८॥
सत्प्रतिष्ठय स सूरिश्च श्रेष्ठो ज्येष्ठप्रतिष्ठया । श्रीतद्विविधानन्तगीतमानादिकोत्सवैः ॥
आगरानगरे स्वर्णटङ्कादिव्ययसम्भवः । न कदापि पुरेदृग्जाताज्जन्ममहोत्सवात् ॥९०॥
श्रीमानसिंह-कल्याणमल्लकारितमुत्तम । स चिन्तामणिपार्श्वादेः प्रत्यस्थात्प्रतिमोच्चयम् ॥९१॥
साधुरामीचसन्तत्र सर्वार्थं सुवि विश्रुतः । जाग्रत्प्रभावं सर्वेषां मनोवाञ्छितदायकः ॥९२॥
ततः पुनरपि श्रीमत्फतेपुरपुरे वरे । समागत्यामील्लीला शाहिना सह सङ्गतः ॥९३॥
तस्मिन्नगरे यावदेकसमादरात् । धर्मवार्तां विधायैवं श्रीसाहिरित्यभाषत ॥९४॥
दृष्ट्वा त्वद्दर्शनाम्भोजमत्युत्फुल्लितमानसः । दूरदेशात् समाहूय जातोऽहं धर्मतत्परः ॥९५॥
यन्मदीयं मदर्थं न गृह्णासि किमपि प्रभो । सच्छकादाय तेन त्वमुचितं प्रार्थयाधुना ॥९६॥
सुकृतार्थः कृतार्थश्च भवानिव भवानि च । सर्वथा न वृथा सूरे यतस्वात्र यथा तथा ॥९७॥

८५–अत्र स्फातिरयं शब्दः दन्त्यपवर्गद्वितीयद्वितीयस्वरादिः स्फायैङ् वृद्धौ भ्वा-दिरात्मनेपदी । अस्मात् स्फायः स्फी वा इति सूत्रेण क्तयोः परतः स्फी इत्ययं दन्त्यपवर्गद्वितीय-चतुर्थस्वरोपेत आदेशो विकल्पेन भवेत् । स्त्रियां क्तिरिति क्तिप्रत्यये तु निषेधत्वेन द्वितीयस्वरादि-रेव । अथ स्फातिर्वृद्धौ इति हैमकोशे ।

९०-९१–ततः श्री सौरीपुरे श्री नेमिनाथतीर्थङ्करस्य यात्रा नवीनप्रतिमा–पादुकानां प्रतिष्ठाकरणात् । स श्री हीरविजयसूरिः श्रीचिन्तामणिपार्श्वादेः प्रतिमोच्चयं प्रतिमासमूहं प्रत्यस्थात् प्रत्यतिष्ठत इत्यर्थः। कस्मात् ? जन्ममहोत्सवात् । कथं भूतात् पुरा पूर्वं कदापि न एतादृग् जातात् तादृग् जात इतीदं सुपेति समासरवात् समासान्तमेकपदम् । कस्माज्जन्ममहोत्सवात् स्वर्णटङ्कादिव्ययतः स्वर्णटङ्कादिव्ययः तस्मात् ।

९७–हे सूरे यथा येन प्रकारेण भवानिव भवद्वत् सुकृतार्थः सुकृतं पुण्यमेवार्थः प्रयोजनं यस्य स तथा । चः समुच्चये कृतार्थः कृतः सर्वप्रयोजनो भवानि च तथा तेन प्रकारेण यतस्व यतनं कुरु । अत्र अस्मिन् वाक्ये अर्थो विशमी सर्वथा सर्वैः प्रकारैः वृथा न कुरु-

ततः सूरीश्वरश्चित्ते विचिन्त्यैवं तमब्रवीत् । सर्वविश्वम्भराधीशशिरश्चूडामणीयितम् ॥९८॥
विश्वम्भरायां सर्वेषु तव देशेषु सर्वदा । श्रीमत्पर्युषणापर्वाष्टाह्निकायां महीपते ॥९९॥
प्रवर्तनममारेश्च बन्दिलोकस्य मोचनम् । विधेहीति ततः साहिरिति चित्ते चमत्कृतः ॥१००॥
अहो निर्लोभतैतस्य शान्तता च दयालुता। अकिञ्चनोऽपि किञ्चिन्न मामयाचीद् धनादि यः॥
श्रीसाहिराह चत्वारो दिवसा अधिका मम । उपरिष्टात्त्वदुक्तस्य भवन्तु सुकृतार्थिणे ॥१०२॥
हृद्यं सद्य इति प्रोच्य साहिरुत्साहपूरितः । द्वादशदिवसामारि-फुरमानानि षट् तदा ॥१०३॥
काञ्चनरचनायुञ्जि स्वीयनामाङ्कितानि च । त्वरितं लेखयित्वैव प्रददौ सद्गुरोः करे ॥१०४॥
स्वीयसाधितदेशेषु सर्वेषु वसुधातले । श्रावणवदिपक्षस्य प्रारभ्य दशमीदिनात् ॥१०५॥
मासि भाद्रपदे शुक्लषष्ठीं यावन्न कश्चन । जीवव्यापादनं कुर्यादिति तेषु व्यलेखयत् ॥१०६॥
एषां व्यक्ति पुनश्चैवं शृण्वन्तु श्रावका इमाम् । पूर्वं गूर्जरदेशस्य, द्वितीयं मालवस्य हि ॥१०७॥
तृतीयमजमेरस्य, फुरमानं मनोहरम् । दिल्लीफत्तेपुराख्यस्य, देशस्य तु चतुर्थकम् ॥१०८॥
लाहोरमुलतानाख्यदेशस्य खलु पञ्चमम् । एतानि पञ्चदेशेषु, पञ्चसु प्रेषणाय हि ॥१०९॥
देशपञ्चकसम्बन्धि षष्ठं श्रेष्ठावलोकनम् । सकाशे सूरिराजस्य रक्षणाय चिराय हि ॥११०॥

—चतुर्भिः कलापकम् ।

तद्देशेषु पञ्चानां तेषां द्राक् प्रेपणेन च । अमारिपटहोद्घोषमेघोऽवर्षत्तरां वरः ॥१११॥
अक्षापमाननामातः कृपावल्ली महीतले । आर्यानार्यकुलोल्लासिमण्डपेऽवैधताचिरात् ॥
मोचनं बन्दिजन्तूनामङ्गीकृत्य गुरूदितम् । श्रीसाहिः सूरिराजस्य पार्श्वादुत्थाय हर्षतः ॥
सद्यानेकगव्यूतमिते डम्बरनामके । महासरसि गत्वात्मशस्तहस्तेन धर्मधीः ॥११४॥
देशान्तरीयसल्लोकढौकितान् पक्षिणो घनान्। कारागारस्थलोकांश्च मुमोच वचने दृढः॥११५॥

—त्रिभिर्विशेषकम् ।

एवं चानेकशः श्रीमत्साहेर्मिलनतो गुरुः । चैत्योपाश्रयरक्षायै फुरमानान्यकारयत् ॥११६॥
तेषां विशारनादासीत्प्रवचनप्रभावना । तदुत्पन्नश्च यो लाभः स्तोतुं शक्नोति तं च कः ॥११७॥
तस्मिन् क्षणे सदारङ्गश्राद्धसद्गुणरञ्जितः । मेडतीयो ददौ दानमीदृशं यस्य दर्शनात् ॥११८॥
द्विरद्वानतुरङ्गान् सम्पूर्तिमद्दस्तिनं नवम् । वस्त्रप्रभृतिवस्तूनि बहूनि बहुशो ददौ ॥११९॥
दिल्लीदेशे समस्तानां श्राद्धानां श्रद्धयान्वितः । द्विसेरप्रमितां खण्डलम्भनीं च गृहं प्रति ॥१२०॥
दिव्यावदाताः श्रीसूरेरीदृशाः सन्त्यनेकधा । ग्रन्थविस्तरभीत्या तान् नेहावोचं यतोऽलसः ॥

विशर्थः । अत्र चकारोऽव्ययं पादपूरणे, अव्ययानामनेकार्थत्वात् । यथा भवान् सुकृतार्थी पुण्यार्थी मां प्रतिबोध्य कृतार्थः तथा अहमपि भवदुचितं भवन्मार्गितं कृत्वा सुकृतार्थः ... अस्मीत्यभिप्रायः ।

चतुर्थः सर्गः

अथेष्टे जगतामिष्टः षट् एकोनषष्टके। विजयसेन आचार्यस्तस्य शिष्यशिरोमणिः ॥१॥
अस्य शृणुत वृत्तान्तमुत्पत्त्यादिसमुद्भवम् । यादृगस्ति श्रुतं तादृग् वक्तुमिच्छामि तन् किल॥२॥
अस्त्यस्मिन् भरतक्षेत्रे, नड्डुलाई पुरी वरा । (पाठान्तरेण–पुरी श्री नारदाभिधा)
तत्र कर्माभिधः श्रेष्ठी वसति व्यावहारिकः ॥ ३ ॥
तत्रान्येऽपि महीयांसो भूयांसो व्यवहारिणः । सन्ति तेष्वभवत्तस्य माहात्म्यमधिकं भुवि ॥
तत्रत्यश्च महीनाथस्तं सदाद्रियतेतराम् । वहन्ति च तदुक्ताज्ञां शिरस्युष्णीषवज्जनाः ॥५॥
दिव्या कोडिमदेव्याख्या देव्याख्यातास्तिरूपतः। तस्य पत्नी सपत्नीव लक्ष्म्या लक्ष्मीसमन्विता॥
कला रूपं गुणाः सर्वे यौवनं बहुसम्पदः । तं सदा सुखयामासुस्तस्या लाभेन पुत्रतः ॥७॥
जयसिंहाह्वयः पुत्रस्तयोरासीज्जयोदयः । जयाधिकशिरोरत्नं जयसिंहपराक्रमः ॥८॥
सर्वदा लोकसन्तापी बुधतेजोपहारकः । अस्थैर्यभाजनं नित्यं सूर्यस्तेन कथं समः ॥९॥
सदा दोषोदयः शुक्लपक्षः खण्डनान्वितः । कलङ्कालङ्कृतश्चैव सोमस्तेन कथं समः ॥१०॥
निर्जरैर्मथितो बद्धोऽम्भोमयो भूबहिष्कृतः । हृतरत्नः समुद्रोपि कथं तेन समो भवेत् ॥११॥
परोपकारहीनश्रीरदृश्यः कठिनाकृतिः । गुणैर्मेरुगिरिस्तेन सदृशो हि कथं भवेत् ॥१२॥
आदित्यादपि तेजस्वी यश्चन्द्रादपि सौम्यवान् । सागरादपि गम्भीरो मेरोरपि गुरुर्गुरुः ॥१३॥
सर्वदा पितृपादाब्जसेवाहेवाकमन्मनाः । सद्गुणी पद्मकरो यो राजहंस इवावभौ ॥ १४ ॥
—जयसिंहकुमारवर्णनम् ।

अस्मिन्नवसरे तस्य वैराग्यमभवद् हृदि । बाल्येऽपि वयसि स्पष्टं कस्माच्चिदपि कारणात् ॥
आधिव्याधिजरादुःखदौर्गत्यादिककारणम् । असार एष संसारो नात्राऽतः स्थितिर्ध्रुवा ॥
अस्मिन् येऽन्वभवन्पूर्वं निवसन्ति च ये पुनः । निवत्स्यन्ति च ये लोका दुःखिनो विषयैषिणः ॥
दौर्गत्यादिकभाजस्ते भविष्यन्ति भवे भवे । तं त्यजन्ति भविष्यन्ति ते सिद्धा उत देवताः ॥१८॥
अतो वृत्तानि चारित्रे तस्यैव वर उत्कटम् । लभ स्वर्गादिमौक्ष्यानि तस्यैव जगतीतले ॥१९॥

७—तं कर्माभिधम्, तस्याः कोडिमदेव्याः ।

८—जये सिंहस्य पराक्रम इव पराक्रमो यस्य स तथा । ९—तेन जयसिंहाभिधेन ।

१४—हेवाकपरः कर्मकादिति कर्तरि आत्मने पदे कथं च भाशिषि लोट् प्रथमपुरुषैक-वचने प्रयोगोऽयम्। हरि च ऐश्वर्ये दिवादिरात्मनेपदी, तत् धूरपन्थाने भ्वादिरिन्दिरवैव ऐश्वर्येऽर्थे दिवादित्वं आत्मने पदं वा विधीयते। अन्ये तु हरि च ऐश्वर्ये इति धात्वन्तरं दिवादिमाहुः। अन्ये तु भ्वादिरेव ऐश्वर्ये सन्तारे च आत्मने पदं वेच्छन्ति। लोट् प्रथमपुरुषैकवचनं द्वितीयोऽयम्

स स्वचित्ते विचिन्त्यैवं तदा पितरमब्रवीत् । प्रपद्ये चरणं ह्यमाज्ञया भवतः खलु ॥२०॥
पितापि तं तदा प्राह प्रव्रजिष्याम्यमा त्वया । संसारापारदुःखेभ्यो भृशमुद्विग्नमानसः ॥२१॥
अपृच्छयत तदा ताभ्यां मुदा कोडिमदेव्यपि । आवां परिव्रजिष्यावः पितृपुत्रौ तवाज्ञया ॥२२॥
सा प्राहात्र स्थिताहं किं करिष्यामि युवां विना । युवां यथा तथाहं च प्रव्रजिष्यामि सर्वथा ॥
आलोच्यैवं पिता माता पुत्रश्चेते त्रयो मिथः । दीक्षायै प्रयतात्मानः प्रायतन्त समन्ततः ॥२४॥
तद्यथा—अनेकवरयात्राभिः क्रियमाणाभिरादरात् । श्रावकैर्नागरैर्लोकैर्दिवसे दिवसेऽधिकैः ॥
वाद्यमानैः सदातोद्यैरनवद्यैर्वाद्यवादकैः । गीयमानैर्धनैर्गीतैः कान्ताभिश्च नृभिर्बुधैः ॥ २६ ॥
अश्वारूढः कदाचिच्च गजारूढः कदाचन । नृसिंहो जयसिंहोऽसौ तदा राजत राजवत् ॥२७॥
—त्रिभिर्विशेषकम् ।
शुभे मासे सिते पक्षे शोभनायां तिथौ तथा । नक्षत्रे च शुभे लग्ने शुभे योगे शुभे भृशम् ॥२८
हीरविजयसूरीन्द्रो जयसिंहमदीक्षत । पित्रा मात्रा च संयुक्तं महोत्सवपुरस्सरम् ॥ युग्मम्
तदा यत्सुकृतं जातमन्यच्छीलव्रतादिजम् । द्रव्यादिव्ययजातं च तद्वक्तुं शक्नुमो नहि ॥३०॥
हीरविजयसूरीन्द्रस्तन्नामेदं तदावदत् । जयकुशलकारित्वात् जयकुशलपण्डितः ॥३१॥
(विजयाविमलानन्दाद् विजयविमलः सुधीः—इति वा पाठः)
हीरविजयसूरीन्द्रो जयसिंहश्च सत्पिता । शिष्येण गुरुणानेन सर्वदाऽत्यसुखायत ॥३२॥
सद्योऽनवद्याः सद्विद्या अपठत्स चतुर्दश । अशिक्षत च तत्कालममलाः सकलाः कलाः ॥३३
सज्जनोदयसन्तोषी परःदुःखनिवारकः । सत्यसाहससंशोभी सोऽभवत् पादकर्मठः ॥३४॥
दानशीलः सुधीलालः सिद्धवज्जयसंश्रयः । स रराज विनीतो यो यौवनश्रीयुतस्तनः ॥३५
श्रीपण्डितपदं पूर्वं तस्मै तदनु चोत्सवात् । उपाध्यायपदं सोऽदात् सोऽभादेवं दिने दिने ॥
कियत्यपि गते काले गच्छभारधुरन्धरम् । ज्ञात्वात्मानं वरीयांसं सर्वशिष्येभ्य उत्तमम् ॥३७॥
सर्वकार्यंकरं दृष्ट्वाऽभ्यपिञ्चत् शुभे दिने । श्रीसूरिर्युवराज्यस्य आचार्यपदनामके ॥ युग्मम् ॥
श्रेष्ठी मूलाभिधोऽकार्षीत् श्रेष्ठसूरिपदोत्सवम् । न चेदर्शं सुराः कर्तुं सूरीणां मल्लिना जनाः ॥
यावन्तो मिलितास्तत्र जना नवनवा घनाः । तावन्तो भोजयचोत्र कुण्डलोभिर्यथेप्सितम् ॥

३२—हीरविजयसूरीन्द्रः शिष्येन जयसिंहनाम्ना करणभूतेन सर्वदा अत्यसुखायत अतिशयेन सुखं वेदयतिस्म । यन्ममायं शिष्यः पट्टयोग्यो भविष्यतीत्यतिसुखमवेदयदिति भावः । च: समुच्चये । जयसिंहः शिष्यः अनेन गुरुणा श्रीहीरविजयसूरीन्द्रेण करणभूतेन सर्वदा अत्यसुखायत अतिशयेन सुखं वेदयति स्म । धन्यो यदहं शिष्योऽभवामिति अतिसुखमवेदयदित्यभिप्रायः । कथंभूतो जयसिंहः सत्पिता प्रधानपितृकः पितृयुक्त इत्यर्थः । सुखादिभ्यः कर्तृवेदनायामिति क्यङ् ।

मादात्तेभ्यश्च सद्वर्ण्याः सौवर्णाङ्गुलिमुद्रिकाः । श्रीमत्यहम्मदावादे सर्वत्रावर्ततोत्सवः ॥४१॥
—त्रिभिर्विशेषकम् ॥

श्रीरङ्गे पत्तनद्रङ्गे यस्य पद्वन्दनोत्सवम् । अधिकं श्रावकोऽकार्षीत् पूर्वपदवन्दनोत्सवात् ॥४२।

एवं सूरिवरस्य हीरविजयाख्यस्य प्रशस्ये पदे,
दीप्तं तं विजयादिसेनसुगुरुं सर्वात्मना निर्मलम् ।
श्रीमान् वासकुमार एष उदयी पर्यक्षताचारतः,
श्रीश्रीवल्लभपाठकश्च यमिति व्याख्यातवान् सद्गुणैः ॥४३॥

इति श्री बृहत्खरतरगच्छीय श्रीजिनराजसूरि सन्तानीय पाठक श्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराजपातिसाहि श्रीअकब्बर प्रदत्तजगद्गुरु-विरुद-धारकभट्टारक श्रीहीरविजयसूरीश्वर पट्टालङ्कार पातिसाहि श्रीअकब्बरसभासंलब्ध दुर्वादिजय-वादभट्टारक श्रीविजयसेनसूरीश्वर पट्टपूर्वाचलसहस्रकरानुकारि पातिसाहि श्रीजहांगीर प्रदत्त-महातपाबिरुदधारि भट्टारक श्रीविजयदेवसूरीश्वर गुणवर्णनप्रबन्धे श्रीमद्विजयदेवमाहात्म्य-नाम्नि महाकाव्ये श्रीविजदेवसूरि गुरुवर्णनपरीक्षणो नाम चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः

अथ श्र्यहम्मदावादे स्थिरः श्रेष्ठी समाययौ । पुत्रस्य स्वस्य पत्न्याश्च दीक्षाग्राहणहेतवे ॥१॥
गृहे गृहिण एकस्य यावद्वसनभाटकम् । दत्त्वा तत्रावसद्वश्यः पुण्यात्मा पुरुषोत्तमः ॥२॥
अथारेभे ततः श्रेष्ठी दीक्षायाः सन्महोत्सवम् । श्रीमद्वासकुमाराख्य–पुत्रस्य स्वस्य च स्त्रियः॥

तद्यथा—व्यचित्रयद्विचित्राणि चित्राणि वरवर्णकैः ।
गृहभित्तीः सुविच्छित्तीः कविः काव्यततीरिव ॥ ४ ॥

गृहस्य माङ्गणं माभात् स्वतिकाञ्जादिमण्डनैः । मण्डितं पण्डितस्त्रीभिस्तदा चित्रितवस्तुवत् ॥
चन्द्रोदयचयो यत्र मतिस्थानं नियन्त्रितः । चन्द्रोदय इव मायो मनोहरन्मनोहरः ॥६॥
चद्रसुचैः कचित्तत्र स्थूलं स्थूलं व्यलीलसत् । शृङ्गारमिव रोदस्योः मालम्बनकसंयुतम् ॥७॥
यत्र हाजापटेलस्य मतोली चहुलालया । अस्ति, सन्ति हि यस्यां च सकला चहुलालयाः॥८॥
मण्डपं मण्डयामास दीक्षायास्तत्र सुन्दरम् । पञ्चवर्णमयैर्वस्त्रैश्चित्रकृद्भिर्विचित्रितैः ॥ युग्मम् ॥
सुखमल्ला बभुर्यत्र सुखमल्ला सुधा इव । वाणीवर्णविशेषाणां रचनाभिर्नृरञ्जकाः ॥ १० ॥
जरबाफादयः क्वापि विशेषा वाससामिमे । बभुर्नेत्रमिया यत्र नानाविच्छित्तिनिर्मिताः ॥११॥
आघाताः सूर्यचन्द्राद्याः ग्रहा इव सुविग्रहाः । तन्मिषात्तन्मुखं दृष्टं नानासंस्थानसंस्थिताः ॥
द्वारं तस्य विभाति स्म रम्भास्तम्भविशोभितम् । सुखानां कौतुकानां च संकेत इव रूपवान् ।
खं सुवं चान्तरायश्च विमानमिदमीदृशम् । द्यावाभूम्योर्विदूरस्थं पुंस्त्रीदेवादियुग् व्यभात् ॥
आदर्शी रचना यत्र कुत्रचित्प्रीतिकारिणी । तदा श्रेणिरभूत्पुंसां दृष्टान्तानां परस्परम् ।१५।
आदर्शी रचना यत्र कुत्रचित्सर्वतस्तदा । प्रतिबिम्बेन लोकानां वक्तीव किमु तद्गुणान् ।१६।
क्वाप्यत्र स्वस्तिकादीनि मौक्तिकैर्ग्रथितानि हि । मालम्बनकभास्वन्ति मोहयन्ति स्म मानवान् ॥
पण्डितानक्षराणीव लिखितानि खटीरसैः । मात्राबिन्दुमदीप्तानि मकटान्युज्ज्वलानि च ॥

—युग्मम् । इति दीक्षामण्डपवर्णनम् ॥

आकारयत्स आराममभिराममनिन्दितम् । पुत्रस्य वरयात्रायै नानाकृत्रिमहस्तकैः ॥ १९ ॥

११–अत्र विच्छित्तिः रचना विशेषः–कुत्रचित् जन्तुरूपाणि, कचित् पद्मानि, कचित् पुष्पाणि, कचित् सूर्यचन्द्रतारकाकारा इत्यादिलक्षणः।

१२–नानासंस्थानसंस्थिताः–नाना बहु प्रकारं संस्थानं रचना स्वस्वाकारस्वरूपा रचना तेन संस्थिताः समन्ततः स्थिता ये ते तथा । तन्मिषात् जरबाफादिमिषात् । तन्मुखं श्रीवासकुमारमुखम् ।

तत्राग्रे सहकारः प्राक् हकारेकारयुग् भवन् । लोकोक्तां सूनृतां वार्तां ज्ञात्वा निरचिनोदिति ॥
श्रीमान् वारकुमारोऽयं भविष्यजिपताश्वरः । सूरिः सूरिस्ततो भावी पूर्वजेभ्योऽधिकद्युतिः ॥
नीलकौशेयसंशोभिपत्रश्रेणिविराजिताः । यत्र रम्भा बभुः स्वर्गमूल्या इन्द्रध्वजा इव ॥ २२ ॥
फलिताः शाखिनो यत्र बहुधैवं विरेजिरे । कर्तारो दिव्यसस्यानि भर्तारः सर्वसम्पदः ॥२३॥
केतकी-यूथिका-जाति-जपा-कुन्दादिकांश्च यः । पृथग्रूपान् पृथग्वर्णान् पुष्पवृक्षानकारयत् ॥
एवं दीक्षाप्रसामग्रीक्रीडाश्चातोद्यजातयः । मोदकाद्यानि खाद्यानि निरपद्यन्त तद्गृहे ॥२५॥
सोऽक्षिपद् वर्णके पुत्रं शुभेऽह्नि कविवन्नृपम् । कौसुम्भवस्त्रसंयुक्तः भान्तर्मालिकवन्तदा ॥२६॥
सख्योऽभिगायतोल्लूलन् संवर्धयत मौक्तिकैः । श्रेष्ठिनः श्रीस्थिराकस्य पुत्रः परिव्रजत्ययम् ॥
आचख्युरिति गायन्त्यः काश्चित्काश्चित्सखीः प्रति ।

कार्याण्यन्यानि सन्त्यज्य त्वरध्वं तं प्रतीक्षितुम् ॥२८॥ युग्मम् ॥

चारुकर्पूरकस्तूरीकुङ्कुमादिविमिश्रितम् । स्फुरत्परिमलोपेतां शिष्टां कुरुत पिष्टिकाम् ॥२९॥
दीव्यगन्धोदकैरुष्णैः सम्यक् स्नपयत द्रुतम् । दृष्टिदोषाच्च रक्षार्थं यतध्वं द्वन्द्ववर्जिताः ॥३०॥
गन्धकारिस्ततस्तस्य फुल्लमालादिगर्भितम् । न्यबध्नन् मूर्ध्नि धम्मिल्लं वक्रं ग्रीवेव वाजिनः ॥
विलिप्तदीव्यदेहश्चीर्बभौ केशवमूर्तिवत् । कर्पूरागरुकस्तूरीमिश्रचन्दनकुङ्कुमैः ॥ ३२ ॥
स सर्वाङ्गेषु संयुक्तो मुक्ताभिः कान्तकान्तिभिः । बभौ चन्द्रार्कताराभिराकाश इव निर्मलः ॥
आनाभिलम्बितान् मुक्ताहारांस्तारान् स पर्यधात् । लावण्यनीरधेः पीनफेनबुद्बुदसन्निभान् ॥
चोलोष्णीषादिवस्त्राणि देवदूष्योपमानि च । पर्यधात्स ततः काये सौवर्णाभरणानि च ॥३५॥
अदीप्यत तदानीं स पुष्पितः फलितोऽपि च । विधाता वाञ्छितार्थानां कल्पवृक्ष इवाङ्गवान् ।
स वरो वरयात्रासु राजेव विरराज हि । ग्रहणैर्मुकुटोत्तंसैश्छत्रैश्च सह चामरैः ॥ ३७ ॥

२०—तत्र आरामे प्राक् पूर्वं सहकारः इति लोकोक्तां सूनृतां वार्तां ज्ञात्वा निरचिनोत् निश्चयं चकार । किं कुर्वन् सन् हकारेकारयुग् भवन् । हकारे ह इत्यक्षरे यः ईकारः चतुर्थस्वरः सहकारेकारः । तेन युनक्ति यः स हकारेकारयुग्, हकाराक्षरचतुर्थस्वरयुक्तो भवन् जायमानः सहीकार इत्यर्थः । इतीति किं तदाह—

२३—करणशीलाः कर्तारः भरणशीला भर्तारः—अत्र उभयत्र तृन् इति तच्छीलेऽर्थे तृन् प्रत्ययः। दिव्यसस्यानि संपदः इत्युभयत्र न लोकाव्ययनिष्ठाखलर्थतृनामिति षष्ठीनिषेधात् नपुंसकस्त्रीलिंगद्वितीयाबहुवचनम् ।

३५—चोलः आहण इति लोकाभाषाप्रसिद्धः । चुलपरिवेष्टने सौत्रः । चुल्यतेऽनेन चोलः आप्रपदीनं कञ्चुकं इति क्षीरस्वामिव्याख्यानात् । उष्णीषः पाघडी इतिभाषा । उष्णीषो मूर्द्धवेष्टनमिति हैमः ।

वाद्यान्यवादयन् केऽपि केऽप्यगायन् सुगायकाः । ननृतुर्नर्तकाः केऽपि केऽप्याख्यन् कथकाः कथाः ॥
नेजल्यानविमानस्थकरकाकारदम्भतः । तमीक्षितुमिवायाता ज्ञ-जीव-कविदेवताः ॥ ३९ ॥
यस्यैवं वरयात्रासु बभूवुः सन्महोत्सवाः ।
इन्द्रः स्तोतुं न यान् शक्तः तान् व्याख्यान्ति कथं बुधाः ॥४०॥ त्रिभिर्विशेषकम् ॥
अत्यद्भुतानि वासांसि देवदूष्योपमान्यथ । कुमारः पर्यधाद् वर्यस्तदा दीक्षामहोत्सवे ॥४१॥
मालम्बनकसंशोभिस्वर्णमाणिक्यनिर्मितम् । न्यबध्नान्मुकुटं भाले पर्यधाद् ग्रहणानि च ॥४२॥
शिबिकां स समारोहद् निर्मितामिव दैवतैः । जाग्रत्पुण्यवतां योग्यां वर्धमानकुमारवत् ॥४३॥
गायनैर्गीयमानेषु गीतेषु प्रीतमानसैः । वाद्येषु वाद्यमानेषु हर्षरातोद्यवादकैः ॥ ४४ ॥
विद्वद्भिर्वन्दिभिर्मोदात् स्तूयमानगुणोदयः । विज्ञातविविधानेकमङ्गलातोद्यसद्यशाः ॥ ४५ ॥
नीराजीरवदास्यस्त्रीगीयमानसुमङ्गलः । उत्तार्यमाणलवणः पार्श्वयोर्भगिनीजनैः ॥ ४६ ॥
श्रीमद्हाजापटेलस्य प्रतोल्यां बहुलौकसि । मण्डितं मण्डपं पूर्वं यत्र तत्र ततोऽभ्यगात् ॥
—चतुर्भिर्विशेषकम् ॥

मुकुटादीनि दिव्यानि ग्रहणानि स्वकायतः । स उत्तार्य प्रतोधारं कर्तुमापाङ्गुरोः पुरः ॥४८॥
विजयसेनसूरीन्द्रः कृत्वा नन्दिं सदाद्भुताम् । चतुर्भिः संयुतां देवैर्वेदीं वैवाहिकीमिव ॥४९॥
ततस्तं मातृसंयुक्तं दीक्षाकन्यां व्यवाहयत् । कारयित्वा तदा तस्यां चारत्रयं प्रदक्षिणाः ॥५०॥
रूप्याणि नालिकेराणि वस्त्रादीनि च लक्षशः । श्रीसङ्घोऽहम्मदावादे माढाल्लाकेऽभ्य उत्सवे ॥
षोडशस्य शतस्यास्मिन् त्रिचत्वारिंशवत्सरे । दशम्यां माघशुक्लस्य दीक्षाभूयस्य सोऽभवात् ॥
विद्याविजय इत्याख्यां तस्य सूरिस्तदाऽकरोत् । सद्विद्याविजयाश्रितत्वात् त्रिकालज्ञो गुरुर्यतः ॥

एवं वासकुमार एष जननीयुक्तः स उल्लासतः,
भागाजीत् विषयान् विहाय सकलान् सांसारिकान् सर्वदा ।
श्री श्रीवल्लभ एष पाठक इमं यस्यात्र दीक्षोत्सवं,
सर्वेषां श्रुतमात्रकर्णसुखदं सर्वैमियं व्याकरोत् ॥ ५४ ॥

इति श्री वल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराज पातिशाहि श्रीअकब्बरप्रदत्त जगद्गुरु विरुदधारक भट्टारक श्रीहीरविजयसूरीश्वर श्रीजहांगीर प्रदत्तमहातपाविरुदधारि-भट्टारक श्रीविजयदेवसूरीश्वर गुणवर्णनप्रबन्धे श्रीमद्विजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरि दीक्षोत्सववर्णनो नाम पञ्चमः सर्गः सम्पूर्णः ॥५॥ लिखितं मुनि सोमगणिना ॥

३९—करकाकारदम्भत इत्यत्र करकशब्दो घोटीपर्यायः । कर्दरी करकः घोल' कर्दरी च गलन्तिका—इति हलायुधः ।

४४—आतोद्यवादकैः बाजदार इति भाषाप्रसिद्धैः ।

५१—उत्सवे दीक्षामहोत्सवे ।

षष्ठः सर्गः

अथो विजयसेनाख्यो वर्याचार्योऽभ्यमन्यत । श्रीमान् वासकुमारोऽपि मियोऽन्यमुक्तनार्थताम् ॥
अधीयानं गुरोः पार्श्वेऽकुर्वाणं पर्युपासनाम् । आश्रवोऽयं विधेयोऽस्मित्यवादीत्तदा गुरुः ॥
गुरुस्तत्प्रभावेन दीप्यते वर्धते च सः । गुरुः शिष्यप्रभावेनैवमेवं चाप्यऽदीप्यते ॥ ३ ॥

तद्यथा—कियत्यपि गते काले, लेभे सूरिपदं ततः ।

निःसपत्नं स साम्राज्यमित्रोप्राऽग्राज्ञयाऽन्वितम् ॥ ४ ॥

विजयसेनसूरीन्द्र इति नामाऽभवद्भुवि । विख्यातं श्रीगुरुख्यातं सन्मुखात्पारमेश्वरात् ॥५॥
ततः कुर्वन् महीपीठे धर्मराज्यं विशेषतः । अधिकाधिकतेजास्स भवन् प्रावर्तताचिरात् ॥
श्रीमतोऽकब्बराख्यस्य पातिसाहेः सुसंसदि । षड्दर्शनानुसम्बन्धि वार्ता प्रावर्ततान्यदा ॥
तदा च कोविदः कश्चित् पातिसाहिं न्यवेदयत् । षड्दर्शनविद्वांसस्तिष्ठन्ति भवतोऽग्रतः ॥
हीरविजयसूरीन्द्रशिष्यः पट्टोऽस्ति वादिपः । विजयसेनसूरीन्द्रः स त्वत्तोऽन्यत्र तिष्ठति ॥९॥
मनुते स च नो गङ्गां रामं च परमेश्वरम् । इत्यादिभिर्वचोभिस्स तं चेति प्रत्यबोधयत्॥१०॥
पातिसाहिस्ततोऽत्यन्तं तमाह्वातुं समुत्सुकः । अलेखयत्तदाहूत्यै स्फुरन्मानं घनादरम् ॥११॥
स्वसेवककरे दत्वा स्फुरन्मानं तदा मुदा । त्वमानयमाहूयेत्यऽवदत् सेवकं हि सः ॥१२॥
स तदा शिरसि न्यस्य स्फुरन्मानं तदाज्ञया । प्रस्थाय राधनपुरे सूरेः पार्श्वं समाययौ ॥१३॥

—प्रस्थाय राजधन्याख्यपुरे पार्श्वे गुरोर्ययौ—इति पाठान्तरम् ॥

श्रीसूरीश्वरमानम्य तदालोकनतस्तदा । रोमाञ्चिततनुः प्रादात् स्फुरन्मानं स तत्करे ॥१४॥
श्रीसङ्घस्य समक्षं स स्फुरन्मानमवाचयत् । वाचं वाचं गुरोश्चित्तं सङ्घश्च सुमुदेतराम् ॥१५॥
सेवकं पातिसाहेश्च श्रीसङ्घो मोदयत्तराम् । जीवितार्हस्वदानाच्च मृष्टान्नादिकभोजनात् ॥१६॥
मातिष्ठत ततः सूरिः सुमुहूर्तं शुभे दिने । श्रीमन्तं सङ्घमापृच्छ्य सुधी-साधुसमन्वितः ॥१७॥

आद्यो नयविजयाख्यः १ श्रीमेघविजयो २ ऽपरः ।

श्रीमेरुविजयो ३ विद्वान्, श्रीनन्दिविजयः ४ कविः ॥१८॥

२—आश्रवो वचने स्थित इति कथनकारीत्यर्थः । विधेयो विनयग्राही इत्यमरः ।

८—श्रीगुरुणा श्रीहीरविजयसूरीन्द्रेण ख्यातं कथितं श्रीगुरुख्यातम् । कस्मात् सन्मुखात् प्रधानवदनात्, कथंभूतात् सन्मुखात्, अत एव पारमेश्वरात्—परमेश्वरस्य इदं पारमेश्वरं वदनमित्यण् । पारमेश्वरमिव पारमेश्वरं उत्प्रेक्ष्यते; परमेश्वरमुखमिवेत्यर्थः, तस्मात् ।

१३—राजधन्याख्यपुरे राधनपुरे इत्यर्थः ।

विद्याविनय ५ इत्यादि-श्रितैर्यत्रिनयोचितैः ।
महसा गुरु १-भूम २-श्रीररिव गौरेरितः सदा ॥१९॥ त्रिभिर्विशेषकम् ॥
ये ग्रामा ये च सद्ग्रहाम्नान् शिक्षन् धर्मधारया । अभ्रन् दुरितदुष्कालं मयोदं मापयन् जनान् ॥
श्रीसूरिनीरदो गर्जन् भाषानुक्रमतोऽधिराट् । श्रीमद्राजपुरद्रङ्गं पातिसाहिविराजितम् ॥२१॥
महतरायस्य आदेश्य मणस्य च ततो गुरुः । कृत्वा महोत्सवं दिव्यमुपाश्रये समानयत् ॥२२॥
अथाऽन्यदा पातिसाहिं दिने दिव्ये ततोऽमिलत् । श्रीसूरिर्भूरिसूरिश्रीजितान्यमतिवादिभिः ॥२३॥
विनयात् पातिसाहि-श्रीमदकब्बर आनमत् । तं तदा शिरसा भूपान् पश्यतः शस्यचेतसा ॥
अथाप्रच्छद् गुरुं धीमान् पातिसाहिरिदं तदा । षड्दर्शनानुसम्बन्धिधर्मनाम्नां सुधर्मधीः ॥
दर्शनानां तदा षण्णां विधिर्यत्र पृथक्पृथक् । तं विशेषितमुर्वीशे स धर्मं सत्यबोधयत् ॥२६॥
सर्वदर्शनसम्बन्धिधर्मं ज्ञात्वा पृथक्पृथक् । केनचिन्मेरितः साहिरपृच्छत् पुनरीदृशम् ॥२७॥
गुरो किं मनुषे न त्वं रामं गङ्गां च मातृकाम्? । सूरिः प्राह प्रभो मैवं मन्येऽहं तद् यथं सदा ॥
रामध्यानं सदा कुर्वे हृदि तद्ध्यानतत्परः । नाचरामि ध्रुवेनास्य ज्ञानहीनश्च कीरवत् ॥२९॥
राति सर्वं मनोऽभीष्टमिति रा वाञ्छितप्रदः । मध्नाति सर्वतः पापमिति मः पापनाशकः ॥३०॥
इत्यास्यदार्थत्वाद्द रामनाम स्मृतं बुधैः । तत्स्मरामि सदा स्वामिन् न स्मरामि कथं किल ।
—विस्मरामि न कर्हिचित्–इति पाठान्तरम् ॥३१॥ युग्मम् ॥
अपवित्रशरीरस्य रामध्यानं च चेतसि । अपवित्रे तथा मार्गे स्यात्सदा पापवृद्धये ॥ ३२ ॥
—इति रामनाम-ध्यानाङ्गीकारः ॥
अहो अङ्गमलाक्षेपो गङ्गायां क्रियते कथम् । गङ्गा तु मातृकोच्येत पूज्यते देववैव सा ॥३३॥
तस्यामङ्गमलक्षेपं स्नानात् कुर्यां न लोकवत् । पावित्र्यभृति मात्रङ्के कथं पुत्राङ्गसङ्गतिः ॥३५॥
—यतः पवित्रमात्रङ्के कथं पुत्राङ्गसंगतिः–इति पाठान्तरम् ॥
जलमेव तदङ्गं स्यान्माननीयं तदेव च । तद्विनोच्येत नो गङ्गा तद्विना न तदर्चनम् ॥३६॥

२३–भूरिः प्रचुरा सूरिषु पण्डितेषु भट्टारकेषु वा श्रीर्वैभवरचना १ शोभा २ भारती ३ लक्ष्मीः ४ त्रिवर्गसम्पत्तिः ५ मति ६ र्वा यस्य सः भूरिसूरिश्रीः । अथवा श्रीसूरिर्भूरिसूरिश्रीतिरस्कारकरः परः इति पाठान्तरम् । तत्राऽयमर्थः भूरिसूरीणां प्रचुरभट्टारकाणां प्रचुरपण्डितानां वा श्रीः पूर्वोक्तपदार्थी तस्यास्तिरस्कारं करोतीति भूरिसूरिश्रीतिरस्कारकरः परः प्रकृष्टः तदेव प्रकटयति ।

३६–तदेव जलमेव तद्विना जलेन विना गङ्गा नोच्येत न कथ्येत । तद् विना गङ्गां विना । न तदर्चनं न गङ्गां पूजा न गङ्गां माननमित्यर्थः ।

स्थित्वा तत्र सभाविभ्रः स भूयोगमनेहसम् । पुर्यां स्तम्भावतीनाम्न्यां सङ्घाहूतस्ततो गतः ॥
कृत्वा तत्र चतुर्मासीं भव्यनानामहोत्सवैः । समयापायातः सूरिः श्रीराजनगरे वरे ॥४९॥
नानाद्रव्यव्ययैर्दिव्यैर्जायमानैर्महोत्सवैः । चतुर्मासीं व्यधात्तत्र श्रीसूरिः सूरिशेखरः ॥५०॥
ततश्चाहम्मदावादोपपुरे श्रीशकन्दरे । श्रीसङ्घाग्रहतस्तस्थौ चतुर्मासीं गुरूत्तमः ॥५१॥
सत्यरत्याद्रुत्सवैस्तत्र शान्तिबिम्बं स सद्गुरुः। दीपिकान्वयविख्यात-लहुयाख्यश्राद्धकारितम् ॥
लाटापल्ल्यां समागच्छत् ततः सत्याप सोत्सवः । तत्रावसाय सूरीन्द्रश्चतुर्मासीं सुखाश्रितः ॥
अचिन्तयत् स्थितस्तत्र चेतसीत्येकदेहसम् । पदार्हाः सन्ति मे शिष्याः श्रीनन्दिविजयादयः ॥
पद्योग्येषु शिष्येषु श्रीनन्दिविजयादिषु । कः शिष्यो भविता ख्यातो गच्छभारधुरन्धरः ॥
विचिन्त्येति स्थितो ध्याने तपःकुर्वन्ननेकधा । त्रीन्मासान् यावदत्युग्रं सूरिरेकाग्रमानसः ॥५६॥
अधिष्ठाता तदेत्याचख्यत् सूरिमन्त्रस्य मन्त्रिणम् । प्रत्यक्षीभूय सूरीन्द्रं तपः साध्यं न किं यतः ॥
विद्याविजयनामायं शिष्यस्ते गच्छनायकः । भविता जगति ख्यातो विचारो नापरो गुरो ॥
श्रुत्वा श्रीसूरिमन्त्रस्याधिष्ठातुरिति सद्वचः । जाग्रत्प्रभावकं सूरिः सूरिमन्त्रं सदाचिदत् ॥५९॥
विद्याविजयनामानं शिष्यं श्रीगच्छनायकम् । भाविनं मनसि ज्ञात्वा श्रीसूरिर्मुमुदे हृदि ॥
प्रातिष्ठत ततः सूरिः साध्वाचारपरायणः । यतोऽवस्थानमेकत्र साधूनां युज्यते न हि ॥६१॥
ग्रामानुग्राममाचारात् विहरन् जिनवत्स्वयम् । सहर्षः समवासार्षीत् श्रीमदुन्नतपत्तने ॥६२॥
तत्रत्याः श्रावकाः सर्वेऽप्यकुर्वन्नुत्सवान् घनान् । दर्शं दर्शं मुनीशं तं वन्दं वन्दं दिने दिने ॥६३॥
सूरिः कृत्वा चतुर्मासीं तत्रान्यत्र ततोऽचलत् । पवित्रचरणन्यासैः सद्धरित्रीं पवित्रयन् ॥६४॥
द्रङ्गेष्वन्येषु द्रङ्गेषु न्यवसत्स विचक्षणः । अनेहसं च भूयांसं लोकान् धर्मांश्च कारयन् ॥६५॥

४८–तत्र पत्तनद्रङ्गे सभाविभ्रः सह भाविभ्रेण भद्रेण वर्तते यः स सभाविभ्रः । भाविभ्रशब्दो हैमोणादौ भद्रपर्यायः । ततः पत्तनद्रङ्गात् ।

४९–तत्र स्तम्भावती नाम्न्यां पुर्यां । ततः स्तम्भावती नाम्न्याः पुर्याः श्रीस्तंभतीर्थादित्यर्थः। श्रीराजनगरे श्रीमति अहम्मदावादे ।

५०–तत्र अहम्मदावादे । ५१–गुरूत्तमः श्रीविजयसेनसूरिः ।

५२–प्रत्यस्थात् प्रतिष्ठत् प्रतिष्ठामकरोदित्यर्थः । तत्र शकन्दरपुरे ।

५३–ततः शकन्दरपुरात् । तत्र लाटापल्ल्यां लाडोलपुरे इत्यपरनाम्नि ।

५७–इत्यपि किं वदाह । ५८–(उन्नतपत्तने) ऊनानगरे ।

६४–ततः ऊनानगरात् अन्यत्र नगरेषु देशेषु वा अचलत् ।

इत्थं वामकुमारचारुचरणाद्दानप्रभावोद्भवं
माहात्म्यं विजयादिसेनसुगुरोस्सत्यं जगद्विश्रुतम् ।
श्रीश्रीवल्लभपाठकः समपठत्तच्छ्रावकाः सन्ततं
श्रावंश्रावमनिन्दितं स्वहृदयेऽभ्यानन्दताऽनिन्दिताः ॥११२॥

इति श्रीवल्लभोपाध्याय विरचिते श्रीमत्तपागच्छाधिराज पातशाहि श्रीमदकब्बर प्रदत्त जगद्गुरु बिरुदधारक भ० श्रीहीरविजयसूरीश्वर० पातशाहि श्रीजिहांगीर प्रदत्त महातपा बिरुदधारि भट्टारक श्रीविजयदेवसूरीश्वर गुणवर्णन प्रबन्धे श्रीमद्विजयदेवमाहात्म्य नाम्नि महाकाव्ये श्रीविजयदेवसूरि दीक्षाग्रहणमाशोद्भव श्रीविजयसेनसूरि माहात्म्यवर्णनो नाम षष्ठः सर्गः ॥६॥

११२—भो श्रावकाः ! तत् विजयादिसेनसुगुरोः श्रीविजयसेनसूरीश्वरस्य माहात्म्यं सन्ततं सदा श्रावं श्रावं श्रुत्वा श्रुत्वा स्वहृदये अभ्यानन्दत । कथंभूतं इत्थं अनेन प्रकारेण श्रीमदकब्बर पातिसाहि परिषद्वादविधानपराजितानन्तप्रतिवादिवृन्दादिलक्षणेन वामकुमार चारुचरणाद्दानप्रभावोद्भवम् । पुनः कथंभूतं ? सत्यं । पुनः कथंभूतं ? जगद्विश्रुतम् । तदिति किं ? यन्माहात्म्यं श्रीश्रीवल्लभपाठकः समपठत् अकथयत् ।

सप्तमः सर्गः

अथाससाद नैपुण्यं पुण्यं पुण्यवतां सताम् । सयौवनमिव श्रेयः स यौवनवयश्च सत् ॥१॥
सिद्धान्तानां समस्तानां तपोभेदविधानतः । साङ्गे प्रवचनेऽधीती सोऽभवत् क्रमपाठतः ॥२॥
दर्शं दर्शं ततः सूरिः क्षणयुक्तः प्रतिक्षणम् । विद्याविजयनामायं गणिरित्यब्रवीद् गुरुः ॥३॥
षोडशस्य शतस्याऽस्मिन् पञ्चपञ्चाशवत्सरे । श्रीमत्यहम्मदावादोपपुरे श्रीशकुन्दरे ॥४॥
कारितायाः प्रतिष्ठाया उत्सवे भूरिरैव्यये । श्राद्धेन लहुआकेन स्ववंशाम्भोजभास्वता ॥५॥
प्रशस्यचेताः श्रीसूरिर्भूरिसूरिद्विपोपमः । पण्डितपदमानन्दि तस्मै पुण्यात्मने ददौ ॥६॥
मार्गशीर्षे सिते पक्षे प्रकृष्टे पञ्चमीदिने । देशदेशसमाहूतजनवृन्दविराजिते ॥७॥

—चतुर्भिः कलापकम् ॥

अथास्ति भरतक्षेत्रे स्तम्भतीर्थाभिधं पुरम् । यत्सुखं वर्तते तत्र न तत्स्वर्गे कदापि हि ॥८॥
यत्र श्रीपार्श्वनाथस्य महिमा महिमाऽवति । आवतीव हियं द्रष्टुं वार्धिर्वेलाच्छलात्किल ॥९॥
यत्र पार्श्वजिनं नित्यं नौतीवान्त्रहमम्बुधिः । वेलाच्छलेन सद्रत्नाक्षतान् मुञ्चन् पुरान्तिके ॥
यत्र सन्ति सतां सन्ति गृहाणि व्यवहारिणाम् । विमानैः स्पर्धमानानि मनोरमतयोच्चकैः ॥

निवसन्ति च ये तत्र द्रव्याढ्या व्यवहारिणः ।
दातृत्वसद्गुणाधिक्यात् सुरेभ्यो भागिनोऽधिकाः ॥१२॥ युग्मम् ॥

व्रतधारी सदाचारी ब्रह्मचारीश्वरः परः । परन्तपतिरस्कारी श्रेयस्कारी सदा नृणाम् ॥१३॥

धर्मकारी गुणाधारी प्रीतिकारी नरोत्तरः ।
व्यवहारीश्वरस्तत्र श्रीमल्लो नाम वर्तते ॥१४॥ युग्मम् ॥

१—स विद्याविजयः अथ पुण्यवतां सतां मध्ये पुण्यं अत्यद्भुतत्वात् अनिन्दनीयत्वाच्च च पवित्रं नैपुण्यं निपुणभावं आससाद प्राप्तवान्। कथंभूतं नैपुण्यं ? श्रेयः अतिशयेन प्रशस्यम् । पुनः कथंभूतं उत्प्रेक्ष्यते—सयौवनमिव सह यौवनेन वर्तते यत्तत् सयौवनं; तत् सयौवनं वदिव; यादृशं यौवनवयोयुतं शरीरं श्रेयः स्यात् । तथा नैपुण्यमपि अतिविशिष्टत्वात् अध्ययनाध्यापनादिषु सर्वकर्मसु जागरूकस्फूर्तिमत्त्वाच्च यौवनयुक्ततुल्यमित्यर्थः । यौवने हि सर्वं अप्रशस्यमपि प्रशस्यतरं भवति तर्हि प्रशस्तस्य किं वक्तव्यं, नैपुण्यस्यात्याधिक्यात् अत्यद्भुतत्वात् च । यौवनयुतेन औपम्यं केवलं नैपुण्यमेव प्राप नान्यत्किमपीत्याह—च पुनः यौवनवयः आससाद । कथंभूतं यौवनवयः सत् प्रधानम् ।

९—प्राङ् आवतीति क्रियापदं आङ् पूर्वकं। सामस्त्येन पालनार्थे महिशब्दोऽत्र इकारान्त औणादिकः । द्वितीयं आवतीति क्रियापदं गत्यर्थस्यापि अवधातोराङ् पूर्वकत्वात् आगमनार्थमवसेयम् ।

निश्चला बहुला लक्ष्मीरुल्लासं मल्लते कुले । नाम जल्पन्ति जल्पाकाः श्रीमल्ल इति सार्थकम्॥
भ्रातृव्यस्तस्य वा भाति सोमः सोमसमाह्वया । सोमवत् सर्वलोकानामभिप्रेतः प्रियंवदः॥

सोमो नाम जगज्ज्योतिः समरात्रिदिवद्युतिः ।
अन्यो रात्रिद्युतिः सोमः कियांस्तस्याग्रतोऽस्ति ॥१७॥

अथैतस्यान्यदा चाग्रे भक्त्यैकाग्रश्रुतिश्रुतेः । लोकोक्ता लोकवार्तेति कैश्चिदीच्यत सज्जनैः॥१८॥
विजयसेनसूरीन्द्रस्त्वशिष्यमभिषेक्ष्यति । विद्याविजयनामानं विद्याविजयमाननात् ॥१९॥
श्रुत्वा स ईदृशं वाक्यं विवेकी धर्मकर्मसु । वाञ्छन् नवनवं धर्मं हृद्यविन्दत्तदेदृशम् ॥२०॥
एतत्पट्टाभिषेकस्य महोत्सवमहोत्सवम् । करवाणि तदाऽभाणि तेनेति च तदा जनाः ॥२१॥

लक्ष्मीरनर्गला लीलां कुरुते मम वेश्मनि ।
युज्यतेऽस्याः कृतार्थत्वमस्मिन्नुत्सवकर्मणि ॥२१॥—पाठान्तरम्

—इति व्यज्ञपयत्सङ्घं विनयात्स महर्द्धिकम् । करवाण्याज्ञयावोऽहमेतत्पट्टमहोत्सवम् ॥२२॥

१५—मलि मल्लिधारणे भ्वादिरात्मनेपदी । जल्पाकाः पण्डिताः ।

१६—तस्य श्रीमल्लस्य भ्रातृव्यः सामः सोमनामा सोमसमाह्वया चन्द्रोज्ज्वलयशसाता-भाति आतिशयेन शोभते । यशः कीर्तिसमाज्ञा चेत्यमरः । सोमवत् चन्द्रवत् सर्वलोकानामभिप्रेतः।

१८—भक्त्या एकाग्रयोः श्रुत्योः कर्णयोः श्रुतिः श्रवणं यस्य तस्य भक्त्यैकाग्रश्रुतिश्रुतेः। यदत्र समासान्तमेकपदं तर्हि इको यणचीति यणि एकादशस्वरमध्य एव पाठः । अथ च भक्त्येति तृतीयान्तं पदं पृथक् तदा वृद्धिरेचीति वृद्धौ द्वादशस्वरमध्य एव पाठः । इतीति किं वदाद ।

१९—विद्याविजयाभ्यां माननं विद्याविजयमाननं तस्माद् हेतोः । अथवा विद्या च विजयश्च माननं चेति त्रिभिः समाहारे एकवद्भावे च विद्याविजयमाननं तस्माद् हेतोः । अथवा विद्याविजयमाननमिति पाठः । तदायमर्थः—कथंभूतं विद्याविजयनामानं विद्याविजयाभ्यां कारणाभ्यां माननं सर्वलोके यस्य स तथा तं । अथवा विद्याभिश्चतुर्दशसंख्याभिः शिक्षा कल्पो व्याकरणमित्यादिकाभिर्यो विजयस्तेन कारणेन माननं यस्य स तथा तम् ।

२०—विद विचारणे रुधादिः परस्मैपदी ।

२१—तदा तस्मिन् काले श्रीविजयसेनसूरिः विद्याविजयनामानं स्वशिष्यमभिषेक्ष्यति इति भवनकाले । तेन श्रीमल्लेन जनाः अर्थात् श्रावकलोका इति अभाणि इतीति किं एतत्पट्टाभिषेकस्य विद्याविजयपट्टाभिषेकस्य महोत्सवमहोत्सवं करवाणि महान् उत्सवो यस्मिन् यस्माद् वा दर्शनात्लोकानां स महोत्सवः महांश्चासावुत्सवश्च महोत्सवः महोत्सवश्चासौ महोत्सवश्च महोत्सवमहोत्सवस्तम् ।

श्रीसङ्घोऽपि तदाऽवादीदाश्रवो भवतोऽस्त्ययम् । मा ममाद्य हृदानन्द सद्यः श्रीमङ्ग नं कुरु ॥
ततः श्रीमङ्ग आनन्दाद्यदानीं मोदमेदुरः । श्रीसङ्घस्य समक्षं साङ्गू इति पत्रे व्यलेखयत् ॥२४॥
स्वस्ति श्रीदेवमादीव्य सर्वाभीष्टार्थदायकम् । श्रीमत्यहम्मदावादपुरं मद्मर्भरीवरं ॥२५॥
विजयसेनसूरिः स जिनशासनभूषणम् । राजते यस्तपः कुर्वन् हन्ति पातकदूषणम् ॥२६॥
त्वरितं दुरितं हन्ति नामोच्चारोऽपि ते कृतः । किं स्तुमस्त्वत्पदाम्भोजवन्दनापूजने गुरो ॥
तत्र स्युः सम्पदः सद्यो निरवद्या निरापदः । यत्र त्वच्चरणन्यासः किं स्तुमस्त्वत्पदस्थितिम् ॥
एवं सूरीश्वरं स्तुत्वा वन्दते च वदत्यदः । स्तम्भतीर्थस्थितः श्राद्धः श्रीमङ्गस्सङ्घसंयुतः ॥२९॥
मयोदं चाभिनन्दामि भवत्पादप्रसादतः । इच्छामि च भवत्कायकुशलं कुशलप्रदम् ॥३०॥
पूज्यराज पदाम्भोजमकरन्दस्त्वदीयकः । मदीयनेत्ररोलम्बं पुष्णात्वागमोत्सवात् ॥३१॥
भूयांसः श्रावकाः सन्ति पदोत्सवविधायकाः । परमस्योत्सवं कर्तुं चिकीर्षामि गुरूत्तम ॥३२॥
श्रीपूज्यात इहागच्छ सङ्घमापृच्छ्य सर्वतः । पिपर्मि परमं मत्र सामरं हि मनोरथम् ॥३३॥
पत्रमीदृक्समालिख्य श्रीगुरुचित्तमादरात् । अलिखत्स पुनः पत्रं श्रीसङ्घोचितमादरात् ॥३४॥
तद्यथा–स्वस्ति श्रीजिनमानम्य, रम्यधर्मपरायणम् । श्रीमदहम्मदावादपुरवासिमहाजनम् ॥
श्रीमङ्गः स्तम्भतीर्थस्थो ज्योकू करोति करोति च । विज्ञप्तिं विनयेनेति विनयी विनयीश्वरम् ॥
विजयसेनसूरीन्द्रा विद्याविजयनामकम् । युवराजपदे स्वीये धर्म्ये न्यसति सम्प्रति ॥३७॥
कर्तुं तस्योत्सवं श्रीमत्सङ्घादेशेन भक्तितः । वाञ्छामीति ततः सङ्घो मुमनादिह सङ्गमम् ॥३८॥
इह श्रीस्तम्भतीर्थे–
विभर्तु परमं प्रेम श्रीसङ्घो मयि सेवके । पिपर्तु च जनाभीष्टमिमं मम मनोरथम् ॥३९॥
इति पत्रं समालिख्य श्रीसङ्घोचितमद्भुतम् । आदयन्नैवकं स्वीयं श्रीमङ्गः श्रावकाग्रणीः ॥४०॥

२३–अयं श्रीसङ्घो भवताम् आश्रवः कथनकारी अस्ति। आश्रवो वचनेऽस्थित इति हैमः।

२५–भर्मरीशब्द औणादिकः स्त्रीपर्यायः। तस्या विद्यमानया प्रतापया वा स्वादीयार्थे- त्वात्। भर्मर्यो स्त्रियो वरंवरत् तद्भर्मरीवरं तदिदम्।

३६–ज्योक् इति काकभूषाविषयबोः। ज्योग् जीवाम, ज्योक् कृष्ण सुमाने नद। विनयी विनयवान्। कथंभूतं महाजनं? विनयीश्वरं विनयवतां नायकं, यद्वा विनयी विनयवान् च असावीश्वरश्च तथाभूत इति कर्मधारये विनयीश्वरं। अनेन श्रीमदहम्मदावादवासिमहाजनस्य विनयोपेतत्वं महर्द्धिकत्वं च दर्शितम्। इतीति कि. १ इत्यादि.

४०–श्रीसङ्घ इदं पत्रमभिवीक्ष्योत्सवकरणमनुमत्य मम मनोरथं पिपर्तु पूरयतु। कथंभूतं इदं मनोरथं जनाभीष्टं जनानां अर्थात् श्रीमदहम्मदावादवासिमहाजनानां [illegible] अनेन [illegible]

पत्रं गुरोश्च सङ्घस्य सेवकस्य करे ददौ । अवादीच्च तदा मोदात् श्रीमल्ल इति वाचिकम् ॥४१॥
वन्दनां श्रीगुरोर्भूया देयाः पत्रं करे ततः । ज्योकूकारं सर्वसंघस्य पृच्छेश्च कुशलं तथा ॥४२॥
आह्वयत्यात्र भो स्वामिन् श्रीमल्लः सङ्घसंयुतः । त्वदीयागमने तस्य मन आनन्दमाप्स्यति ॥
इत्युदित्वा गुरुं नत्वा भक्त्या परमया तथा । श्रीसङ्घस्य करे पत्रं दध्याज्ज्याकृत्य कृत्यवित् ॥
इति विज्ञपयत्येष श्रीमल्लः सङ्घसेवकः । श्रीमदहम्मदावादसङ्घं सङ्घमिव श्रियाम् ॥४५॥
विजयसेनसूरीन्द्रं मुञ्च श्रीस्तम्भतीर्थके । स्वशिष्यमभिषेक्तारं विद्याविजयनामकम् ॥४६॥
इत्युक्त्वा चालयत्सद्यः स स्वसेवकमाशुगम् । सोऽप्यचालीत्तदोत्तालः शीघ्रकृद् यत्पतिप्रियः ॥
सम्प्रापाहम्मदावादपुरं स त्वरितं चलन् । श्रीपूज्यराजपादाब्जमवन्दत च भक्तितः ॥४८॥
ददौ पत्रं तदा हस्ते सशस्ते श्रीगुरोर्मुदा । स स्वयं वाचयामास सुप्रसन्नमना हि तत् ॥४९॥
मददौ सङ्घपत्रं च सङ्घपाणौ सदक्षिणः । सङ्घेनापि तदाऽवाचि श्रीमता तत् शुभात्मना ॥५०॥
संभूय श्रीगुरुः सङ्घ उभौ विमृशतुस्तदा । किं कर्तव्यमिति स्पष्टं ब्रूतेति मिथ ऊचतुः ॥५१॥
पूज्यं व्यज्ञपयत् सङ्घः स्तम्भतीर्थं व्रज प्रभो । वाञ्छितं कुरु तस्याशु यल्लोकः स्वेष्टसिद्धिदृग् ॥
शुभं मुहूर्तमालोक्य श्रीसङ्घानुज्ञया तदा । विजयसेनसूरीन्द्रः स्तम्भतीर्थमचीचलत् ॥५३॥
स्तंभतीर्थपुरं प्राप्नोत् क्रमेण विहरन् गुरुः । श्रीमल्लं सेवकोऽवादीदिति गत्वाऽग्रतस्ततः ॥५४॥

स्वचाभिधाने अविरागो दर्शितः । मनोरथपूरणेन च मयि सेवके परमं प्रेम बिभर्तु धरतु ।

४१—सन्देशवाक् तु वाचिकं इति हैमः । सन्देसओ इति भाषा । इतीति किं तदाह—

४२—अत्र भूयाः देयाः इति च क्रियापदद्वयं पूर्वार्धस्थितं उत्तरार्धेऽपि योज्यं । पृच्छेश्च कुशलं तथा—इति पदं गुरोः सर्वसङ्घस्य इत्युभयत्रापि योज्यम् ।

४४—भो वदेः भो इति सम्बोधनपदं तेन भो सेवक वदेः कथयेः । किं वदे इत्याह ।

४५—श्रीभिर्मदो हर्षो यस्य स श्रीमदः । यद्वा श्रीणां मदो हर्षो अविनाशित्वात् यस्मिन् सः श्रीमदः । अहम्मदावादस्य सङ्घः अहम्मदावादसङ्घः अथवा अहम्मदावादवासीः सङ्घः अहम्मदावादसङ्घःमध्यपदलोपी समासः । श्रीमदश्चासावहम्मदावादसङ्घश्च इति द्वाभ्यां कर्मधारये श्रीमदहम्मदावादसङ्घस्तं । कथं भूतं । उत्प्रेक्ष्यते श्रियां सम्पदां सङ्घमिव समूहमिव ।

४७—सः श्रीमल्लः । पतिप्रियः स्वामिप्रियः ।

५२—यस्य श्रीमल्लस्य स्वेष्ट सिद्धया स्वत्राञ्छितनिष्पत्त्या तुष्यतीति स्वेष्टसिद्धितुट् । यदि पूज्यः स्तम्भतीर्थे न यास्यति तर्हि श्रीमल्लः श्रावको रोषं करिष्यति । परमहोत्सवाभिधानं विना च तद्वाञ्छितं न सेत्स्यतीति अतोऽवश्यं श्रीपूज्येन स्तम्भतीर्थे गन्तव्यं परमहोत्सवाभिधानकृता तन्मनोरथसिद्धिश्च कर्तव्येति चतुर्थपद्याभिप्रायः ।

स्तम्भतीर्थपुराभ्यर्णे समायासीद्गुरुर्गुरुः । भवदाहूत आहूतसम्पन्निचयनिश्चयः ॥५५॥
पर्यस्तदागमाख्यानं मतिसर्णं क्षणान्वितः । श्रुत्वा तदागमं चित्ते सोऽतुष्यत् सेवकोदितम् ॥
श्रीमल्लः श्रावकोऽभ्यायान्महाजनसमन्वितः । स्तम्भतीर्थान्तरा नेतुं वन्दितुं चातिहर्षतः ॥५७॥
सूरेरन्तिकमभ्येत्य प्राणमत्तत्पदाम्बुजम् । सत्रिःप्रदक्षिणीकृत्य रूप्यनीराजनां व्यधात् ॥
धाप्यमानघनातोद्यैर्गीयमानगुणानकैः । नृत्यन्नर्तकसंघातैः पश्यच्छस्यजनव्रजैः ॥५९॥
स्तम्भतीर्थपुरस्यान्तरुपाश्रयप्रवेशनम् । उत्सवैः श्रीगुरुः प्राप ततः श्रीमल्लनिर्मितैः ॥६०॥
इति धर्माशिषं पूज्यः सहृत्सन्तोषपोषिकाम् । सुधासदृशया वाण्या सद्राम समुपादिशत् ॥
धर्मो यो मङ्गलं कुर्याद्दानशीलाद्यनेकधा । तनौ धने तनूजादिकुटुम्बे भविनः सदा ॥६२॥
धर्माशिषमिमां श्रुत्वा श्रावकाः प्रीतचेतसः । रूप्यकैर्नालिकेरैश्च चक्रुर्लम्भनिकां मिथः ॥६३॥
अथ मण्डपमुत्कृष्टमिष्टं मण्डयति स्म सः । नेत्राणां प्रथमो न्दणामुत्सवो दर्शनोचितः ॥६४॥
तत्र वराहृचिर्भित्तिर्हृद्याऽविज्ञातसन्धिका । विचित्रैश्चित्रिता चित्रैर्नैनाहकृतपूर्विणी ॥ ६५ ॥
कुत्रचित्तत्र चित्राणि द्वन्द्वानि विविधानि हि । नानुस्थानमवाप्स्यामः मार्गयन्ति स्थितानि किम्॥
कुत्रचित्तत्र पद्मानि नराः क्रीडन्त्विताीच्छया । धम्रुर्वा क्वापि पुष्पाणि देवानर्चन्विनीच्छया ॥

५५—आहूतः आकारितः । सम्पदां निचयः समूहः स एव तस्य वा निश्चयो येन सः । आहूतसम्पन्निचयनिश्चयः । अथवा आहूतानां धातूनामनेकार्थत्वात् सम्पन्नानां सम्पदां निचयस्य समूहस्य निश्चय इव आहूतसम्पन्निचयनिश्चयः । गुरुविशेषणमेतत् ।

५८—रूप्याणां रूपकानां रूपइया इति लोकभाषाप्रसिद्धानां नीराजना आरती निर्वर्णां इति भाषाप्रसिद्धा रूप्यनीराजना ताम् ।

६०—तत श्रीगुरुः स्तम्भतीर्थपुरस्यान्तर्मध्ये उपाश्रयप्रवेशनं प्रापदैरुत्सवैः कि० श्रीमल्लनिर्मितैः श्रीमल्लनाम्ना श्रावकेण कृतैः । शेषाणि चत्वारि विशेषणानि स्पष्टानि । गीतं गानं गेयं गीतिरित्यभिधानचिन्तामणिः ।

६५—तत्र मण्डपे पूर्वं कृता केनेति कृतपूर्विणी । सुप्सुपेति समासे सपूर्वाच्चेति निः कत्रभ्यो ङीप् इति ङीप् ।

६६—द्वन्द्वं स्त्री पुंसयो । अनुपमाम् ।

६७—तत्र मण्डपभूमौ कुत्रचित् पद्मानि कमलानि बभुः शुशुभिरे । यदा नराः क्रीडन्तु इतीच्छया इति वाञ्छया बभुर्वा शुशुभिरे इव । कोऽपि अपि कस्मिन्नपि कुत्रचिदपि क्रीडां कर्तुं यावता वाञ्छेत्-दिना भान्ति । अस्मान् ज्ञात्वा च अन्येऽपि केवलं क्रीडन्ति इति च वाञ्छन्ति । तदा पद्मान्यपि आयकुताकारेरसो भवत् श्रीविजयविजयं द्रष्टुं समागता नराः आगमात् ज्ञात्वा क्रीडन्तु इति वदन्ति स्म । च पुनः । तत्र मण्डपभूमौ क्वापि पुष्पाणि कुन्दादीनि बभुः । कथं ? अत इति पूर्वो ...

अशोभन्ततरां तत्र कुत्रचिद्बहुजातयः । चमत्कारस्फुराः साराः सहकाराद्यः किल ॥६८॥
तमेष्यन्ति नरा द्रष्टुं ये तेऽर्कातपदुःखिताः । मा भवन्तु निषीदन्तु च्छायास्विति स्थिता इव ।
कुत्रचित्तत्र मातङ्गास्तुरङ्गाः करभा अपि । तिष्ठन्तु स्वामिनः श्रान्ता इति भक्त्या स्थिता इव ।
तस्योपरि समाकृष्टमुत्कृष्टं व्यलसत् स्थुलम् । चतुर्दिग् झल्लरीयुक्तं विमुक्तं सर्वदूषणैः ॥७१॥
श्वेतमिव बहिः श्वेतं प्रत्यक्षश्वेतपर्वतम् । ब्रुवन्ति पण्डिता यत्तद् व्यद्योततनरां किल ॥७२॥
द्यावाभूम्योर्विचालस्थं विमानं कोऽपि कीर्तितम् । चित्रव्याजात्समायुक्तं सुपर्वत्वात् सुपर्वभिः
तत्रान्तर्यत्र चित्राणि पुरुषाणां योषितामपि । तन्निपातानि तं द्रष्टुं छन्ना देवा इवाययुः ।
सद्वर्णा इव सद्वर्णाः प्रस्तीर्णा लिखिता बुधैः । तस्याऽशोभन्त भूपट्टे नानाकारा बुधादराः ।

पदमिहाप्यनुकृष्य व्याख्येयं । ततो नरा देवान् अर्चन्तु इतीच्छया इति वाञ्छया बभुर्वा शुशुभिरे इव ।
अत्र वार्तालेशः पुष्पाणि हि इत्यचिन्तयन् यन्नराः श्रीविद्याविजयं द्रष्टुमायास्यन्ति तत्र च नन्दि-
मारोपयिष्यन्ति नन्दौ च देवप्रतिमा भविष्यन्ति तासां पूजार्थं तत्कालगृहीतपुष्पाणि विलोक्यन्ते ।
ततो वयं प्रागेव तत्र भवामश्चेत्तर्हि त अस्मान् लात्वा प्रतिमाः पूजयन्ति इति वाञ्छया पुष्पाणि
बभुरिवेति कवेरुत्प्रेक्षा । वा इत्यव्ययमिवार्थे ।

६९–ननु माघमासे पदमहोत्सवोऽभूत् । माघस्य शिशिरर्तौ संभवात्कथं अर्कातप-
दुःखिता इति । भूमः शिशिरर्तौ अतिशीतत्वात् अर्कातपस्य सुखकारित्वेऽपि प्रायोदुःखकारित्वात्
प्रभूतकालमासेवनेन दुःसहत्वात् । अर्कातपदुःखिता मा भवन्तु, छायासु निषीदन्तु इति
सहकारादीनां विचारो न दुष्ट इति ।

७२–तत्स्थुलं व्यद्योततरां अतिशयेन व्यराजत । तदिति किं यत् स्थुलं प्रति पण्डिता
प्रत्यक्षश्वेतपर्वतं कैलासपर्वतं ब्रुवन्ति । कथंभूतं स्थुलं बहिः श्वेतं धवलं । किमिव ? श्वेतमिव
रूप्यमिव । यथा रूप्यं श्वेतं भवेत्तथेदमपि बहिः श्वेतं । स्थुलस्य बहिः श्वेतत्वात् रूप्योत्प्रेक्षा
कैलासपर्वतोत्प्रेक्षा च युक्ता ।

७३–कोऽपि अर्थात् कविः । तं मण्डपं द्यावाभूम्योराकाशपृथिव्योर्विचालस्थं मध्यस्थितं
विमानं केति कथयति नायं मण्डपः किन्तु विमानमिति । कथं ? चित्र व्याजात् । देवदेवीचित्र-
मिषात् सुपर्वभिर्देवैस्समायुक्तं सहितं कस्मात्सुपर्वत्वात् प्रधानमहोत्सवात् ।

७५–तस्य मण्डपस्य भूपट्टे सद्वर्णा इव प्रधानाक्षराणीव । सद्वर्णाः प्रधानास्तर दलीचा
प्रमुखाच्छादनवस्त्रविशेषा अशोभन्त । कथं भूताः सद्वर्णा बुधैश्चतुरनरैः फरास इत्यादि भाषा
प्रसिद्धैः प्रस्तीर्णा विछाया इति भाषाप्रसिद्धाः । द्वितीयपक्षे–कथंभूताः सद्वर्णाः प्रधानाक्षराणि
बुधैः पण्डितैः प्रस्तीर्णा विस्तारं प्राप्ताः । पुनः कथंभूताः ? लिखिता इव लिखिताः । द्वितीय-

अथ भोजनसामग्रीं कारयामास सोऽग्रिमाम् । सुधामिव सुरेन्द्राणां नराणामतिवल्लभाम् ॥
सखार्द्रां मोदकान् दिव्यान् खज्जकान् सज्जनोचितान् ।
कुण्डलीघृतपुरादीन् श्रीसंश्लादिमिश्रितान् ॥ ७७ ॥
एतानेव च कर्पूरकाश्मीरद्रव्यसंयुतान् । अन्यानपि महावीर्यान् बहुजातीनकारयत् ॥ ७८ ॥
ततो नानाविधानेकदेशेभ्यो व्यवहारिणः । श्रावकानाह्वयामास तेऽप्यागच्छन् समृद्धिनः ॥
आनन्ददायिनं नन्दि न कैश्चिदपि निन्दितम् । अथारोपयदानन्दात्स तदा सतदादरः ॥८०॥
तस्योपरि चतुर्दिक्षु चतुरश्चतुरो जिनान् । स्थापयामास साक्षिल्ये सर्वविघ्नोपशान्तये ॥८१॥
मण्डपेऽथ समागच्छद्दत्तुच्छोत्सवपूर्वकम् । विजयसेनसूरीन्द्रो विद्याविजयसंयुतः ॥८२॥
संभूय श्रावका लोकास्तथान्ये नं दिदृक्षवः । आसनान्तर्बहिश्चैव मण्डपस्य यदृच्छया ॥८३॥
षोडशस्य शतस्यास्मिन् सप्तपञ्चाशसंवति । वैशाखशुदि चतुर्थ्यां गीतगानादिपूर्वकम् ॥८४॥
सूरिमन्त्रमयो सूरिः प्रादात् पाणौ तदीयके । अश्रावयच्च तत्कर्णे दक्षिणे गुरुणार्चिते ॥८५॥
सूरिमन्त्रं प्रदायाथ सूरिरित्यब्रवीन्मुखात् । सूरिर्विजयदेवोऽयं सर्वसङ्घसमक्षकम् ॥८६॥
अर्हत्सिद्धसदाचार्योपाध्यायाः साधुसाधवः । कुर्युः सङ्घस्य कल्याणं पञ्चैते परमेष्ठिनः ॥८७॥
इत्याशीर्वच उत्कृष्टमादिशद्धर्मसाधकम् । विजयदेवसूरीन्द्रस्ततः सङ्घस्य संहितः ॥८८॥
श्रीमल्लः श्रावको हर्षात्ततो रूप्याणि सादरः । ददौ श्रावकसङ्घेभ्यो याचकेभ्योऽपि भावतः ॥
भोजनानि पुरोक्तानि मोदकादीन्यभोजयत् । आहूतानप्यनाहूतान् श्रावकान् स जनानपि ॥

पक्षे छिद्रिताः । पुनः कथं० ? नानाकारा विविधचित्राः । द्वितीयपक्षे विविधाकृतयः । पुनः कथं भूताः० ? सुधादराः सुधानां अर्थात् महर्द्धिकोत्तमलोकानां आदरो येषु ते । तथा महर्द्धिकोत्तमलोकयोग्या इत्यर्थः । द्वितीयपक्षे । पुनः कथं० सुधैरादियन्ते इति सुधादराः ।

८०—यस्मिन् नन्दौ अर्थात् नन्दिरचनायाः करणे आदृताः आदरवन्तः नन्दिरचना करणप्रवीणा नरा इत्यर्थः । तदादृता सह तदादृतैर्वर्तते यः स सतदादरः । नन्दिरचनाकरणप्रवीण नरसंयुत इत्यर्थः ।

८९—अत्र रूप्यशब्दो नाणकपर्यायः । यन्महेश्वरः—रूप्यं स्यादाहतस्वर्णरजते रजतेऽपि चेति । यथा—मणिरूप्यादिविज्ञानं तद् विदां नानुमानिकमितिः ।

९०—स श्रीमल्लः श्रावकः श्रावकान् अपीति शब्दार्थे जनान् अर्थात् श्रावकेभ्योऽन्यान् लोकांश्च पुरोक्तानि मोदकादीनि भोजनानि अभोजयत् । कथंभूतान् श्रावकान् आहूतान् परदेशेभ्यः परनगरेभ्यो वा आकारितान् । पुनः कथं० अनाहूतान् अनाकारितान् स्वदेशापेक्षया परनगरापेक्षया वा स्वनगरनिवासिन इत्यर्थः । आहूतानिति विशेषणेन परमतात्पर्यमि-

निरवर्त्ततसत्कान्त एवं सूरिपदोत्सवः । न्यवर्तत च सर्वेषां सन्ततिर्दुरितांहसाम् ॥९१॥
ततः सर्वत्र सर्वत्र प्रावर्तत जयारवः । श्रीसूरेः श्रावकेशस्य श्रीमल्लस्य च निर्मलः ॥९२॥
श्रीमत्पत्तनसद्दुङ्गे निरमाद् वन्दनोत्सवम् । सहस्रवीर आनन्दान्वस्य द्रव्यव्ययाद् घनात् ॥९३॥
षोडशस्य शतस्यास्मिन् अष्टपञ्चाशवत्सरे । षष्ठयां पौषस्य कृष्णायां गुरुवारे शुभावहे ॥९४॥
ततः शंखेश्वरं पार्श्वजिनं नन्तुं च जग्मतुः । गुरुशिष्यावलक्ष्येनां सल्लोकैर्विनयात्तदा ॥९५॥
मरुदेशनिवास्यत्र हेमराजश्च सन्नृपः । शत्रुञ्जये जिनान्नन्तुं गच्छंस्तावभ्यवन्दत ॥ ९६ ॥
समस्तमरुदेशादिदेशवासिजनान्वितः । स्वभुजोपार्जितद्रव्यव्ययं कुर्वन्ननेकधा ॥९७॥
बहवोऽत्राभवन् भव्याऽवदाताश्चोत्सवा नवाः । निर्मिताः श्रावकैर्वक्तुं तानलं नाऽलसो यतः ॥

इत्थं वासकुमार एष उदयी प्राक्पुण्यपुण्यार्जनात्,
श्रीमत्सूरिपदं क्रमादलभत मार्हिकसाम्राज्यकम्।
श्रीश्रीवल्लभपाठकेन पठितं लभ्यं न पुण्यं विना,
श्रुत्वेति श्रवणा भवन्तु भविका धर्मे मनःशुद्धितः ॥९९॥

इति श्री श्रीवल्लभोपाध्याय विरचिते श्रीमद्विजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरि सूरिपदप्रदानवर्णनो नाम सप्तमः सर्गः ॥७॥

न्धुपुरश्रीमदहम्मदावादादिनगरनिवासिनः श्रावकाः । अनाहूतानिति विशेषणेन च श्रीस्तंभतीर्थनिवासिनः श्रावका इत्यर्थोऽवसेयः ।

९२—सर्वान् त्रायते इति सर्वत्रः सर्वरक्षकः। सूरिपदोत्सवे बन्दिलोकाः कारातः छोटिताः। घटकादयो जन्तवोऽपि पञ्जरादितः छोटिता इति सर्वत्र इतीदं विशेषणं पुष्टम् ।

९३—सहस्रवीरः पारिक्खगोत्रः ।

९५—पाश्चिमार्धव्याख्या । तदा तस्मिन्काले श्रीविजयसेनसूरि श्रीविजयदेवसूर्योः श्रीशङ्खेश्वरपार्श्वजिननमस्करणहेतवे श्रीशङ्खेश्वरनगरप्राप्तिसमये सल्लोकैः पण्डितलोकैर्विनयात् [illegible] गुरुशिष्यौ श्रीविजयसेनसूरिर्गुरुः श्रीविजयदेवसूरिःशिष्यः [illegible] ।

९८—अत्र श्रीशङ्खेश्वरनगरे मरुदेशनिवासी पिंपाडिग्रामवास्तव्यः साहश्रीतालहासुतो हेमराजसंघपतिस्तौ श्रीविजयसेनसूरिश्रीविजयदेवसूरिकर्मतापन्नौ अभ्यवन्दत । शेषं सुगमम् ।

अष्टमः सर्गः

अथैवं वर्तमानोऽसौ वर्धमानं दिने दिने । जिनशासनसाम्राज्यं भुनक्ति पुतिमत्तरम् ॥१॥
अदीक्षत घनान् शिष्यान् मतिद्धमनेकधा । विजयदेवसूरीन्द्रो जिनधर्मोपदेशतः ॥२॥
धर्मोपदेशतो यस्य प्रतिबुद्धा भवन्ति हि । भव्यास्तीर्थङ्करस्येव श्राद्धाः सम्यक्त्वधारिणः ॥३॥
सर्वदा सर्वदा यस्य सफला धर्मदेशना । लोकानां कल्पवल्लीव निष्फला स्यात्कदापि न ॥४॥
अथ श्रीमेदतादङ्गे मण्डनो भूमिमण्डनम् । श्रीचोरवेडियागोत्रे समभूत् श्रावकोत्तमः ॥ ५ ॥
सुरताणः सुतस्तस्य प्रथमः प्रथमः कुले । द्वितीयो नाथ इत्याख्यः समभूत्समभूत्तमः ॥ ६ ॥
नाथस्यात्मजोऽभूवंस्त्रयो लोकत्रयोपमाः । केशवः श्रीकपूरश्च कमानामापि च क्रमात् ॥ ७ ॥
यथाक्रममवर्धन्त पाल्यमाना अहर्निशम् । मात्रा पित्रा तथान्यैश्च त इवात्ममनोरथाः ॥ ८ ॥
समये पितरौ तांश्च सर्वविद्या अपाठयन् । शीघ्रमध्यापकाभ्यर्णादपठंस्ते च ताः समाः॥ ९ ॥
तनयानां विवाहाय सत्कन्या व्यवहारिणाम् । अयाचेतांतरां प्रेम्णा पितरावादरेण हि ॥
अस्मिन्नवसरे पुत्रौ द्वौ केशव-कपूरकौ । नोपयच्छावहे कन्ये अब्रूतामिति धर्मिणौ ॥ ११ ॥
संसारिणां हि संसारे स्यात् प्रियं पाणिपीडनम् ।
तयौ न्यपिष्यतां बालौ कस्माच्चिदपि कारणात् ॥ १२ ॥
संभावयाम ईदृशे तत्र मिथ्या न सर्वथा । कारणं स्तोकसंसार उपात्तसुकृतं पुनः ॥ १३ ॥
बहुक्तावपि तौ पित्रा मात्रा चान्यैर्निजैरपि । विवाहं नाभ्यमन्येतां स्तोकसंसारिणौ यतः ॥
दीक्षामेवाभ्यमन्येतां तदा तौ सुकृते रतौ । रतौ यत्र भवेद् यो यत् तदेवाङ्गीकरोति सः ॥१५॥
पितरौ च पितृव्यश्च सर्वं एते त्रयस्ततः । उद्विग्ना भवतोऽभूवन् सम्यक् तत्प्रतिबोधिताः॥१६॥
ततस्त ऊचिरे सर्वे संभूयेति परस्परम् । वयं च प्रव्रजिष्यामो यथैतौ प्रव्रजिष्यतः ॥ १७ ॥

६–समस्यां सर्वस्यां भुवि उत्तमः समभूत्तमः । सर्वार्थस्य समशब्दस्य सर्वादिगणे पाठात् ङौ‍ऽङ्कि सप्तम्येकवचने, सर्वनाम्नः स्याद् ह्रस्वश्चेति; स्याद् इत्यागमे आपश्च ह्रस्वे समस्यामिति रूपसिद्धिः ।

९–ताः सर्वविद्याः, कथंभूताः समा मनोरमाः । समं साध्वखिलं सदृक् इत्यनेकार्थः ।

१६–पितरौ नाथाभिधः पिता, नायकदेवी माता । पिता च माता च पितरौ । पितामात्रेति पितृशेषः । च पुनः पितृव्यः काकउ इति लोकभाषाप्रसिद्धः, सुरताण इति नामा एते त्रयः । कथंभूता एते त्रयः । तयो र्विवाहानङ्गीकरणात् । ताभ्यां केशवकर्पूरचन्द्राभ्यां प्रतिबोधिताः । अयं संसारो दुःखदायी, विषोपमा विषया इति ज्ञापिता ये ते तत्प्रतिबोधिताः ।

अथास्मिन् समये शास्ति बलभद्रो महीपतिः । राज्यं श्रीमेडताद्रङ्गे भ्रातृगोपालसंयुतः ॥१९॥
सोऽशृणोत् लोकवार्त्तेति प्रव्रजन्ति हि पण्णराः ।
पिता माता त्रयः पुत्राः पितृभ्राता तथा महान् ॥ १९ ॥
गृहं गृहांश्च संत्यज्य प्रभूतानि धनानि च । स्वयंबुद्धा इव ज्ञानात् मिथोबुद्धा विवादतः ॥२०॥
रूपस्वभावलावण्यैरुत्तराः कुरवः किमु । नोत्तरे चापरे लोका यानाख्यान्तीति पण्डिताः ॥२१॥
बलभद्रमहीपालस्तदेत्याकर्ण्य विस्मितः । तान् समाकारयामास प्रविसृज्य निजं नरम् ॥२२॥
नृपप्रैष्यस्ततस्तेषां गृहे गत्वेत्युपादिशत् । ह्वयते बलभद्रोऽसौ युष्मान् भो पण्णरा द्रुतम् ॥

२०—गृहं मन्दिरं गृहान् परिणीतस्त्रीः स्त्रियं वा । परिणीतस्त्रीवाची गृहशब्दः पुंस्त्रीलिङ्गः पुंस्ययं बहुवचनान्त एव। मिथः परस्परं बुद्धाः ज्ञातधर्माधर्मफलाः। एतौ अदृष्टाऽभुक्तभोगौ केशवकर्मचन्द्रनामानौ पुत्रौ बालकौ यदि प्रव्रजतस्तर्हि वयं भुक्तभोगाः संसारे कथं तिष्ठाम, न स्थास्याम इति कारणादेव मातृपितृपितृव्या यथाक्रमं मिथो बुद्धाः। कस्मात् ज्ञानात्। अत एव, पुनः कस्मात् विवादतः। कथंभूता एते उत्प्रेक्ष्यन्ते स्वयंबुद्धा इव।

२१—पण्डिता यान् मातृपितृपितृव्यपुत्रान् षड् नरान् इति आख्यान्ति कथयन्ति। इतीति किं; कथंभूताः षण्नराः। किमु इत्यव्ययं विचारे। रूपस्वभावलावण्यैः करणभूतैः। उत्तराः कुरवः उत्तरकुरुक्षेत्रोत्पन्ना युगलिन इति विचारयन्ति । न अपरे अन्ये लोका उत्तरे उत्तरदेशोद्भवाः। यादृशाः रूपस्वभावलावण्यैः उत्तरकुरुक्षेत्रोत्पन्ना युगलिनः सुन्दरास्तथा एते षण्नराः अपि सुन्दराः, नान्ये उत्तरदेशोत्पन्ना लोका इत्यर्थः। उत्तराः कुरव इत्यत्र सत्यामपि न नाम्नीति निषेधकथनात् पूर्वापरेति सूत्रेण वैकल्पिको जसः शी न भवति। व्यवस्थेति कोऽर्थः। स्वाभिधेयापेक्षोऽवधिनियमो व्यवस्था । अस्यार्थः—स्वाभिधेयो दिग्देशकालस्वभावोऽर्थस्तमपेक्षते यः सः स्वाभिधेयापेक्षः। एवं विधो योऽवधिनियमः स व्यवस्था। तत उत्तरशब्दस्य दिग्देशकालस्वभावे अर्थे सत्यपि उत्तरशब्दात्पूर्वापरेति वैकल्पिको जसः शीभावानिषेधो नामत्वात्। ननु उत्तरशब्दस्य दिग्देशकालस्वभावानां नामत्वे सत्यपि न नाम्नीति कथं कथयतेति चेत् ब्रुमः—कुरवो द्विधा—मेरुपर्वतात् दक्षिणस्यां दिशि भवत्वात् देवकुरवः। देवशब्दपूर्वत्वेनैव प्रसिद्धत्वात् तेषां न दक्षिणशब्दपूर्वत्वेनेति उत्तरस्यां दिशि भवत्वात्। उत्तरशब्दपूर्वत्वेनैव प्रसिद्धत्वात्। उत्तराः कुरव इति कुरव इत्युक्तेश्च सामान्येन उभयोः देवकुरव उत्तरकुरव इत्यनयोर्ग्रहणं स्यात्। अत उत्तरशब्दस्य विशेषस्य द्योतकत्वात् उत्तरा इत्युक्तेरुत्तराः कुरव इति लभ्यते। अत उत्तरशब्दस्य कुरव इत्यस्य नामान्तरद्योतकत्वात्। नाम्नीति कथनं न दुष्टं। उत्तर इत्यत्र पूर्वापरेति वैकल्पिके जसः शीभावे प्रथमा बहुवचनं। नात्र प्रत्ययो न च तस्य लोपः। कुरव इत्यत्र जनपदे लुप् इति अण् प्रत्यय लुपि सति लुपियुक्त वद् व्यक्तिवचने इति प्रकृतिवत् लिङ्गवचने ज्ञेये।

न्ङ्कारैरलङ्कृत्य परिधायाम्बराणि च । प्रभूते प्राभृतं स्थात्वा जग्मुस्ते तत्र षण् नराः ॥२४॥
भृतं पुरतो मुक्त्वा निपत्य च पदाम्बुजम् । स्वोचितं स्थानमासाद्य तस्य ते तस्थुराज्ञया ॥
न् निरीक्ष्य परीक्ष्याक्ष्णा दर्शनादेव तत्क्षणात् ।
　　　　मान्यान्मान इमे सत्या आयुष्मत्नित्यब्रवीन्नृपः ॥ २६ ॥
नासीनानपाऽपृच्छद् बलभद्रस्तदादरात् । कथं गृह्णन्ति भो दीक्षां भवन्तस्तद् ब्रुवन्तु माम् ॥
कं दुःखं कस्य कस्माद्वा युष्माकं कथ दुःखदः । निवारयामि तत्सर्वं यद्वाञ्छत ददानि तत् ॥
दि स्याम धनं पार्श्वे धनं तर्हि ददाम्यहम् । ग्रामं ग्रामोत्तमं चारीन् द्राग् निराकरवाणि च ॥
याचारं कुरुतां नन्दात् सुखेन चसतात्र च ।
　　　　दुःश्रवः पालनीया हि दीक्षा यत्कोमलाङ्गकाः ॥३०॥ चतुर्भिः कलापकम् ॥
ति श्रुत्वा नृपप्रोक्तं वचनं तेऽपि षण् नराः । तदोत्तरन्ति वाकूशूरा इव भूमीश्वरोत्तमम् ॥
स्मात् कस्यापि वा दुःखं नास्माकं सर्वदा सुखम् । भवत्प्रसादतः सर्वं धनं चास्ति महीपते ॥
रं स्त्रीभिर्धनैः पुत्रैर्ग्रामैर्धान्यैर्गवादिभिः । नास्ति कार्यं सदास्माकं विना धर्मं हि सर्वदा ॥
वं विबोध्य सद्बुद्ध्या धर्ममय्या च सद्गिरा । हर्षयन्ति स्म भूपालं षण् नरा धर्मतत्परा ॥
नः प्राहेति भूपालस्तदा तान् विनयान् मुदा । दीक्षां गृह्णन्तु भो वृद्धा, न गृह्णन्तु च बालकाः॥
ाहुः श्रुत्वेति भूपालं ते सर्वे सर्ववल्लभाः । अस्माकं बालका एव दीक्षाग्रहणकारणम् ॥३६॥
र्भिर्विना न चास्माकमेषां चास्मान विना किल । सर्वथा नैव भूपाल दीक्षाग्रहणमर्हति ॥
त्साहाय्यतोऽस्माकमेषां साहाय्यतस्तु नः । दीक्षाग्रहणनिर्वाहो न संभवति सर्वथा ॥३८॥
क्ति-प्रत्युक्ति-सद्युक्त्या विज्ञायेति महीपतिः । प्रसन्नोभूय तानाख्यत् यूयं धन्यतमा इति ॥
ढधर्म-प्रियधर्म-शब्दौ शब्दानुशासने ।
　　　　नकारान्तौ हि निष्पन्नावर्थाचैतेषु षट् नृषु ॥ ४० ॥ युग्मम् ।
ढधर्मादयः शब्दा इव प्राज्ञा विशेषणाम् । त्यक्त्वाऽकारान्ततां सूत्रात् पूर्वां प्रकृतिमात्मनः ॥

२५—ते षण् नराः तस्य बलभद्रमहीपालस्य आज्ञया तस्थुः—ऊर्ध्वा अभूवन् इत्यर्थः । तस्येति पदं अत्रापि योज्यं । किं कृत्वा, तस्य बलभद्रस्य पुरतोऽग्रतः प्राभृतं ढौकनं मुक्त्वा । पुनः किं कृत्वा, तस्य बलभद्रस्य राज्ञः पदाम्बुजं चरणकमलं निपत्य नत्वेत्यर्थः ।

४०—इति विज्ञाय । इतीति किं ? हि निश्चितं दृढधर्मप्रियधर्मशब्दौ नकारान्तौ शब्दानुशासने व्याकरणे निष्पन्नौ सिद्धौ; अर्थात् एतेषु षट्नृषु निष्पन्नौ । एते षट्नराः दृढ-धर्माणः प्रियधर्माण इत्यर्थः ।

नाश्रयन्ति गृहस्थत्वं मदुक्तं बहुशोऽपि हि ।
शुद्धधर्मबलादेते जातसद्वचनाक्षराः ॥४२॥ युग्मम्

ज्ञात्वैवं भूपतिर्धर्मे तान् विनिश्चितचेतसः । प्रेषयामास सत्कृत्य गृहं सद्वस्त्रभूषणैः ॥४३॥
अथायान्तिस्म ते तस्य हर्म्यादुत्सवतोऽद्भुतात् । बलभद्रमहीपालकृताद् हर्षप्रकर्षतः ॥४४॥
आगत्यावसथे नाथः सुरताणश्च सोदरः । दीक्षोत्सवमुसामग्रीं व्यदधातामुभौ मुदा ॥४५॥
वसन्त्यवसरे चास्मिन् मेदिनीतटपत्तने । (पाठान्तरेण-मेडतानाम्नि पत्तने)
तपागच्छे महीयांसः श्रावका व्यवहारिणः ॥४६॥

तद्यथा-कोठारीकुलविख्याताः कल्ला टालासुतान्विताः ।
अजैनश्चासकर्णश्च रेखा अम्माभिधस्तथा ॥४७॥

वीरदासो लसद्वीरदासश्चामरसिंहयुक् ।
अन्येऽपि स्वपरीवारयुता आसन्महत्तराः ॥४८॥ युग्मम्

श्रीसूजा-हरदासश्च ताल्हणः पुण्यकारणम् । सादा-माना-दयश्चान्ये मन्त्रिणोऽमी वसुस्तराम्
पदा-पत्ता-जिणामुख्या मुख्याः सर्वेषु कर्मसु । सोनीवंशे सदा ख्याता बभुवुः श्रावकोत्तमाः
सहसा-सुरताणाख्यावास्तां कर्णाटवंशके । कुले भाण्डारिके भातां रत्ना-मोकाभिधानकौ ।
श्रीमान् ठाकुरो नाम शङ्करः शङ्करः सदा । मानो नरहरश्चेते शङ्खलान्वय आबभुः ॥५२॥

४१-४२-दृढ इति व्याख्या०-एते षण् नराः नाथा १ सुरताण २ नायकदेवी ३ केश ४ कर्मचंद्र ५ कपूरचन्दाः ६ गृहस्थत्वं नाश्रयन्ति न सेवन्ते । कथं० गृहस्थत्वं; हि निश्चितं बहुश मदुक्तं बलभद्रेण राज्ञा उक्तं । कस्मान्नाश्रयन्ति शुद्धधर्मबलात् । कथं० एते जातसद्वचनाक्षराः सत्सत्याद् वचनान्न क्षरन्ति न पतन्तीति सद्वचनाक्षराः। जाताश्चेते सद्वचनाक्षराश्च जातसद्वचनाक्षराः । के इव उत्प्रेक्ष्यंते-दृढधर्मादयः शब्दा इव । यथा दृढधर्मादयः शब्दाः जातसद्वचनाक्षराः जातं सत्सु सत्येषु वचनेषु प्रथमादीनां सप्तविभक्तीनां एकद्वित्वादिवचनेषु अक्षरं नकारादिलक्षण वर्णो येषां ते जातसद्वचनाक्षराः । तथा एतेऽपि षड् नरा इत्यर्थः । कथंभूताः; दृढधर्मादय शब्दाः विशेषतां विशेषभावं प्राप्ताः । किं कृत्वा ? आत्मनः स्वस्य पूर्वां अकारन्ततां प्रकृ सूत्रान् धर्मादच केवलात् इति लक्षणात्त्यक्त्वा । द्वितीयपक्षे कथं भूता एते विशेषतां प्राप्ता सामान्यश्रावकलोकापेक्षया साधुधर्माङ्गीकारात् विशेषत्वं प्राप्ताः । किं कृत्वा पूर्वां प्रथमां प्रकृ श्रावकधर्मलक्षणां पापप्रकृतिं वा त्यक्त्वा । अत्र एते इति उपमेयपदं, दृढधर्मादयः शब्दा उप मानपदं; शुद्धधर्मबलादिति उपमेयपदं; सूत्रात् इति उपमानपदम् ।

४८-कोठारी । ४९-मुंहता । ५०-सोनी । ५१-भण्डारी ।
५२-सांखला । ५३-भडकतीया ।

रत्नसिंहो नृणां रत्नं राजसिंहो नृराजितः । सीहमल्ल-रत्ना नाम प्रमुखा विदिता वसुः ॥५३॥
सदारङ्गः सदारङ्गो धनो धन्यो धनीश्वरः । सुरताण इमेऽभूवन् श्रीभटकतियान्वये ॥५४॥
सुरत्राणः कृतत्राणः टाहा हाहाविवर्जितः । त्रिलोकश्रीरमीपालः संघिनीकुल आवसुः ॥५५॥
संघपः पेतसी ख्यातो मन्त्री नरपदस्तथा । रविदासो रवित्रासाः प्रतापादभवन्नमी ॥५६॥
द्रव्यदायी सदा देदा थंगाणी सद्गुणाग्रणीः । अभाच्छ्रीमत्तपानाम-सद्गच्छोद्द्योतकारकः ॥
भारमल्लः सदामल्ल-तुल्यो दानबलादिभिः । रविदासस्तथाऽभातामेतौ तातहडान्वये ॥५८॥
देवीदासो धनो नाम डूंगरो वत्सनामकः । अशोभन्त त्रयोऽप्येते सर्वदा सर्ववत्सलाः ॥५९॥
सुरत्राणः स्फुरत्त्राणः शार्दूलः स्थूलभूषनः । जीवाभिधस्तथैत्याद्या आसन् पीमसरान्वये ॥
भैरवो वर्धनो वीर एते भाण्डारिके कुले । व्यराजन्त च देपालः परीक्षककुलेऽभवत् ॥६१॥
महिकाभिध ऊदाह्वो मायीदासः सुमायिकः । इत्यादयो महीयांसो बभूवुर्गच्छदीपकाः॥६२॥
अन्यैरभिरन्यैश्च परदेशागतैरपि । एतेषामचिकीर्ष्यन्त वरयाभावरासितैः ॥६३॥
अत्रान्तरे वृद्धान्नेवं पण् नरास्ते परस्परम् । श्रीमत्कपूरचन्द्रस्य दीक्षा योग्या न चाल्पतः॥६४॥
भवेत् कपूरचन्द्रो हि यावत्सत्सान्निकः किल । तावच्चिष्ठतु मातास्य पालनाय तदादरा ॥६५॥
मयूद्भावु ततो दीक्षां माता पुत्रेण संयुता । पालनीयास्ति कष्टेन दीक्षा यन्महतामपि ॥६६॥
विचार्यैवं तदा नाथो दीक्षाग्रहणतः खलु । निवार्यास्थापयत् पुत्रयुतां मातरमालये ॥६७॥
साप्यस्यात्पुत्रसंयुक्ता पुत्रपालनहेतवे । पत्युः कथनकारित्वं पत्न्या धर्मः सदोत्तमः ॥६८॥
कुर्वाणा परमं धर्मं श्रावकं प्रतिनीव हि । पत्न्यतिष्ठत् सुतं तस्य पालयन्ती च सद्व्रतम् ॥
केसवः कर्मचन्द्रश्च नायस्यात्मरुहाविमौ । नायः पिता तयोरेव पितृव्यः सुरताणकः ॥७०॥
चत्वारश्चतुरा एते कर्मारीन् हन्तुमुद्यताः । द्रव्यं दारांश्च संत्यज्य दीक्षायामभवन् पराः ॥७१॥

(चत्वारश्चतुरा एते दीक्षाग्रहणतत्पराः ।
बभूवुरल्पकर्माणः संत्यज्य स्वगृहांस्ततः ॥७१॥ इति पाठान्तरम्) —युग्मम् ।

ते यच्छन् प्रत्यहं मातर्द्रविणं स्वगृहोचितम् । दीनेभ्यो याचकेभ्यश्च दिव्यधान्याम्बराणि च ॥
पूर्वोक्ता अथ ते श्रीमन्मेदिनीतटवासिनः । श्रावका भोजयन्ति स्म चतुरस्तान् धनादृतान् ॥

५५—संघिन्वी त्रिलोकश्रीः त्रिलोकसी इति नामेत्यर्थः । हाहा सुरस्वरः ।

६५—तस्मिन् कपूरचन्द्रनाम्नः पुत्रस्य पालने आदरो यस्याः सा तदादरा ।

६९—तस्य नायस्य पत्नी नायकदेवीनाम्नी । श्रावकस्यायं श्रावकः धर्मः, तदेदमित्यण्
श्रावकसम्बन्धिनमित्यर्थः ।

७१—ततः नायकदेव्या कपूरचन्द्रस्य च गृहे रक्षणानन्तरं स्वं च द्रव्यं गृहांश्च त्यक्त्वा ।

नाथः श्रीसुरताणश्च वरयात्रामिमामथ । आत्मनोऽकारयेनां नो वैराग्यादिकृता यतः ॥७४॥
अथ नाथोऽक्षिपत् पुत्रौ वर्णके सुदिने दिने । विचक्षण इवानन्दात् सुरेश्वरनरेश्वरौ ॥७५॥
आप्तौ चारुकौसुंभवस्त्रैस्तौ बभतुस्तराम् । प्रभातोदितबालार्ककिरणोपमसद्द्युती ॥७६॥
आनन्दात् गायनोलूलुन् स्त्रियो वर्धयनादृताः । मौक्तिकैरुपयच्छेते दीक्षाकन्यामिमौ यतः ।
अनेके हर्षतो लोका इत्याचख्युर्विचक्षणाः । दक्षिणां ददतानन्दात् श्रुत्वा तत्कीर्तिमद्सुतान् ।
काश्चित्सखीः प्रति प्रेम्णा काश्चिदाचख्युरित्यहो ।

मुक्त्वा कार्याणि तौ द्रष्टुं त्वरध्वं चैत साम्प्रतम् ॥७९॥
चारुकर्पूरकस्तूरीकुङ्कुमादिभिरद्भुताम् । स्फुरत्परिमलोपेतां कुरुध्वं मिष्टपिष्टिकाम् ॥८०॥
दिव्यगन्धोदकैः पूर्वं स्नपयन्तु ततः पुनः । उद्वर्तयन्तु तत्कायं यतध्वं चाक्षिदोषतः ॥ ८१ ॥
कर्पूरागरुकस्तूरीमिश्रकुङ्कुमचन्दनैः । अङ्गरागं तयोरङ्गे सरङ्गाः कुरुतादरात् ॥ ८२ ॥
ललाटे चारुचर्चिक्यं कुरुध्वं कुङ्कुमादिभिः । अङ्गेऽलङ्कारसद्धारान् परिधापयतोत्सवात् ॥८३॥
मल्लध्वं मूर्ध्नि माल्यानि गले प्रालम्बिकाः शुभाः । बहुधा च वराकारमङ्गुलीष्वङ्गुलीयकम् ॥
द्वयोर्मूर्ध्नि निबध्नीत कोटीरं च शिरोमणिम् ।

हस्तेषु हस्तसूत्राणि, बाहुभूषाश्च बाहुषु ॥८५॥ सप्तभिः कुलकम् ॥
पुष्पितौ तावदीप्येतां तदानीं फलितौ भृशम् । मनोरथप्रदातारौ कल्पवृक्षाविवाङ्गिनौ ॥८६॥
अभाचद्वन्द्वमश्वस्थं वरयात्रासु राजवत् । भूषणैर्मुकुटोत्तंसैश्छत्रैश्च सह चामरैः ॥ ८७ ॥
गायना अग्रतो गायन् केप्यातोद्यान्यवादयन् । ननर्तुर्नर्तका हर्षादब्रुवन् कथकाः कथाः ॥८८॥
स्फूर्जन्नेजसमाजश्रीकरकाकाररूपताम् । बिभ्राणाः किमु देवेन्द्रास्तौ निरीक्षितुमागताः ॥८९॥

७८—उलूलुर्मङ्गलध्वनिरिति हैमशेषः । उपाद् यमः स्वीकरणे इति उपपूर्वात् यमो विवाहेऽर्थे आत्मनेपदे वर्तमाने लटो द्विवचने उपयच्छेते इति रूपं । तयोः केशव-कर्मचन्द्रयोः कीर्तिस्तत्कीर्तिस्ताम् ।

८१—उद्वर्तयन्तु मलं निवर्तयन्तु ऊगटणउ करउ इति भाषा इत्यर्थः ।

८३—चार्चिक्यं टीका आडिप्रमुखं । चार्चिक्यं समालभनं इति हैमः ।

८४—मल्लध्वं धरत । मल्लध्वमिति क्रियापदं सर्वत्र योज्यं । गले प्रालम्बिकाः काण्ठला १ इहकउ २ टंकावलि ३ चम्पकली ४ इत्यादि लोकभाषाप्रसिद्धाः आभरणविशेषाः । प्रालम्बिका ऋजु हेम्नेति । ऊर्मिका त्वङ्गुलीयकमित्युभयं हैमः ।

८८—केपीति वाद्यवादकाः । कथा इति तयोरेव बाल्येऽपि दीक्षाग्रहणलक्षणा वार्ता इत्यर्थः ।

वरयात्रा यथोरेवमासन्नवनवोत्सवाः । कथं व्याख्यान्ति तान् दक्षाः स्तोतुमिन्द्रो न याललम् ॥
श्राद्धैर्निर्वाह्यमानानां विचित्राणां दिने दिने । तदीयवरयात्राणां वारानन्ये न लेभिरे ॥९१॥
श्राद्धानामतिबाहुल्यात् रागस्याधिक्यतस्तयोः ।

सामीप्यात्सन्मुहूर्तस्य दिनानां च तनुत्वतः ॥९२॥ युग्मम् ॥

श्रीमन्मेदतटद्रङ्गाद् (पाठा०–श्रीमन्मेडताद्रङ्गाद्) बहिरारामे उत्तमे ।

दीक्षायै मण्डपं दीर्घ्यं श्रीनाथः सममण्डयत् ॥९३॥

व्यराजत्तोरणैस्तुङ्गैर्मण्डपस्तत्र मण्डितः । तोरणीकृतसच्छुण्डैः सम्मुखीनैर्गजैरिव ॥९४॥
वातप्रेरितसच्चूर्णस्फारिकाररफारच्छदैः । कर्णावलम्बितश्वेतस्फुरच्चञ्चुरचामरैः ॥ ९५ ॥
चरैस्तत्र सदुल्लोच आसील्लोचनहर्षदः । आकृष्टैर्नभसोदभ्रसन्ध्याभ्राणां दलैरिव ॥९६॥
सर्वतस्तत्र सन्मुक्तास्रजो रेजुः प्रलम्बिताः । कृत्वैकत्रांशुसर्वस्वं चन्द्रो न्यासमकरोत् किमु ॥
अस्मिन् समभवन् काले यावन्तोऽथ महाजनाः । निमन्त्र्य तावतः सर्वान् मधुरादरपूर्वकम् ॥९८॥
न सर्दभोजनभीतं सभोजनमभोजयत् । युवन् यथोचितं भरत्सा खादत पिबतां क्रियाम् ॥
दीक्षायाः सुदिनस्यादौ दिनेऽदीनमना मुदा ।

नालिकेराण्यदात् पाणौ तेषां च चरणोत्सुकः ॥१०१॥ त्रिभिर्विशेषकम् ।

अथ प्रभाते श्रीनाथः १ सुरताण २ सहोदरः । केशवः ३ कर्मचन्द्रश्च नाथपुत्रौ चतुर्नराः ॥
कौसुम्भोष्णीषमुख्यानि वासांसि विविधानि हि ।

हारप्रालम्बिकादीनि भूषणानि च पर्यधुः ॥१०२॥ युग्मम् ॥

अवतंसांस्तथा मौलीन् मौलौ नेऽतिमनोहरान् । न्यवभ्रन्त नितान्तश्री शोभिता अच्युता इव ॥
निरक्रामंस्ततोऽगाराद् ग्रहीतुमनगारताम् । समारुह्य विमानश्रीभासुराः शिबिकाः शुभाः ॥

९२–तयोः केशव-कपूरचन्द्रयोः । इमाः वर्णिताः, याश्च ता वरयात्राश्च तदीयवरयात्रास्तासां तनुत्वतः अल्पत्वात् । स्तोकं क्षुल्लं तुच्छमल्पं दभ्राणुतलिनानि च । तनु क्षुद्र कृशमिति हैमः ।

१०२–अथेत्यानन्तर्ये प्रभाते । चत्वारो नराः चतुर्नराः कर्तृपदं । हि निश्चितं । विविधानि, कौसुंभोष्णीषं कुसुम्भेन रक्तं उष्णीषं मुर्धवेष्टनं पाघडी इति भाषाप्रसिद्धं मुख्यं येषु तानि कौसुंभोष्णीषमुख्यानि वासांसि वस्त्राणि पर्यधुः परिहितवन्तः । च पुनः हारप्रालम्बिकादीनि भूषणानि–अलङ्कारान् पर्यधुः । तत्र हाराश्च शतलता अष्टाधिकसहस्रलतादयो अनेकप्रकाराः । प्रालम्बिकाश्च काण्ठला १ लहकत २ टङ्कावलि ३ माला ४ चम्पकली ५ चउकी ६ इत्यादि लोकभाषाप्रसिद्धविविधकण्ठाभरणविशेषा आदिर्येषां तानि हारप्रालम्बिकादीनि । चतुर्नराः के इत्याह–श्रीनाथः १ सुरताणः सहोदरो भ्राता, नाथस्य महीयान् भ्राता इत्यर्थः । केशवः कर्मचन्द्रश्च नाथपुत्रौ नाथस्य सुतौ । एवं चत्वारो नरा इत्यर्थः ।

चरयात्रा ययोरेवमासन्नवनवोत्सवाः । कथं व्याख्यान्ति तान् दक्षाः स्तोतुमिन्द्रो न यानलम् ॥
आर्द्रनिर्वाह्यमानानां विचित्राणां दिने दिने । तदीयवरयात्राणां वारानन्ये न लेभिरे ॥९१॥
आद्यानामतिबाहुल्यात् रागस्याधिक्यतस्तयोः ।
सामीप्यात्सन्मुहूर्तस्य दिनानां च तनुत्वतः ॥९२॥ युग्मम् ॥
श्रीमन्मेदतटद्रङ्गाद् (पाठा०—श्रीमन्मेडताद्रङ्गाद्) बहिरारामे उत्तमे ।
दीक्षायै मण्डपं दीव्यं श्रीनाथः सममण्डयत् ॥९३॥
ध्वराजचोरणैस्तुङ्गैर्मण्डपस्तत्र मण्डितः । तोरणीकृतसच्छुण्डैः सम्मुखीनैर्गजैरिव ॥९४॥
वातमेरितसच्चूलेयस्कारिकारस्करच्छदैः । कर्णावलम्बितश्वेतस्फुरच्चञ्चुरचामरैः ॥ ९५ ॥
घनैस्तत्र महुल्लोच आसील्लोचनहर्षदः । आकीर्णैर्नभसोदभ्रसन्ध्याभ्राणां दलैरिव ॥९६॥
सर्वतस्तत्र सन्मुक्तास्रजो रेजुः प्रलम्बिताः । कृत्वैकत्रांशुसर्वस्वं चन्द्रो न्यास्यकरोत् किमु ॥
अस्मिन् समभवन् काले यावन्तोऽथमहाजनाः । निमन्त्र्य तावतः सर्वान् मधुरादरपूर्वकम् ॥९८॥
न सदंभोजनमीतं सभोजनमभोजयत् । कुर्वन् यथोचितं भक्त्या खादत पिबतां क्रियाम् ॥
दीक्षायाः सुदिनस्यादौ दिनेऽदीनमना मुदा ।
नालिकेराण्यदात् पाणौ तेषां च चरणोत्सुकः ॥१०१॥ त्रिभिर्विशेषकम् ।
अथ प्रभाते श्रीनाथः १ सुरताण २ सहोदरः । केशवः ३ कर्मचन्द्रश्च नाथपुत्रौ चतुर्नराः ॥
कौसुम्भोष्णीषमुख्यानि वासांसि विविधानि हि ।
हारमालम्बिकादीनि भूषणानि च पर्यधुः ॥१०२॥ युग्मम् ॥
अवतंसांस्तथा मौलीन् मौलौ तेऽतिमनोहरान् । न्यवभ्रन्त नितान्तश्री शोभिता अच्युता इव ॥
निरक्रामंस्ततोऽगाराद् ग्रहीतुमनगारताम् । समारुह्य विमानश्रीभासुराः शिबिकाः शुभाः ॥

९२—तयोः केशव-कपूरचन्द्रयोः । इमाः वर्धिताः, ताश्च ता चरयात्राश्च तदीयवरयात्रास्तासां तनुत्वतः अल्पत्वात् । स्तोकं क्षुल्लं क्षुद्रमल्पं दभ्राणुतलिनानि च । तनु क्षुद्र कृशमिति हैमः ।

१०२—अथेत्यानन्तर्ये प्रभाते । चत्वारो नराः चतुर्नराः कर्तृपदं । हि निश्चितं । विविधानि, कौसुंभोष्णीषं कुसुम्भेन रक्तं उष्णीषं मुर्धवेष्टनं पाघडी इति भाषाप्रसिद्धं मुख्यं येषु तानि कौसुंभोष्णीषमुख्यानि वासांसि वस्त्राणि पर्यधुः परिहितवन्तः । च पुनः हारमालम्बिकादीनि भूषणानि—अलङ्कारान् पर्यधुः । तत्र हाराश्च शतलता अष्टाधिकसहस्रलताद्यो अनेकप्रकाराः । प्रालम्बिकाश्च काण्ठला १ लहकउ २ टङ्काबलि ३ माळा ४ चम्पकली ५ चउकी ६ इत्यादि लोकभाषाप्रसिद्धविविधकण्ठाभरणविशेषा आदिर्येषां तानि हारमालम्बिकादीनि । चतुर्नराः के इत्याह—श्रीनाथः १ सुरताणः सहोदरो भ्राता, नाथस्य महीयान् भ्राता इत्यर्थः । केशवः कर्मचन्द्रश्च नाथपुत्रौ नाथस्य सुतौ । एते चत्वारो नरा इत्यर्थः ।

लम्बितानेकसंकुल्लपुष्पमालासमाकुलाः । किंकिणीका[illegible] ॥१०५॥
अद्य धन्या वयं लोका अप्येते किंकिणीरवैः ।
आरोहोत्साटनादेषां कथयन्त्य इतीव किम ॥१०६॥ त्रिभिर्विशेषकम् ।
अनेके शिबिका लोकास्तत्रोऽभ्यार्हंस्तदा । श्रेष्ठस्कन्धैः स्वस्कन्धैः सज्ञास्या चोत्सवश्रिया ॥
आरभ्य स्वगृहात्तेऽथ मध्ये मेदनटस्य हि । कृष्णागुरुजलयन्नोऽमी मार्गेषु निरगुस्तदा ॥
गच्छन्ति स्माग्रतस्तेषां ध्रुवन्त इति मानवाः । नयनानन्दजनकं गीतं च [illegible] ॥
सङ्घा अपरदेशानां स्वदेशानां च भूरयः । धनिनो वस्तुवाचीना मागधाद्याः परेऽपि च ॥
मातङ्गाः पर्वतोत्तुङ्गा हयाः कल्लोलचञ्चलाः । स्यन्दनानि मनोज्ञानि सोन्मादाः पत्तयोऽपि च ॥
उपर्युपरिसद्वस्त्रा वर्षांसूचाभ्रका इव । स्फूर्जन्नेजाः पुरः पार्श्वान्ते चाक्षिनमोदकाः ॥११२॥
पताका नरहस्तस्था ज्ञापयन्त्य इतीव नून् । कृतसम्राजमरन्यामैमियो युद्धाश्चतुर्नराः ॥११३॥
सचक्षुभिर्गवाक्षस्थाः सद्मोपर्युपरि स्त्रियः । पश्यन्ति स्म मिथश्चान्यान् लक्षयन्ति स्म पाणिभिः ॥
भेरीदुन्दुभिमुख्यानि वाद्यानि विविधानि हि । वादकैर्वाद्यमानानि दिव्यानि स्वम्बजातिषु ॥
अहङ्कारादिवानेके सङ्गाता वरयोषिताम् ।
कर्णप्रियाणि गीतानि गायन्तो मधुरस्वरैः ॥११६॥ नवभिः कुलकम् ।
दीक्षामहोत्सवं दिव्यं जातं माग् न कदेदृशम् । कृत्वा गच्छन् बहिर्द्वारान् यत्र ते मण्डपं शुभम् ॥
विजयसेनसूरीन्द्रसद्गुरोः मवराज्ञया । पाठकोत्तमदिव्यश्रीमेघविजयमण्डितम ॥ ११८ ॥
अथशान्यां विदिश्येते गत्वा त्यक्त्वा स्वपाणिभिः । भूषाम्बराणि सर्वाणि कुर्युर्लोचं स्वमूर्द्धसु ॥
साधुयोग्यानि दिव्यानि चीवराणि तदा मुदा । परिधाय गुरोः पार्श्वे आययुस्ते चतुर्नराः ॥
ततः प्रदक्षिणीकृत्य प्रणत्य च चतुर्नराः । तस्थुरग्रे गुरोर्नन्दीं स्थापितान् चतुरोऽर्हतः॥१२१॥
यथाविधिविधिप्रज्ञो गुरुः सरसया गिरा । व्रतानि व्रतिनां पञ्च तदात्तानुदचारयत् ॥१२२॥
रसिका रसिकीभूय ते चाप्युदचरंस्तराम् । सुखैः स्वस्वमुखैः सम्यक् यतः सूत्रार्थवेदकाः ॥
षोडशस्य शतस्यास्मिन्नेकपञ्चाशवत्सरे । माघश्वेतद्वितीयायां दीक्षैतेषां शुभाभवत् ॥१२४॥
तुतुषुस्ते तदात्यन्तमुच्चैर्यं व्रतपञ्चकम् । मेनिरे मनसा चैवमद्य धन्यतमा वयम् ॥ १२५ ॥
विजयसेनसूरीणां विनेयत्वाक्षयात्मनः । प्रदीक्ष्य प्राचलत् शिष्यान् मेघविजयवाचकः ॥१२६॥
प्रतिग्रामं प्रतिद्रङ्गं विहरन् सह तच्छ्रिया । श्रीमहाहम्मदावादद्रङ्गं स प्राप सोत्सवः ॥१२७॥

१०९–तपःश्रिया, यशःश्रिया ।

१२४–एतेषां नाम १ सुरताण २ केशव ३ कर्मचन्दानां ।

१२७–तेषां चतुर्णां नवीनशिष्यानां नाम १ सुरताण २ केशव ३ कर्मचन्द ४ नाम्नां श्रीः शोभा तच्छ्रीः तया सह सार्धम् ।

अभिनन्धानवशात्मा सोऽदात् शिष्यचतुष्टयम् । विजयसेनसूरीणां सद्गुरूणां गुणात्मनाम् ॥
श्रीनेमिविजयो १ मुख्यः श्रीसूरविजयो २ऽपरः ।
श्रीकीर्तिविजयो ३ ज्ञेयः कनकविजयो ४ जयी ॥१२९॥
चतुर्णामिति चत्वारि नामान्येषां यथाक्रमम् ।
विजयसेनसूरीन्द्रस्तत्यार्थानि व्यधात्तदा ॥१३०॥ युग्मम् ॥
श्रीनेमिविजयो नाम कनकविजयः पुनः । शिष्यायैतावुभौ सोऽदात् विजयदेवसूरये ॥१३१॥
कपूरचन्दनामानं भ्रातरं लघुमात्मनः । गते नायकदेव्याख्यां मातरं च कियत्क्षणे ॥१३२॥
षोडशस्य शतस्यात्र षट्पञ्चाशत्मवत्सरे । पूर्वरिव महोयोभिरुत्सवैः श्रावकैः कृतैः ॥१३३॥
श्रीमन्मेदतटद्रङ्गे मादीक्षत् शुभे दिने । श्रीपूज्यस्याज्ञया श्रीमत्पद्मसागरपण्डितः ॥१३४॥
—त्रिभिर्विशेषकम् ॥

ततः कपूरचन्दाख्यं मात्रा संयुनमन्यदा । श्रीपूज्यायार्पयामास पद्मविजयपण्डितः ॥१३५॥
श्रीपूज्योऽप्यर्पयामास विजयदेवसूरये । कुंअरविजयेत्याख्यां कृत्वा शिष्यतया तदा ॥१३६॥
कुर्मियर्चि जिनागार-धर्मागाराय यः किल । कुंअरः प्रोच्यते सद्भिः सानुस्वारः स्वरे परे ॥
अनुस्वारो मकारस्य न कदापि स्वरे परे । अनुस्वारः कथं सूत्राभावादत्र स्वरे परे ॥१३८॥
उत्तरमाह—अनुस्वारो मकारस्याऽलुक् समासविधानतः ।
बाहुलकाच नामत्वादार्षत्वाच स्वरे परे ॥१३९॥
यथा वितउ शब्दे हि डउमत्ययशक्तितः ।
सन्धिर्नेह तथार्षोक्तेर्मकाराकारयोरपि ॥१४०॥ युग्मम् ॥
शत्रून् विजयते सर्वान् सर्वत्रात्मीयतेजसा । विजयः प्रोच्यते प्राज्ञैः सर्वलोकसुखप्रदः ॥१४१॥
कुंअरविजयेत्याख्यामन्वर्थामकरोत्ततः । कपूरचन्दशिष्यस्य सद्गुरुर्गुरुवद्धिया ॥१४२॥

१२८—स श्रीमेघविजयवाचकः शिष्यचतुष्टयं नाथ १ सुरताण २ केशव ३ कर्मचन्दान् ४ इत्यर्थः ।

१३२—कियांश्चासौ क्षणश्च कियत्क्षणः । नाथ १ सुरताण २ केशव ३ कर्मचन्दानां ४ चतुर्णां संवत् १६५१ माघसुदि द्वितीयादिवसदीक्षाग्रहणात् कियत्कालस्तस्मिन् कियत्क्षणे गते श्रीमत्पद्मविजयपण्डितः श्रीपूज्यस्य आज्ञया—श्रीविजयसेनभट्टारकाज्ञया आत्मनः स्वीयस्य कीर्तिविजयकनकविजययोः कपूरचन्दनामानं लघुं भ्रातरं च पुनः नायकदेव्याख्यां मातरं शुभे दिने प्रादीक्षत । कियत्क्षणे द्रढयति कस्मिन् षोडशस्य शतस्य षट्पञ्चाशवत्सरे सं० १६५६ वर्षे इत्यर्थः । शेषं स्पष्टम् ।

एवं श्रीविजयादिसेनमुनिपो यस्मै सुशिष्यत्रयम्
प्रादाद् भक्तिवशप्रसन्नहृदयो यत् किं न दत्ते प्रभुः ।
सोऽव्याच्च श्रीविजयादिदेवसुगुरुर्भव्यानपायोच्चयाच्
श्रीश्रीवल्लभपाठकेन कविना व्याख्यात दीक्षोत्सवम् ॥१४२॥

इति श्रीश्रीवल्लभोपाध्यायविरचिते श्रीमद्विजयदेवमहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरिवराणां श्रीविजयसेनसूरिप्रदत्तश्रीकनकविजयादिशिष्यप्रदानवर्णनो नाम अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः

अथ धर्मगुरोः पार्श्वे सर्वा विद्याश्चतुर्दश। सोपाङ्गैकादशाङ्गीयुक् पूर्वाण्यपि चतुर्दश ॥१॥
अधीयानोऽभवज्ज्यायान्वर्धमानो गुणश्रिया।
ओजसा तेजसा चाङ्गे कनकविजयोऽन्वितः ॥२॥ युग्मम् ॥
मन्यत्ता हि वर्मो तस्मिन् वितस्येव सरस्वती। सूत्रार्थावबोधेन कालेष्वध्ययनादिषु ॥३॥
शिष्यैरनेकैर्विद्वद्भिर्युक्तो यद्यपि भूरिभिः। तथाऽप्यनन्यशिष्योऽहमित्यमंस्त सदा गुरुः ॥४॥
शष्कुली तस्य कर्णान्तविश्रान्ते स्तो मनोहरे। चक्षुष्मत्ता तु शास्त्रार्थैस्तथाऽप्यासीज्जगद्धिता ॥
विद्यावदाऽह्वयस्सोऽस्ति श्रीराजनगरे श्रेष्ठ। विद्यावदाता उच्यन्ते विशदा यस्य धीमता ॥
शंसन्तीति विशो विश्वे विश्वे विश्वममूदृशम्। अश्नुते मयशो यस्य विश्वस्ते न ईश्वराः ॥८॥
विवस्वानिव तेजस्वी वचस्वीव बृहस्पतिः।
यशस्वी चक्रवर्तीव जिनशासनशोभकः ॥८॥ युग्मम् ॥
वचीति विवशो नेति शश्वदेति वदन्नदः। यमुशन्ति विशामीशा भागो न विद्यावदाः ॥९॥
उद्धृतैर्जगतो मूलं मूलं स्वीयकुलस्य च। मूलो नाम सदीयोऽस्ति भ्राता भ्राता गदर्पितः ॥
अथात्रावसरे श्रीमद्विजयसेनसद्गुरुम्। विद्यावदाऽभिधः श्राद्धः समापाद्वन्दितुं मुदा ॥११॥
वन्दित्वा साञ्जलिर्भूत्वा विनयात् स उपाविशत्। पुरस्तात् श्रीगुरोर्धर्मकथां शोशुभमानसः ॥
विजयसेनसूरीन्द्र इति तं समुपादिशत्। नवीनप्रतिमानां हि कारणं पुण्यकारणम् ॥१३॥
समाकर्ण्येभ्यपाकर्णि च ईदृग्गुरोर्मुखात्। प्रतिमाकारणे भावमदधाच् श्रीविद्यावदाः ॥१४॥

८—स विद्याविदा ईश्वरो धनी श्रावकः विश्वस्य जगत इष्टं ऐश्वर्यं करोतीत्यर्थः। अश्नी-गर्थेश्वेशां कर्मणीति शेषत्वेन विवक्षिते कर्मणि विश्वस्येति षष्ठी। शेषत्वेनाऽविवक्षिते कर्मणि विश्वमीष्टे इति कर्मापि स्यात्। जगतामीष्टे जगन्तीष्टे इत्यादिवत्। स च यस्य विद्याविदा इति नाम्नः श्रावकस्य अमूदृशं सदयशः विश्वं लोकमश्नुते इति। विश्वे सर्वविशो मनुष्या विश्वे लोके शंसन्ति स्तुवन्ति कथयन्तीति यावत्। अमूदृशमिति किं तदेवाह—विवस्वानिव तेजस्वीत्यादि पर्वं स्पष्टं। एतत्सर्वमग्रतः स्पष्टयिष्यति।

९—स विद्याविदानाम श्रावको भासते दीप्यते। स कः। यं विशामीशा मनुष्याणां स्वामिनो राजान इत्यर्थः। वचीति विवशो नश्वदुत्कृष्टधीर्नेति। च पुनः कथम् वदन्त इति वदन्ति वाक्छन्ति कथयन्तीति यावत्। विवशोऽनिश्वदुत्कृष्टधीरिति वैवः।

१०—तत्र श्रावकः आवकत्वात् ज्ञात्वैवम् श्रावकः भाद्रपदस्य इति श्रावकः श्राद्धः श्रद्धावित्वात्। न लोकाऽस्वश्वानित्वात्तकर्मत्वमिति वक्तीमित्येवं हितीर्थव।

उत्थाय तत आनन्दादागत्यास्थानमन्दिरम् । आकारयच्चतुर्मेऽह्नि स्वाक् प्रतिमाकारिणो नरान् ॥
तेऽप्याजग्मुस्तदाहूताः कृत्वा ज्योत्कारमादरात् । आसन्त पुरतस्तस्य तेनैवोक्तवराज्ञया ॥
तदैवं कथयामास तानर्हद्बिम्बकारिणः । द्वासप्ततिजिनेन्द्राणां कुर्वन्तु प्रतिमा वराः ॥१७॥
तदा तदाज्ञयैवं ते प्रतिमाकारिणो नराः । चक्रुः प्रतिमा अर्हत्प्रतिमाः प्रतिमोत्तमाः ॥१८॥
वर्तमानादिसत्कालत्रयसम्बन्धिनीरिमाः । द्वासप्ततिजिनेन्द्राणां प्रतिमा महिमासमाः ॥
आदायानीय तस्याग्रे ढौकयामासुराशु ते ।
हृष्टमोदत ता दृष्ट्वा श्रावकश्रीविशारदः ॥२०॥ युग्मम् ।
अकारयज्जिनागारं शक्रन्दरपुरे तदा । श्रीचिन्तामणिपार्श्वस्य चैत्यस्यान्तिकमुत्तमम् ॥२१॥
प्रतिमानामथ श्रेष्ठां प्रतिष्ठां श्रीमतिष्ठया । विजयसेनसूरीन्द्रकरात्कारयति स्म सः ॥२२॥
तस्मिन्नवसरे सूरिं विज्ञप्यांह्री प्रणम्य च । वदतांवर इत्याख्यत् श्रावकः श्रीविशारदः ॥२३॥
श्रीकीर्तिविजयाख्योऽयं कनकविजयोऽप्ययम् । शिष्यप्रशिष्यावेतौ ते भ्रातरौ द्वाविमौ मिथः ॥
राजसुन्दरनामाऽयं कुशलविजयः पुनः । कमलविजयश्चैते पञ्च पञ्चमपञ्चमाः ॥२५॥
एतेषां विदुषां देहि पदं पण्डितनामकम् । श्रीसंघाग्रहतः श्रीमद्विजयसेनसद्गुरो ! ॥२६॥
—त्रिभिर्विशेषकम् ।
विजयसेनसूरीन्द्रस्ततस्तस्याग्रहाद् घनात् । ददौ तेषां हृदानन्दि पदं पण्डितनामकम् ॥२७॥
रूपकाणि मुदा प्रादात् तत्पण्डितपदोत्सवे । साधर्मिकादिलोकानां प्रतिदत्तं विशारदः ॥
अन्येऽपि श्रावका इभ्याः सभ्याः समयवेदिनः । धर्माभिलाषिणो रूप्यंश्च कुलंस्मनिका मिथः ॥
अहो पुण्यवतां पुंसां प्रभावः प्रभवत्यपि । मनोरथानां लाभाय परेषां ह्युपकारकृत् ॥३०॥

१९—कथं भूताः प्रतिमाः ? महिमासमाः—महिम्ना माहात्म्येन न समाः सदृशा यासां महिमाऽसमाख्याः ।

२५—पञ्चमेषु चतुरेषु पञ्चमा दृक्षा ये ते पञ्चमपञ्चमाः । पञ्चमश्चतुरे दक्षे इति महेश्वरः ।

२७—तेषां कीर्तिविजय १ कनकविजय २ राजसुन्दर ३ कुशलविजय ४ कमलविजयानां ५ पण्डितपदस्योत्सवः तत्पण्डितपदोत्सवस्तं । प्रतिदत्तमित्यत्र 'लक्षणे १ त्थंभूताख्यान ३ भाग ३ वीप्सासु ४ प्रतिपर्यनव' इति लक्षणेऽर्थे प्रतियोगे द्वितीया । प्रतिदत्तं [illegible] दत्त इत्यर्थः । रूपकाणि नाणकानि । रूपं स्वभावे सौन्दर्ये नाणके पशुशब्दयोरिति महेश्वर [illegible] के रूपकम् ।

२९—कथं [illegible] । [illegible] महेश्वर [illegible] – [illegible] नानुमानिकमिति ।

३०—[illegible] समर्थो [illegible] । अहो इति विस्मये । कथंभूतः प्रभावः [illegible] [illegible] ।

एवं विशारदाः श्राद्धः श्रद्धया धर्मकर्मसु । चकार रूपमेतेषां श्रीपण्डितपदोत्सवम् ॥३१॥
कनकविजयः प्राप्य श्रीपण्डितपदश्रियम् । विनयं लघुवृद्धेषु यथार्हं सदाऽकरोत् ॥३२॥
एवमुद्भूतसद्भूतश्रीपण्डितपदर्द्धिमान् । कनकविजयोऽराजद्राजेव भविता ह्यसौ ॥ ३३ ॥

—श्रीकनकविजयस्य पण्डितपदम् ।

अथास्ति पत्तनं नाम पत्तनं पत्तनोत्तमम् । रत्नयोनि यतो लोकास्तद्ब्रुवन्ति च नापरम् ॥
इभ्या तत्र लालीति नाम्नी वसति कामिनी । श्राविका कामुका नैवं कामुक्यपि कदापि न ॥
शीलवत्यो हि या आसन् श्राविकाः सुलसादिकाः ।

तासामेषोऽवतारः किं जातैषा ब्रह्मचारिणी ॥३६॥

कुतोऽपि सुकृतात्कान्तात् प्राप्तसम्पत्ति-सन्ततिः । कुतोऽपि दुष्कृताद्दुष्टात् सा निष्पति-सुताऽभवत् ॥
(कुतोऽपि दुरितात्मासीन्निष्पतिः सुपतिः श्रिया, श्रियां —इति वा पाठः ॥ ३८ ॥)
मत्वे लक्ष्म्यादिकं वल्गु फल्गु पत्यादिदुःखजम् । सद्धर्मोऽधर्मयोर्बुद्ध्वा सार्हद्धर्मं समाचरत् ॥
अर्हदुक्तप्रकारेण विधिना शुद्धधर्मधीः । व्रतानि द्वादशानसं श्रावकाणामपालयत् ॥४०॥
अथान्यदा फलं भूरि सा गुरोराकर्णोन्मुखात् । शत्रुंजयादितीर्थानां यात्राकरणसंभवम् ॥४१॥
उत्थोत्थाय गुरोरग्रे सर्वसंघसमक्षकम् । आकार्य सर्वदेशानां सङ्घान् सर्वान्मनोरमान् ॥४२॥
शत्रुञ्जयादितीर्थानां यात्रां कर्तास्मि भावतः ।

साऽस्वोचद्दिति सद्भक्त्या सिद्धयतामिदमीप्सितम् ॥४३॥ युग्मम् ।
सिद्धमुत्सवं कृत्वा श्रीसङ्घेन जनोत्तमा । उत्तमाहेऽकरोद्यात्रां शत्रुञ्जयमुख्यार्हताम् ॥४४॥

३४—पत्तनं नाम पत्तनं नगरं अस्ति । कीदृशं पत्तनं नाम पत्तनं पत्तनोत्तमं पत्तनेषु नग-
रेषु उत्तमं श्रेष्ठं पत्तनोत्तमं सर्वनगरोत्तममित्यर्थः । तदेवाह—यतो यस्मात्कारणाल्लोकास्तत्पत्तनं
नाम पत्तनं रत्नयोनि रत्नानामुत्पत्तिस्थानं रत्नखानि ब्रुवन्ति । च पुनः अपरं अन्यद् नगरं
रत्नयोनि न ब्रुवन्ति ।

३५—कामुका मैथुनाभिलाषसहिता नैव । अत्र रिरंसाया अभावादेव जानपदकुण्डेति
ङीप् निषेधे, अजाद्यतष्टाबिति टाप् अपीति पुनरर्थे । कामुक्यपि मैथुनेच्छावत्यपि कदापि कस्मिन्नपि
काले न कामुकीत्यत्र जानपदकुण्डेति मैथुनेच्छायां ङीष् ।

३६—एषा लाली श्राविका । याः सुलसादिकाः श्राविकाः, हि निश्चितं शीलवत्य आसन्
तासां । किमिति वितर्के । एष अवतारो जाता । कथंभूता एषा ब्रह्मचारिणी ।

४४—उत्तमे च तदहश्च उत्तमाहः शोभनं दिनमित्यर्थः । पुंलिङ्गस्त्रीलिङ्ग तत्पुरुषे । अह-
ष्टखोरेवेति टप्रत्यये टिलोपे च उत्तमाहः । श्रीसङ्घेन सार्द्धमित्यूह्य जनोत्तमा, शत्रुञ्जयमुख्यार्हतां
मुख्यार्हत्स्वामिप्रभृतीनाम् । शत्रुञ्जयगिरिनारराणकपुरार्बुदादिप्रभृतितीर्थसमूहानाम् ।

विजयदेवसूरीन्द्रः कनकविजयाह्वयम् । उपाध्यायपदं दत्वा तदिदमवदन्मुखात् ॥ ५८ ॥
इदमिति किं तदाह—   [त्रिभिर्विशेषकम् ।
कनकविजयाख्योऽयमुपाध्यायशिरोमणिः । समक्षं सर्वसंघस्य नानादङ्गागतस्य हि ॥५९॥
निशम्येति ततः संघाः सर्वदेशनिवासिनः । ववन्दिर उपाध्यायकनकविजयाह्वयम् ॥६०॥
धर्माशिषं तदानन्दात् श्रीसङ्घस्य सुखावहाम् । उपादिशदुपाध्यायः कनकविजयाह्वयः ॥६१॥
तद्यथा—अर्हत्सिद्धवराचार्योपाध्यायाः साधुसंयुताः । श्रःश्रेयसं सदा कुर्युः पञ्चैते परमेष्ठिनः ॥
श्रुत्वोपदेशं ते सङ्घा उदतिष्ठंस्तदग्रतः । तेषां पाणौ च रूप्याणि ददौ लालीः स्वलीलया ॥
सर्वान्सङ्घांस्ततो लालीः मभोज्याद्भुतभोजनम् । विससर्जातिसत्कारपरिष्कारादिदानतः ॥
लाली श्राद्धी चकारैवमुपाध्यायपदोत्सवम् । कनकविजयो जीव्यात् स चिराय यदीयकम् ॥
—इति श्रीकनकविजयस्य उपाध्यायपदम् ॥
अथास्ति भरतक्षेत्रे सर्वस्वर्गसुखादिकम् । निर्विपत्तिकसम्पत्तिपुरमीडरसत्पुरम् ॥ ६६ ॥
कल्याणमल्लभूपालः सर्वकल्याणकारणम् । निरुपद्रवसाम्राज्यं भुनक्ति व्यक्तनन्तिनः ॥६७॥
व्यवहारी सदाहारीश्वरेश्वरपुरस्कृतः । तत्र भाविभद्रात्मः श्रेष्ठी वसति नाकरः ॥ ६८ ॥
(नाकरः श्रावकोऽवसत्—इति वा पाठः)
सद्दानादिगुणान् यस्य त्रिदशैः सहजूरपि । वक्तिरन्यो न किं वक्तिः सहजूरस्ति तत्सुतः ॥
(वक्तिरन्यस्य का वार्ता सहजूस्तत्सुतोऽभवत्—इति वा पाठः)
विगताजुः कदाप्याजुः कारायां नुर्न कस्यचित् । यस्य प्रभावतो लोके सहजुः स विगजो ॥

६४—अतिसत्कारेण परिष्कारादीनामलङ्कारादीनां दानं अतिसत्कारपरिष्कारदानं तस्मात्-विसत्कारपरिष्कारादिदानतः । अलङ्कारस्तु भूषणं परिष्काराभरणे चेति हैम । परिष्कार इत्यत्र मूर्धन्यषकारोपमध्यः ।

६८—तत्र श्रीमति ईडरपुरे श्रेष्ठी नाकरो वसति । कथंभूतः ? व्यवहारी । पुनः कथं० ? यदा निरन्तरं हारीश्वरेश्वरपुरस्कृतः—हारयो मनोहरा ये ईश्वरा धनिनस्तेषामीश्वराः स्वामिनस्तैः पुरस्कृतो यस्स । तथा चाहहारिताचिरं मनोहरमिति हैमः । पुनः कथंभूतः ? भाविभद्रात्मा कल्याणयुक्तदेह इत्यर्थः ।

६९—तत्सुतः नाकरसुतः । जूराकाशसरस्वत्यो पिशाच्यां जवनेऽपिचेति महेश्वरः ।

७०—यस्य प्रभावतो लोके कदापि कस्यापि नुर्नरस्य कारायां बन्दी न आजुः न दण्डोऽभवत् । कथंभूतः सहजूः ? विगताजुः—विगता आजूः दण्डक्षेपो यस्मात्स विगताजूः । अत्र [illegible] दर्शितम् । सहजूरेवेश्वयेव स्वस्मात्तेषां च कल्याणानि तानि दृश्यते कार्येषु प्रवर्तते

दानैर्यस्य पराभूताः प्रस्रवद्भिः करात्सदा । असूयया हि मातङ्गाः स्रवन्त्यद्यापि सप्तधा ॥७१॥
क्षिपन्ति मस्तके रेणून् सहन्ते चातपादिकम् । लभन्ते नैव दातृत्वं सोऽभूद्दातृत्तमो भुवि ॥७२॥
अथायाद्विहरंस्तत्र विजयदेवसद्गुरुः । सहजूप्रमुखाः श्राद्धा अपि तं वन्दितुं गताः ॥ ७३ ॥
अभिवन्द्योत्सवं कृत्वाऽन्तरा नगरमानयन् । विजयदेवसूरीन्द्रं श्रावकास्त उपाश्रये ॥ ७४ ॥
(अभिवन्द्योत्सवं कृत्वाऽन्तरा नगरमानयन् । विजयदेवसूरीन्द्रं सहजूः स उपाश्रये-पाठान्तरम्)
धर्मोपदेशमाकर्ण्य नत्वा चोत्थाय सोऽकरोत् । पुष्पाणीव गुरूण्याणि महाजनकरास्पदे ॥७५॥
अथान्यदा समुत्पन्नविवेकाधिकृतेरितः । इति व्यज्ञपयद्भक्त्या सहजूः श्रावको गुरुम् ॥७६॥
इतीति किं तदाह—
जानासि यं त्वं शिष्यं सर्वाङ्गीणगुणाश्रयम् । श्रीगुरो प्रापयद्धार्क्षं वर्याचार्यपदश्रियम् ॥
विजयदेवसूरीन्द्रस्ततः प्राहेति तं प्रति । अस्मिन् कार्ये करिष्यामि ध्यानमभ्युदयावहम् ॥७८॥
ततस्तं सहजूः प्राह प्रपन्नस्त गुरो द्रुतम् । ध्यानार्हं वीक्ष्यते वस्तु यत्तद् ब्रूहि नयामि तत् ॥७९॥
अस्मिन्नवसरे श्रीमत्सावलीग्राम उत्तमः । वर्तते सावली तस्य प्रबलीष्ट महीपतिः ॥८०॥
परीहारकुलव्योमव्योमरत्नसमद्युतिः । पुंरत्नं रत्नसिंहाख्यः श्रेष्ठी वसति विश्रुतः ॥८१॥
अनेकजीवहिंसाया निवारणकृतोद्यमः । रत्नसिंहोऽलिखत्पत्रं सूर्याह्वानाय हर्षितः ॥८२॥
यद्यथा—स्वस्तिश्रीशोभितं प्रणम्य श्रीपरमेष्ठिनम् ।
ईड्ये पण्डिता पत्तनमानीडरसात्पुरम् (—पत्तनमिति वा पाठः) ॥८३॥
विजयदेवसूरीन्द्रं प्रणम्य तत्र साम्प्रतम् । प्रणत्य रत्नसिंहोऽयं श्राद्धो विज्ञपयत्यथ ॥८४॥
श्रीगुरुदास प्राप्तश्रीसमाजविराजितः । सावलीग्राममागच्छ सर्वजीवहिताय हि ॥८५॥

ऽं हठात् केषु अधिक्षिपन्तीति भावः । निष्ठिवजुष्टित्यागर । यद्यप्याजूनरके हठात् क्षेपस्य नाम, एवमन्यत्र मानान्यावैशेषयोरभेदेन विवक्षणात् अन्यत्रापि हठात्क्षेप नाम न दुष्टम् ।

८१—अनया सप्तभिः प्रकारैः ।

८०—सा प्रवाहरूप्यपद्दवीत्यया यस्यै मातिनीनैः शीतः सावली । समासप्र-स्वरूपलीकरद इत्यर्थः । यत्र ग्रामने स्वादिरामनेत्री । अत एव सवली प्रहृष्टं बहुविधप्रधान बहुं दैन्यं दवर्थं दुग्ध्वामीति सवली । अन इनि टनो इति । इनिः बहुविधपीत्ययुक्त इत्यर्थः । सर्वैरपि: राजा तस्य सावलीग्रामस्य ईष्टे राज्यं करोतीत्यर्थः । तत्पोत्पत्र अविनयदेवेशां चकेर्नापि क्षेत्रेव विराधिते कर्मणि षष्ठी । अत्र शेषो नाम कर्मत्व अविवक्षामात्रस्य इत्यर्थः । यतः हेतस्य सम्बन्धस्य भावः शेषत्वं सम्बन्धत्वमित्यर्थः । तेन विवक्षिते कर्मणि षष्ठी ।

८३—स्वस्तिनामा आपूर्णा श्रीः शोभा यया । तयाभेव शङ्गेन विराजितः सावला-श्रीवासादिस्तिः ।

जीवहिंसा प्रभूतात्र जायते पापभूपतः । त्वदागमनतस्तस्या निवृत्तिर्भविता चिरम् ॥८६॥
अस्मिंश्च कार्ये आलस्यमपास्यागच्छ सद्गुरो ! । भवन्ति साधवः सर्वे धर्मलाभार्थिनो यतः ॥
स्वस्ति श्रीजिनमानम्य श्रीमदीडरसत्पुरे । सहजूप्रमुखान् श्राद्धान् रत्नसिंह इति स्तुते ॥
इतीति किं तदाह—
धन्या यूयं यतो नित्यं विजयदेवसद्गुरोः । वन्दध्वे चरणाम्भोजं लभध्वे च फलं श्रियः ।
वारंवारमिति स्तुत्वा तांश्च विज्ञपयत्यथ । अद्य यावः प्रसद्यात्र मुञ्चेयुः श्रीगुरुं गुरुम् ॥९०॥
अत्रापि भविता लाभो नव्यो नव्यो दिने दिने । प्रसादाद् भवतामेव विचारो नात्र कश्चन ॥
विलिख्य पत्रयोर्द्वन्द्वमद्वन्द्वेन स्वचेतसा (–मद्वन्द्वेन स्वपाणिनेति वा पाठः) ।
रत्नसिंहस्तदा प्रादात् प्रेष्यहस्ते प्रशस्तधीः ॥ ९२ ॥
तदानीं प्रोचलत्प्रैष्यः प्रचलंश्चापदीडरम् । गुरोरन्तिकमागच्छत्प्रादात्पत्रे च सद्गुरोः ॥९३॥
प्राप्यच्छ्रीगुरुः पत्रं द्वितीयं सहजूकरे । उभाववाचयेतां तौ ते पत्रे प्रीतचेतसौ ॥९४॥
सहजूः प्रमुखाः सर्वे श्राद्धा ईडरवासिनः । विजयदेवसूरीन्द्रमिति व्यज्ञपयंस्तदा ॥९५॥
इतः प्रचल सूरीन्द्र गत्वा तं तत्र तोषय । धर्मैर्जीवदयादानब्रह्मचर्यादि सम्भवैः ॥९६॥
श्रावकं पोषयित्वा तं कृत्वा ध्यानं हिताय च । अत्रास्मांस्तोषयागत्य वर्याचार्यपदोत्सवात् ॥
इत्युक्तः सहजूमुख्यैः श्रावकैरादरात्ततः । विजयदेवसूरीन्द्रः प्राचालीत्परिवारयुक् ॥९८॥
विहरन्स क्रमात्प्राप सावलीग्राममुत्सवम् । कृत्वा श्रीरत्नसिंहोऽपि तमुपाश्रयमानयत् ॥९९॥
धर्मोपदेशमाकर्ण्य दृष्ट्वा चोग्रक्रियापरम् । श्रीगुरुं स्वशरीरे स प्रापानन्दमपापधीः ॥१००॥
यावच्छ्रीमद्गुरोरत्र स्थितिः प्रीतिविधायिनी । तावदत्रापवित्रा नो भवित्री मारिरीतिहृत् ॥
वितथा वितथामे मा वाचो वाचंयमाधिपे । निवसत्यवनीनाथ रत्नसिंहोऽभ्यधादिति ॥१०२॥
सर्वथा निर्व्यथा लोका अभया अभया इव । भवितारोऽस्य माहात्म्याभिर्धनाः सधना अपि ॥

८८–इति स्तुत इति स्तौति ।   ८९–धन्येति सुगमम् ।

१०२–युग्मम् । हे अवनीनाथ ! भूपाल ! वाचंयमाधिपे श्रीविजयदेवसूरौ निवसति सति स्थितिंकुर्वति सति इमाः पूर्वोक्ताः–मारिर्नो भवित्रीत्यादि लक्षणानि, वेदमानाश्च सर्वथा निर्व्यथा लोका इत्यादिलक्षणा वाचो वाण्यः वितथा असत्याः मा वितथाः मा भवन्तु इति रत्नसिंहोऽभ्यधात् अकथयत् । वितथा इति तनुविस्तारे इत्यस्य विपूर्वकस्य कर्मार्थस्य माङ्युक्ति लुङि च्लिलुकि इति च्लिप्रत्ययः, च्लेः सिच् इति सिच् प्रत्यये तनादिभ्यस्तथा सोरिति वैकल्पिक-सिचो लोपे अनुदात्तोपदेशेति अनुनासिकलोपे न माङ् योगे इत्यनेन अडागमस्य लोपे च प्रथम-पुरुषस्यैकवचनम् ।

१०३–भवितारो भविष्यन्तीत्यर्थः ।

तस्याः शरीरमेर्वद्रौ हारमौक्तिकदम्भतः । सुराः स्तनसुरद्रूणां क्रीडन्तीवोपरिस्थिताः ॥१२॥
तस्याः शरीरमेर्वद्रौ हारमौक्तिकदम्भतः । सुराः स्तनासनासीनाः सेवन्ते सेवका इव ॥१३॥
सिद्धिर्मनोरथानां स्यादस्माकं भविता शुभा । अस्याः प्रभावतो दिव्यादिति निश्चित्य चेतसि ॥
तस्याः शरीरमेर्वद्रौ हारमौक्तिकदम्भतः । सुराः सूरिं नमामेत्यऽनया सह स्थिता इव ॥१४॥
यत्सौवर्णाङ्गदम्भेन मेरुः सेवत एव ताम् । भवान्यदाता दाताहमिति चेतस इच्छया ॥१५॥
त्वत्सेवैकेन्द्रियतां पञ्चेन्द्रियतां चेल्लभेयहि । तदा दानं प्रदायाहं प्रभवाणि बहुप्रदः ॥१६॥
विचिन्त्येति यदीयाङ्गीभूयमेरुर्गिरीश्वरः । निषेवत इवाजस्रं सा देवी दीप्यते न कैः ॥ पुनश्च
कल्याणं नाम मे लोकाः आहुः सप्तसु धातुषु । शकुनादिषु कार्येषु मामकल्याणकं पुनः ॥
अतः सार्थं हि कल्याणं दधे नामेति वाञ्छया । तत्सुवर्णाङ्गदंभाद्यां सुवर्णं श्रयतीव किम् ॥
यत्सेवां सर्वदां पूर्वं सुवर्णं सर्वदा व्यधात् । सुवर्णमिति नामातो हेम्नस्तां स्तुत पण्डिताः ॥
यस्याः स्तनद्वयं वीक्ष्य कविः काममदं सदा । कामकुम्भमिहाप्सुश्चादिव मन्येति शङ्कते ॥
विरागे न कथं सा हि पश्यतामीहितं नृणाम् । कामदं हृदि या धत्ते कामकुम्भे स्तनद्वयम् ॥

इन्द्रादीनामेव प्रवरधारकलक्षणाः, तेषां सुखावहाः सुखकारिण इत्यर्थः । पुनः कथंभूताः ? भा इव दन्तेष्वग्रे भूताः भूपा इव । भुवश्च भूमयः, नृपाश्च राजान इति द्वन्द्वे भूपाः भूमिराजपाला इ। यथा भूमयो राजानश्च आधेयानां मनुष्यादीनां धरापाराणां च गृहादीनां भुवने सुखावहा भवन्ति तथा भूपा अपि [illegible] सुन्दराकारशोभाप्रभृतीनां आधेयानां धरापाराणां हारादिषु भूषाधारणां च सुखावहा भवन्ति—इति भावः ।

१२६—[illegible] । मेरुर्वैरसौवर्णाङ्गदम्भेन यस्याः शासनदेव्याः [illegible] सुवर्णवद्दीप्तिः [illegible] तेन यत्सौवर्णाङ्गदेन करणभूतेन तां शासनदेवीं सेवते स्म [illegible] इत्यर्थः । यथा अहं अदाता दाता भवामि इति चेतस इच्छया ।

१३१—सुवर्णम् । [illegible]—सुवर्णं तां शासनदेवीं, तत्सुवर्णाङ्गदम्भात् यस्याः शासन देव्याः सुवर्णाङ्गदम्भात् देवसर्वेषु [illegible] श्रयति सेवते इव । कथं अतः कारणात्, [illegible] कथं कल्याणं नाम दधे [illegible] इति वाञ्छया, अतः कारणादिति । [illegible] सप्तसु धातुषु मे मम कल्याणं नाम आहुः कथयन्ति । पुनः शकुनादिषु कार्येषु अकल्याणं [illegible] आहुः । अतः कारणादित्युक्तिः ।

[illegible]—[illegible] यत्सेवां शासनदेव्याः [illegible] सर्वदा [illegible] सुवर्णमिति नाम अभवदिति [illegible] । [illegible]

भावितात्माथ देवीति सूरीन्द्रं प्रत्यबोधयत् । कनकविजयः शिष्यो भविता ते गच्छनायकः ॥
अमुष्मोऽपरो दक्षो न विपक्षापनायकः ।
स्थूललक्षो लसत्पक्षो गुणलक्षोऽक्षदर्शकः ॥१४८॥ युग्मम् ।
विजयदेवसूरीन्द्रमित्यावेद्य न्यवर्तत । आज्ञया सूरिराजस्य ततः शासनदेवता ॥१४९॥
उज्ज्वलान्माघमासस्य दिनात्षष्ठाद्यथाद्भुतात् । दिने वैशाखमासस्य तृतीये मञ्जुलोज्ज्वले॥१५०॥
लग्ने प्रभाते संजाते परदेशमहाजनाः । आगता वन्दितुं तत्र ज्योतीरूपं जगद्गुरुम् ॥१५१॥
रत्नसिंहादयोऽप्यन्ये सावलीग्रामवासिनः । विधायानेकधानेकान् धवन्दुस्तं महोत्सवात् ॥
रत्नसिंहस्तथान्येऽपि परदेशमहाजनाः । ददू रूप्याण्यनेकानि जातस्पर्द्धा बुधा इव ॥१५३॥
सहजूः समयेऽथास्मिन् कृतपूर्वलसद्वचाः । सुधीहरपुराद्दातुमगुश्चच्छ्रीगुरुं नरम् ॥१५४॥
ततः श्रीसहजूमैत्र्यः सावलीग्राममाययौ । ददौ च शिरसा नत्वा श्रीसूरेः करपङ्कजे ॥१५५॥
पत्रं प्रवाच्य सूरीन्द्रः स्वकाकारणपेदकम् । रत्नसिंहाभिधं श्राद्धं तदा माज्ञापयन्मुदा ॥१५६॥
सोऽप्यवादीत्तदा सूरिं तोषाय सहजूहृदः । गच्छ स्वच्छमते गच्छनाथ स्वहितमाचर ॥
माचालीत्परमप्रीत्या महताडम्बरेण च । श्रीसूरिर्भूरिभिः श्राद्धैः साधुभिश्च सह श्रिया ॥
श्रुत्वाथ सहजूः सूरिं सामायातं पुरान्तिके । श्रीसङ्घयुतोऽगच्छत् सम्मुखीनो नृणामिनः ॥
अभिनम्य निशम्योपदेशं च श्रीगुरूदितम् । सहजूर्हर्षितः सूरिं समानयदुपाश्रये ॥१६०॥
ददौ धर्माशिषं पूज्यः श्रीसंघाय विशेषतः । अभ्युत्तस्थौ ततः सङ्घः तस्मै रूप्याण्यदाच्च सः॥
सर्णं लब्धं कदेत्याह सहजूर्विनयाद्गुरुम् । श्रावकास्तव भूयांसः सन्त्यन्येऽपि महर्द्धिकाः ॥१६२॥

१४७—भावितो वासितो मिश्रितोऽर्थात् ज्ञानेनात्मा चित्तं यस्याः सा भावितात्मा । श्रावगच्छभारसारसूरिमन्त्राधारश्रीकनकविजयोपाध्यायेत्यर्थः।अथेति ह्यातोऽनन्तरम्।'आत्मा चित्ते धृतौ यत्ने' इत्यनेकार्थः। स्थूललक्षो बहुप्रदः। यद् हैमः—'स्थूललक्षदानशौण्डो बहुप्रदे' इति।'अक्षदर्शकः न्यायानां द्रष्टा, द्रष्टा तु व्यवहाराणां प्राड्विवाकोऽक्षदर्शकः' इति हैमः । 'विवादानुगतं पृष्ट्वा स सभ्यस्तत्प्रयत्नतः । विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः'—इति कात्यायनः । लसन्तः पक्षाः सहायाः सहाया वा यस्य स लसत्पक्षः । लसन् पक्षो बलं यस्येति वा लसत्पक्षः । यद्वा लसन्पक्षः साध्यं यस्य स तथा । अथवा अकारप्रश्लेषात् अलसत्पक्षः—न विद्यते लसन् पक्षो विरोधी यस्य सः अलसत्पक्षः । 'पक्षस्तु मासार्धे गृहसाध्ययोः। चुल्ली रन्ध्रे बले पार्श्वे सध्यौ-केशात्परश्चये । पिच्छे विरोधे देहाङ्गे सहाये राजकुञ्जरे' इति सर्वत्र हैमः ।

१५४—कथंभूतः सहजूः कृतं विहितं पूर्वं प्रथमं लसद्विलसद्वचः श्रीकनकविजयोपाध्यायस्य आचार्यपददापनमहोत्सवविधानलक्षणं वचनं येन स कृतपूर्वलसद्वचाः ।

१६१—स सहजूः श्रावक इति शेषः ।

तेषामग्रेऽस्म्यहं सूरे सर्वदा किमहर्द्धिकः । त्वदाज्ञाकारकः शश्वत्सेवकस्ते तथापि यत् ॥१६१॥
इति मे वाञ्छितं कर्तुं भव योग्यो मदाग्रहात् । कनकविजयायाऽत्र देयाचार्यपदं मुदा ॥१६२॥
करवाणि यथालक्ष्मि वर्याचार्यपदोत्सवम् । फले लक्ष्म्या लभे चाग्न्यमुत्पन्नायाः सुपुण्यक॥
—चतुर्भिः कलापकम् ।

श्रीधर्मविजयो नाम महोपाध्याय उद्गतः । तपागच्छेऽकैवद्द्योतनास्ति प्रामाणिकशिरोमणिः ॥
सुकृतानां शुभोपायः सद्गुणश्रीलयालयः । निर्व्यपाय उपाध्यायश्चारित्रविजयाह्वयः ॥१६॥ श्री
तपःश्रीचारुलावण्यं लावण्यविजयोऽपि च । वृद्धोपाध्यायकद्वायः शास्त्राध्यायपरायणः ॥
पण्डिताः पण्डितोत्कृष्टाः श्रीधनविजयादयः । रञ्जितास्तद्गुणैस्तेऽपि सूरिं विज्ञपयन्ति ॥
इतीति किं तदाह—

कनकविजयाख्येऽस्मिन् श्रीसूरिपदयोग्यता । अतः कुरु गुरुश्रेयः सहजूश्रावकोदितम् ॥१७॥
ततः सूरिः प्रसन्नोऽभूत्तद्वचोऽङ्ग्यकरोच्च सत् । चारुभिश्चाटुभिः कष्कः सुप्रसन्नो भवेन्नहि ॥
सहजूस्य सन्तुष्टमनाः स्वगृहमागमत् । तदैवाचालयत्प्रेष्यानाह्वातुं श्रावकान् घनान् ॥१७२॥
श्रीमदहम्मदावादे स्तम्भतीर्थे च पत्तने । एवमादिषु सर्वेषु नगरेष्वपरेष्वपि ॥१७३॥ पुण्य
गतानन्नुग्रहाहूतास्तत्रत्यास्ते महाजनाः । उत्सुका वन्दितुं तं च द्रष्टुं सूरिपदोत्सवम् ॥
मण्डपद्दवे स्थाने मण्डपं कार्यपण्डितः । विचित्रचित्रसंयुक्तवस्त्रैर्नेत्रोत्सवप्रदम् ॥१७५॥
समवर्णोन्नतो मेघ इवाभाति स मण्डपः । विचित्रैः मधुरासारैः प्रवर्षन् हर्षयन् जनान् ॥
दुष्काला दुःखसन्दोहान् निरस्यन् दुस्सहान् भृशम् ।
शोषयन् द्विषतां हृदि दारिद्र्याणि नृणां क्षणात् ॥१७७॥ पुण्य
समवर्णानि वर्णानि सुगमल्लादिकानि हि । भिन्नसन्ध्येकसन्धीनि यत्राभ्राणि विरेजिरे ॥
इन्द्रचाप इव भान्ति स्म पीतकौशेयमंचयाः । विधुताम्बरशात्कारा मध्यस्था निर्गता बहिः ॥
सरन्तन्नन्दितं नन्दि मण्डपे सोऽभ्यमण्डयत् । शोभमानं चतुर्दिक्षु चतुरारिमितारिभिः ॥

१६१—पुण्यिनो महर्द्धिकः किमर्द्धिक अत्र किमित्यव्ययं निरर्थकम् ।

१६९—तद्गुणैः कनकविजयगुणैः ।

१७३—नरिन्ति श्रीविजयदेवसूरिम् ।

१७५—कार्ये अर्थाद्धर्मकार्ये पण्डिताः कार्यपण्डिताः सहजूश्रावक इत्यर्थः ।

१७७—सम्पत्तौ सनाभयः ... [illegible] । 'मण्डपोऽपी सनाभव' इत्यपर । 'मण्ड'
[illegible] ।

१७८—वर्षति मण्डपे मेघे च ।   १७९—वर्षति मण्डपे मेघे च ।

कस्मादिदपि शुल्वेति समवसरणं भुवि । साक्षात्सुचतुरं सारं रचितं चतुरैर्नरैः ॥१८१॥
विलोकितुमिवायातस्तं नन्तुं चैव तज्जिनान् । विमानोऽयमिति माहुर्यं बुधाः सुरभासुरः ॥
उन्नतोल्लसत्सूद्वाराः स्त्रियोऽथ सहजूगृहे । अनेगीयन्त गेयानि सर्वदोषापहेऽपि च ॥१८३॥
वादित्राणि पवित्राणि बहुनानीन्यहर्दिवम् । सुस्वरस्वर्गभेर्तृणि वादका अभ्यवादयन् ॥१८४॥
अवदन् बन्दिनो लोका यशांसि वदनाम्बुजात् । गुरूणां श्रावकाणां च द्वारं द्वारं गृहे गृहे ॥
पुण्याहानि दिनाहानि पुण्यवाचीश्च रावयः । अभवन्नत्र सर्वत्र नागरा अनुवासिति ॥१८६॥
एवमाविरभूद्रङ्गे मनिमन्दिरमुत्सवः । उत्सवः पुण्यवस्तूणां भवेल्लोकोत्सवाय यत् ॥१८७॥
श्रीद्वयष्टीतिनमे वर्षे षोडशस्य शतस्य हि । वैशाखशुक्लषष्ठेऽह्नि मातर्भास्वति भास्वति ॥
विजयदेवसूरीन्द्रो मण्डपं तं समागमत् । सोत्सवः साधुभिर्युक्तः कनकविजयादिभिः॥१८९॥
श्रावकैः श्राविकाभिश्च नागरैश्च जनैर्युतः । वीक्ष्यमाणो गुणैर्गीतैर्गीयमानः पदे पदे ॥१९०॥
त्रिभिर्विशेषकम् ।
उपोषकारमर्हतां नन्दीं कारयित्वा यथाविधि । कनकविजयाख्यस्य सूरिमन्त्रं श्रुतौ ददौ ॥
दत्वा सूरिपदं दत्तानन्दवृन्दो जगद्गुरुः । विजयसिंह आचार्य इति नामाभ्यधान्मुखात् ॥
(-इत्याख्यत् स्वमुखात् सुखात् -इति वा पाठः)
श्रीकीर्तिविजयाख्याय लावण्यविजयाय च । उपाध्यायपदं दत्वा सूरिरेवमभाषत ॥१९३॥
श्रीकीर्तिविजयाख्योऽयं लावण्यविजयो लघुः (-लावण्यविजयः पुनः -इति वा पाठः)
उपाध्यायाविमौ गच्छप्रभावरूनमौ समौ ॥१९४॥ युग्मम् ।
ततः श्रीसहजूनामा श्रावकः श्रद्धयाऽशृणोत् । विजयसिंहसूरीन्द्रप्रोक्तां धर्माशिषं सुखाम् ॥
सुखस्य मासये भूयात् सम्पदेऽभ्युदयाय च । जयाय च सदारीणां पञ्चते परमेष्ठिनः ॥१९६॥
श्रुत्वेत्युत्थाय चोत्साहात् ताम्रत्वा सहजूस्ततः । श्रीसङ्घानां समस्तानां करे रूप्याण्यदान्मुदा ॥

१८२–विलोकयितुं समिति नन्तुं । विलोकयितुं सुगमपदव्याख्या–बुधाः पण्डिता यं मण्डपं इति माहुः । इतीति किं ? च. पुनरर्थे । तज्जिनान् तस्मिन्मन्दो जिना अर्थाज्जिनप्रतिमा-स्ताञ्जिनाश्चतान् नन्तुं वन्दितुं आयात इव अयं विमानो व्योमयानं न तु मण्डप इत्यर्थः । 'व्यो-मयानं विमानोऽस्त्री' इत्यमरवचनात् । विमानशब्दस्य पुंनपुंसकलिङ्गत्वाच्च पुल्लिङ्गनिर्देशः । कथंभूतो विमानः ? सुरभासुरः सुरैर्देवैर्भासुरः सुरभासुरः । मण्डपे हि देवानां चित्राणि स्फुरन्तो विमानस्यापि सुरसहितत्वं दर्शितम् । किं दृश्वा विमान आयात इत्याह–चतुरैर्नरैर्भुवि साक्षात् सारं समवसरणं रचितं इति कस्मादिदपि श्रुत्वा । समवसरणं हि सुरा एव रचयन्ति न नरा इति सुराणामाश्चर्यमतः सुररहितविमानागमनं समुचितं । कथंभूतं समवसरणं सुचतुरं शोभनाश्चत्वा-रोऽर्थात् जिना यस्मिंस्तत् सुचतुरं । अचतुरविचतुरसुचतुरेति अच् प्रत्ययनिपातात् सिद्धिः।

आहूय सर्वदेशानां श्रीसंघान् सोऽभ्यभोजयत् । सत्कारं चोत्तरं कृत्वा यथास्थानमचालयत् ॥
कनकविजयाख्यस्य जातः सूरिपदोत्सवः । जाते तस्मिन्ननेकेषां पुंसामासीन्महोत्सवः ॥१९९॥
विजयदेवसूरीन्द्रः कुर्वन्नेवं महोत्सवान् । विजयसिंहसूरीन्द्रयुतो जयतु भूतले ॥२००॥
गुरुशिष्यावुभौ सूरी समासीनौ विराजताम् । श्रीतपागच्छपुंरूपनेत्रे इव विकस्वरे ।
(–नेत्रे इव मनोहरे –इति वा पाठः) ॥...
गुरुशिष्यावुभौ सूरी समासीनौ विराजताम् । श्रीतपागच्छपुंरूप कर्णाविव विभूषकौ ॥२०...
गुरुशिष्यावुभौ सूरी समासीनौ विराजताम् । श्रीतपागच्छपुंरूपहस्ताविव तरस्विनौ ॥२०...
वाञ्छितानां सुकार्याणां कारकौ स्वेच्छयाद्भुतम् ।
दानानां दायकौ वैरिवाराणां च निवारकौ ॥२०४॥ युग्म
एकस्तीर्थंकरो यत्र द्वितीयस्तत्र नो भवेत् । एतौ मीतौ मिथःसूरी भात इत्यद्भुतं जने ॥
एकस्मिन्नेव साम्राज्ये सम्राडप्येक एव हि । पुण्याधिकमिदं यत्तु सम्राजौ राजतो ह्यमू ॥
आसीनौ सम्मुखीनौ तौ सूर्याचन्द्रमसाविव । भातः प्राच्यां प्रतीच्यां च प्राननेत्रसुखावहौ ॥
(–प्रभाते पूर्णिमास्थितौ –इति वा पाठः)
एवं तौ विहरन्तौ द्वौ गुरुशिष्यौ गणाधिपौ । पुष्पदन्ताविवोद्यातौ दीप्येते इव भूतले ॥
—इति श्रीविजयदेवसूरिशिष्यश्रीविजयसिंहसूरिवर्णन
अथास्मिन् समये क्षेत्रे भारते मरुमण्डले । श्रीमद् योधपुरं नाम पुरं पुरपुरोत्तमम् ॥२०९॥
यत्र वाप्यो घनाः कूपाः सरसानि सरांस्यपि । मनोऽभिरामा आरामाः सौवर्गेभ्योऽप्रिमाः सुख...
महौजास्तत्र राजास्ति गजसिंहाभिधः सुधीः । पराक्रमपराभूतपरचक्रपराक्रमः ॥२११॥
सिलेमसाहिरानन्दात् पातिसाहिः प्रसन्नहृत् । महाराजा अयं हीति यं प्राहोत्तमराजसु ॥२...
श्रीमानमरसिंहाख्यस्तस्य पुत्रो महर्धिकः । जयन्त इव शक्रस्य युवराजो विराजति ॥२१...
तत्र जेसाभिधः श्रेष्ठी श्रेष्ठोऽन्यव्यवहारिणाम् । राजमान्यो जगन्मान्यो न्यवसत्सरसर्द्धिक...
तस्य पुत्रास्त्रयोऽभूवंस्त्रयो वेदा इवोत्तमाः । सूरसिंहमहीपालमहामात्रा महौजसः ॥२१...
तेष्वाद्यो जसवन्ताख्यो जयराजो द्वितीयकः । तृतीयो जयमल्लाख्यो नामतोऽभी यथाक्रम...
आदिमौ त्रिषु नाऽभूतां पुरुषायुषजीविनौ । आयुषः क्षयतोऽभूतां स्वर्गिणौ स्वर्गविष्टपं ।

२०१–समं सदृशं 'बराबर' इति भाषा । आसीनौ उपविष्टौ समासीनौ ।

२१०–सुखानीव आचरन्ति सुखंति । सर्वप्रातिपदिकेभ्यः क्विप् वाचारे–इति आ...
ऽर्थे क्विपित्रलये सर्वस्य क्विपो लोपे पचाद्यचि सुखन्तीति सुखाः सुखानीव आचरन्ति ।

२१७–पुरुषस्यायुः पुरुषायुषं अचतुरेति अजंतो निपातः । पुरुषायुषं जीवत ...
ति इति पुरुषायुषजीविनौ ।

अभूवन् जसवन्तस्य पुत्रा एते षडुत्तमाः । षण्मुखमुखाकारा विराजन्ते जयोद्यमाः ॥२१८॥
सामलः १ सुरताणश्च २, श्रीसहस्रमल्लो ३ ऽपि च ।
वर्धो ४ पाचा ५ तथा पत्ता ६ नामतश्च यथाक्रमम् ॥२१९॥ युग्मम् ।
अविषादः सदा सादाः शोभाः शोभाधनाश्रयः । जगत्त्रुतीय आभान्ति जयराजसुता अमी ॥
श्रीमज्जेसाभिधस्यापि तृतीयस्तनयोऽस्ति । मर्त्येषु जयमल्लोऽयं जयमल्लमतल्लिका ॥२२१॥
श्रीमन्नपनसिंहाख्यः सुन्दरः सुन्दरो नृणाम् ।
आसा नरहरः सन्ति जयमल्लसुता इमे ॥२२२॥
एभिः पुत्रैः शुभैर्दीप्तो भ्रातृव्यैश्च पुरोदितैः । युतोऽन्यपरिवारेण जयमल्लोऽत्र शोभते ॥२२३॥
राजसिंहमहाराजः प्रसन्नहृदयोऽन्यदा । श्रीसुवर्णगिरे राज्येऽभ्यपिञ्चज्जयमल्लकम् ॥२२४॥
तत्रान्यत्र ततो धात्र्यां सर्वत्र मरुमण्डले । एवं क्रमेण साम्राज्यश्रियमीष्टे स भाग्यवान् ॥
कुमारपालभूपाल इव स व्यलसत् श्रियः । दानेन जिनधर्मेण दययाऽद्भुतया भृशम् ॥२२६॥
श्रीमत्सुवर्णगिर्यादिद्रङ्गशत्रुञ्जयादिषु ।
चैत्योद्धारविधानेन यात्रया च प्रतिष्ठया ॥२२७॥ युग्मम् ।
एवमेतानि वाक्यानि कुर्वन् षडपि सम्प्रति । योऽधुज्यने स साम्राज्यं जयमल्लश्च वर्तते ॥२२८॥
आहूयज्जयमल्लोऽयं विवंदिषुरयाऽन्यदा । विजयदेवसूरीन्द्रं श्रीमदीडरपत्तनात् ॥२२९॥
विजयदेवसूरीन्द्रस्तदाहूतस्ततोऽचलत् । विजयसिंहसूरीशसंयुतः समहोत्सवः ॥२३०॥
विहरन्तौ क्रमात्सूरी गुरुशिष्यसुखप्रदौ । श्रीमच्छिवपुरीपार्श्वे समाजग्मतुरुत्सवात् ॥२३१॥
आसीदवसरेऽथास्मिन् पुंजा पुंजातिपुङ्गवः । प्राग्वाटान्वयसत्पद्मप्रकाशनदिवाकरः ॥२३२॥
तेजपालः सुतस्तस्य सत्पुत्रैस्त्रिभिरन्वितः । वस्तुपाल-वर्धमान-धर्मदासैर्विश्रामिभिः ॥२३३॥
वसतिमिव ऋद्धीनां जनानां स्वामिनामपि । श्रीमच्छिवपुरीनाम्नि नगरे नगरोत्तरे ॥२३४॥
—त्रिभिर्विशेषकम् ।
अर्बुदाचलसत्तीर्थेऽभवत्प्रासादकारकः । श्रावको विमलो नाम विमलो विमलैर्गुणैः ॥२३५॥
चतुर्द्वारजिनागारकारको मारिवारकः । अभूद् राणपुरे ख्यातो धरणो धरणो नृणाम् ॥
इत्यादीनां प्रसिद्धानां श्राद्धानामतुलां तुलाम् । तेजपालो दधानोऽयं विधत्ते सुकृतं सदा ॥
—त्रिभिर्विशेषकम् ।
यस्य दानपराभूता जग्मुः कल्पद्रवो दिवि । तेजपालस्तु कल्पद्रुर्भाति वाञ्छितदो भुवि ॥२३८॥

२२५–तत्र सुवर्णगिरौ अन्यत्र शिवपुर-सत्यपुरादिषु । तदनन्तरं धात्र्यां भूमौ सर्वत्र मरुमण्डले साम्राज्यश्रिय इत्यत्र अधीगर्थदयेशामिति केवलं सम्बन्धपरत्वेन विवक्षिते कर्मणि षष्ठी, सम्बन्धस्य अविवक्षायां विवक्षिते च कर्मणि द्वितीयाबहुवचनं वा ।

अथवा-जग्मुः कल्पद्रुमाः स्वर्गलोकं सन्तापिना भृशम्। तेजपालस्तु कल्पद्रुरेकोऽस्तीति हि दायकः।
अथवा-सर्वे कल्पद्रुमो नेशुः भिन्नभिन्नेप्सितप्रदाः। तेजपालोऽस्ति कल्पद्रुरेकोऽनेकेप्सितप्रदः॥
अथवा-तेजपालस्य दानानि साधुयोग्यानि नो नहि। एकोऽनेकेप्सितमाना तेजपालो वयं नहि॥
इति कल्पद्रुमाः सर्वे विमृश्य स्वहृदि स्वयम्। लज्जयेव गताः स्वर्गे लज्जितो याति यत्र किम्॥
ऊकेशवंशविख्यातो दोसिकान्वयदीपकः (अथवा-उपकेशाभिधे वंशे दोसीवंशप्रदीपकः)।
योधो भोजस्तथेत्याद्या वसन्तीभ्याः परेऽपि च ॥२४३॥
विजयदेवसूरीन्द्रस्तपागच्छाधिनायकः। श्रीमद्विजयसिंहाख्यसूरिसेवितपत्कजः ॥२४४॥
आगतः स्वागतं कुर्वन् जन्तुजातस्य सम्मति। रम्योपशिवपुर्यत्र तेजपालोऽशृणोदिति ॥२४५॥
तेजपालस्ततस्तुष्टो भूत्वा पुलकिताङ्गकः। कृत्वैकत्रोत्सवात्सङ्घं मास्थान्सूरिं विवंदिषुः ॥२४६॥
यत्र स्तस्तत्र तौ सूरी गत्वा नत्वा च भक्तितः। अग्रतो विनयादस्थाद्धर्मं श्रोतुंमना हि सः ॥२४७॥
शत्रुञ्जयार्बुदाद्र्याद्दितीर्थयात्रां हि ये नराः। कुर्वन्ति कारयन्त्यन्यान् लभन्ते ते नराः शिवम्॥
श्रुत्वोपदेशमीदृक्षं भट्टारकनिरूपितम्। तीर्थयात्राफलं ज्ञात्वा तेजपालोऽभ्यधादिति ॥२४९॥
अर्बुदाचलतीर्थस्थान् विधिनार्चिचिषाम्यहम्। विवन्दिषामि च श्रीमदादिदेवादिकार्हतः ॥२५०॥
भवता दीव्यताचार्यवर्योपाध्यायसाधुभिः। महता च श्रीसङ्घेन तथान्यैश्च समन्वितः ।२५१।युग्मम्
ओमाहेति ततः सूरिस्तेजपालाभिधास्तिकम्। इच्छाप्तौ स्याद्यतो हर्षः सोऽतोऽतोतुष्यतोत्तमः॥
(-सोऽतोऽतोतुष्यत मेयान् इच्छासिद्धिर्न किं मुदा-इति वा पाठः)
प्रत्यर्बुदाचलं तीर्थं तेजपालस्ततोऽचलत्। प्रत्यहं वन्दमानोऽमा समायान्तं गणाधिपम् ॥२५३॥
(-समायान्तं तपापतिम्-इति वा पाठः)
सुदिनाहे समारोहत् श्रीसूरिः श्रावकश्च सः। अर्बुदाचलसत्तीर्थमनत्तस्मिंश्चतीर्थपान् ॥२५४॥
द्रव्यतस्तेजपालोऽयं श्रीजिनेन्द्रानपूजयत्। कश्मीरजन्म-कर्पूर-कस्तूरी-चन्दनादिभिः॥
अभ्यष्टौद् भावतः सूरिः श्लोकैः काव्यैश्च भावदैः। यथामति यथाधीतमन्येऽपि व्यदधन् स्तुतिम्॥
द्रव्याण्यव्यययेच्छ्रेयोबुद्ध्या तत्र स आस्तिकः। एकेन्द्रियादिजीवानां दयां सूरिरपालयत् ॥
अदाद्रूप्याणि स श्राद्धः श्राद्धानां पाणिपङ्कजे। सूरिर्मूर्द्धसु साधूनां वासे श्रीपदप्रदये ॥२५८॥
अर्बुदाचलसत्तीर्थयात्रायाः परमोत्सवः। मावर्ततोभयोरेवं सूरिश्रावकयोर्महान् ॥ २५९ ॥
तत उत्तीर्य संतीर्य दुरिताब्धिं च दुस्तरम्। अर्बुदाचलसत्तीर्थात् सुकृतात्सुकृतोऽप्युपात् ॥२६०॥
विजयदेवसूरीन्द्रो विजयसिंहसूरियुक्। अस्थादुपल्यकाग्रामे तेजपालोऽपि संघयुक्।२६१।युग्मम्

२४५-शिवपुर्याः समीपं उपशिवपुरि। विभक्तिसमीपेऽर्थेऽव्ययीभावः। रम्यं च तत् उपशिवपुरि च रम्योपशिवपुरि तस्मिन् रम्योपशिवपुरि।

२५३-तपापतिं तपागच्छनायकं श्रीविजयदेवसूरिम्।

आदरं परमं कृत्वा सह लात्वा च सद्गुरुम् । सम्पदृन्दमिवानन्दं धृत्वा चित्ते च सोऽचलत् ॥
अथ प्रभाते संजाते दिवारत्ने प्रभावति । तेजपालो नृणां रत्नं सूरिरत्नं न्यवेशयत् ॥ २६३ ॥
श्रीमच्छिवपुरीमध्ये सुखाश्रय उपाश्रये । दत्त्वा रूप्याणि लोकेभ्यः कृत्वा च प्रवरोत्सवम् ॥
जायमानैः सदा धर्मैः क्रियमाणैः स्वतः शुभैः। कार्यमाणैश्च लोकेभ्यो नव्यैर्नव्यैर्दिने दिने ।२६५।
श्रीसूरीन्द्रश्चतुर्मासीं समाप्नोत्सुकृतोत्सवाम्। न च श्रीतेजपालस्य जिनधर्ममनोरथान् ।२६६युग्मम्
चतुर्मासीं समाप्यैवं प्राचलत्प्राचलद्दलः । विजयदेवसूरीन्द्रः प्रमत्तो न यतो यतिः ॥ २६७ ॥
श्रीसुवर्णगिरिद्रिङ्गात् मैव्यं प्रेष्य समाह्वयत् । जयमल्लस्तरोमल्लः श्रीसुवर्णगिरिप्रभुः ॥२६८॥
उपस्वर्णगिरिग्रामे श्रीसूरिः समवासरत् । लोकवार्तामिति श्रुत्वा जयमल्लोऽभ्यसंघयत् ॥२६९॥
अरसद् रसिकः सूरिपदाब्जस्पर्शसद्रसम् । सुरेनाऽलीव सम्पूर्णो जयमल्लोऽग्रमंचपुङ्‌ ॥२७०॥
हृद्यानन्द्यानवद्येन विधिनैवाभिवन्द्य च । व्ययित्वा च सल्लोके सह लात्वा च सद्गुरुम् ।२७१।
श्रीसुवर्णगिरिद्रङ्गे सरङ्गे सदुपाश्रये । समानीयाऽऽसयत् सिंहासने भूपमिवोत्तमम् ॥ २७२ ॥
ततः श्रुत्वोपदेशं च जयमल्लो जगज्जयी । महाजनकरे प्रादात् रूपकाणि महामनाः ॥२७३॥

—त्रिभिर्विशेषकम् ।

अथान्यदा च सूरीन्द्रं जयमल्लो न्यवेदयत् । प्रशस्यदिवसं पश्य प्रतिष्ठायोग्यमर्हतः ॥ २७४ ॥
ततः सूरीश्वरोऽपश्यज्ज्येष्ठमासे शुभं दिनम् । प्रतिष्ठायोग्यमारोग्यकरं सौभाग्यकारकम् ॥२७५॥
श्रावकं जयमल्लाख्यं सुवर्णगिरिनायकम् । सुवर्णगिरिसंघं च समक्षं च न्यवेदयत् ॥२७६॥
ततः श्रीजयमल्लोऽपि देशदेशमहाजनान् । उपरिष्टात्प्रतिष्ठायाः मैव्यान् प्रेष्य समाह्वयत् ॥२७७॥
आजग्मुस्तत्क्षणात्तेऽपि प्रतिष्ठां द्रष्टुमुद्यताः । वन्दितुं च तदा सूरिद्वयं पुण्याभिलाषिणः ॥२७८॥
(–द्वयं लाभद्वयस्पृहा –इति वा पाठः)

२६७–प्रकर्षेण अचलत् अविनश्यत् चलं गजोबलादिश्रिर्दं यस्य प्राचलद्दलः ।

२६९–अभ्यसङ्घयत्–सङ्घेन साधुसाध्वीश्रावकश्राविकालक्षणेन अभिमुखमगच्छदित्यर्थः। संघेन अभियाति अभिसंघयति । णाविष्टवत्प्रातिपदिकस्येति णौ लुक् । ततोऽनद्यतने लङ् इति लङि लुङ् लङ् लृङ्क्ष्वडुदात्त इति अडागमे प्रथमपुरुषैकवचने अभ्यसङ्घयत् ।

२७१–सल्लोके अत्यल्लोके व्ययित्वा विसोरमर्गं कृत्वा प्रदेशं पीरोजीनामकं नाणकं दत्त्वेत्यर्थः । व्ययन् वित्तसमुत्सर्गे चुरादिरदन्तः परस्मैपदी ।

२७८–लाभद्वयस्पृहाः–एकः प्रतिष्ठादर्शनलक्षणो लाभः, द्वितीयश्च श्रीविजयदेवसूरि-श्रीविजयसिंहसूरिद्वयवन्दनलक्षणो लाभ इत्यर्थः । लाभयोर्द्वयं लाभद्वयं तस्मिन् स्पृहा वाञ्छा येषां ते लाभद्वयस्पृहाः । ननु यत्र अल्पोऽपि लाभः स्यात्तत्रापि लाभाभिलाषिता भवेत्

श्रेष्ठेन विधिना सूरिः मत्सुष्ठादुत्सवादय । महावीरजिनेन्द्रस्य प्रतिमामपरा अपि ॥ २७९ ॥
प्रतिष्ठाय जिनेन्द्राणां चैत्यानि परमोत्सवैः । साधूनां विदुषां सूरिः प्रादात् पण्डितपत्दम् ॥
व्रतरत्नानि पञ्चैव साधूनां भाविनामपि । तानि द्वादश दिव्यानि श्रावकाणां विशेषतः ।
(–साधुभ्यो जायमानेभ्यो व्रतरत्नानि पञ्च हि –इति वा पाठः) ॥ २८१ ॥ *युग्मम्* ॥
श्रावको जयमल्लोऽपि सत्प्रतिष्ठाविधायकः । श्रीसाधर्मिक लोकेभ्यः प्रादाद्रूप्याणि मद्भिया ॥
साधुभ्यो दर्शनिभ्य श्च महात्मभ्योऽप्यनेकधा । अदभ्राण्यतिशुभ्राणि वस्त्राणि प्रवराणि च ॥
एवं प्रावर्तत श्रेयान प्रतिष्ठापरमोत्सवः । वर्णनीयः कवीन्द्राणां सूरिश्रावकयोस्तदा ॥२८४॥
अथान्यदा च सूरीन्द्रस्ततश्चिचलिषोत्सुकः । इत्याख्यज्जयमल्लाख्यं मन्त्रिणं संघसंयुतम् ॥२८५॥
इतीति किं तदाह—
श्रीनागपुरवास्तव्यः सङ्घ आह्वयति स्फुटम् । मेदिनीतटवास्तव्यस्तथान्योऽन्यत्र चान्वहम् ।२८६।
यदि ब्रूयाः मसद्य त्वं तदाहं विहराण्यतः।वन्दनाद्युद्भवं पुण्यं प्रापयाणि तथा च तम्।२८७।युग्मम्
तदानीं जयमल्लोऽप्युत्थाय विनयान्वितः । प्राञ्जलिर्नम्रसन्मौलिः सर्वश्राद्धशिरोमणिः ॥२८८॥
श्रीसुवर्णगिरिद्रङ्गवासी श्रीसङ्घ एव च । श्रेष्ठी लाषा महामन्त्री वर्धमानो महामतिः ॥२८९॥
साहः श्रीठाकुराख्यश्च साहुला श्रीकलाभिधः । तथा भ्रातृयुतोऽथान्यः साहः श्रीधर्मदासकः ॥
सङ्घपो डुङ्गरः श्रीमान् साहः श्रीडामराभिधः । वर्धमानादिको वर्धमानोऽस्मानश्रिया सदा ॥
विजयदेवसूरीन्द्रमित्थं व्यज्ञपयत्तराम् । साम्प्रतीनां चतुर्मासीं निवस श्रेयसे गुरो ! ॥ २९२ ॥
—पञ्चभिः कुलकम् ।

मन्त्रिणो जयमल्लस्य सङ्घस्यापि च भूयसे । श्रेयसे हृदयानन्ददृद्ध्यै चोमकरोद् गुरुः ॥२९३॥
सामायिकोपवासाद्यान् व्रतोच्चारादिकांश्च सः । अर्हन्निव महाधर्मान् कारयन्वारयन्नघम् ॥२९३॥
धारयन् सर्वसंसारिजन्तुजातदयालुताम् । अपारयच्चतुर्मासीं न भावं भविनां गुरुः ॥ २९४ ॥
चतुर्मासीं समाप्याथ पुनश्चिचलिषुर्गुरुः । श्रीमन्तं जयमल्लाख्यमपृच्छच्छ्रावकोत्तमम् ॥२९५॥

गन्तव्यम् । यत्र तु भूयांसो लाभा भवेयुस्तत्र कथं न गन्तव्यं, अवश्यं तत्र गन्तव्यमित्याशयेन आगता इत्यर्थः ।

२८४–सूरिश्रावकयोः श्रीविजयदेवसूरिश्रीजयमल्लश्रावकयोः ।

२९३–ओमकरोत् चतुर्मासीं करिष्यामीति अङ्गीकृतवान् । स्यादोम् परमं मते– इति हैमः ।

२९४–अपारयत् समापयत । पारतीरणू कर्मसमाप्तौ चुरादिरदन्तः परस्मैपदी ।

अवस्थानं न साधूनामेकत्र किल युज्यते । अतोऽतोऽथ मतिष्ठेय भवदाज्ञा भवेद्यदि ॥२९६॥
श्रुत्वेति वचनं सूरिसरूपितमनिन्दितम् । संपूज्य चरणौ मूर्ध्ना संस्पृश्येति च सोऽवदत् ॥२९७॥
विनयसिंहसूरीन्द्रवन्दनक्रमहोत्सवम् । स्वयं कुरु गुरुश्रेयः श्रेयांसं करवै च तम् ॥२९८॥
इत्युक्तो जयमल्लेन स्वमनोरथसिद्धये । भवत्वेवं महाभाग सूरिराह प्रसन्नहृद् ॥ २९९ ॥
ततः श्रीजयमल्लोऽथ श्रावकान् देशदेशतः । श्रीमच्छिवपुरीवासितेजपालादिकान् घनान् ॥३००॥
विनयसिंहसूर्यर्हिवन्दनोत्सव उद्यमः । भविताऽत्राऽतः समायान्तु मयि भूत्वा कृपापराः ॥३०१॥
ततो द्रव्यार्थिनः केऽपि केऽपि धर्मव्ययार्थिनः । केऽपि कौतुकिनो दक्षाः केऽपि तद्वन्दनोत्सुकाः ॥
अश्वारोहा रथारोहा श्चोष्ट्रारोहाश्च केचन । पदातिका अनेके च राजान इव राजिताः ॥३०३॥
सासिक्नीकाः सपत्नीका वरस्त्रीकाः समातरः । महाजनाः समाजग्मुर्बहिरन्तश्च चारिणः ॥३०४॥
—त्रिभिर्विशेषकम् ।
सौवर्णानि सुवर्णानि काय आभरणानि च । देवानामिव देवीनामिव पुंसां च योषिताम् ॥३०५॥
सुवर्णमिव सर्वांस्तं स्त्रैणं चात्यन्तमोहकम् । तदेत्याहुर्जना वीक्ष्य सुवर्णगिरिरेषकः ॥३०६॥ पुन्नम
यत्रानेकगवादीनां भूरिर्मारिरभूत्पुरा । अपूर्वा न कदा पूर्वं साऽभूच्छ्रीगुरुतेजसा ॥३०७॥
सुवर्णगिरिरित्याख्या यथार्थाऽभवच्छुभा । इति ब्रुवन्ति सल्लोका यथार्थाख्यसूचकाः ॥३०८॥
अथ श्रीजयमल्लाख्यः सन्मण्डपममण्डयत् । पारदेशिकवस्त्राणां वन्दनोत्सवहेतवे ॥ ३०९ ॥

अथ वन्दनोत्सवमण्डपवर्णनम्—

श्रीकैलासशिलातुल्याश्चञ्चुराः शुचयः सिचः । व्यधुर्ध्वनिहृतो यत्र मध्याह्नार्कप्रभा इव ॥३१०॥

२९६—अतः अस्मात्कारणात् । अत्र श्रीसुवर्णगिरिनगरात् ।

३०४—धर्माय धर्मनिमित्तं व्ययमर्थयन्तीत्येवं शीलाः धर्मव्ययार्थिनः । धर्मनिमित्तं व्यय-कर्तार इत्यर्थः । तयोः श्रीविजयदेवसूरि-श्रीविनयसिंहसूर्योर्वन्दना तस्यां तत्सुकास्तद्वन्दनोत्सुकाः । सह असिक्नीभिः अन्तःपुरचारिणीभिर्ये ते सासिक्नीकाः । 'असिक्नी स्यादवृद्धा या प्रेष्यान्तः-पुरचारिणी'त्यमरः । सह पत्नीभिः परिणीतस्त्रीभिर्वर्तन्ते सपत्नीकाः ।

३०६—पुंसां समूहः पौंस्नं । स्त्रीणां समूहः स्त्रैणं । 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति समूहेऽर्थे नञ्स्नञ्प्रत्यययोः साधू । एष एव एषकः । सर्वनामभ्यः स्वार्थे अकिति कन् । सुव-र्णगिरिर्मेरुरिव । सुवर्णगिरिर्मेरुपर्वतोपम इत्यर्थः ।

३०८—यथेति यथार्थाः—सल्लोका इति ब्रुवन्ति । इतीति किम् ? सुवर्णगिरिरित्या-ख्याऽस्य यथार्थोऽभवत् । इतीति किम् ? यत्र सुवर्णगिरौ अनेकगवादीनां भूरिर्मारिः पुराऽभूत् । सा न कदा पूर्वं श्रीगुरुतेजसा अपूर्वा मारिरभूत् ।

यत्र क्वापि च सौवर्णपत्राकारहराणि हि। पीतवासांस्यभासन्त चन्द्रभास इवोद्गताः ॥३१२॥
अथवा-पीतवासः प्रशस्यश्रीमिषमासाद्यपिञ्जरः। मेरुः सूरी प्रणन्तुं किं यत्रायात इवाबभौ ॥
श्वेतपीताम्बरज्योतिः सूर्यचन्द्रोदितोदयम्। (-प्रोदितादित्यचन्द्रमः -इति वा पाठः)।
अवाभान्नभ एवेदं यत्र क्वाप्यसिताम्बरम् ॥३१३॥
कुत्रचिद्यत्र वस्त्राणि पवित्राण्यरुणानि च। लक्ष्मीपुष्पकुलानीव लक्ष्मीं दातुं नृणां बभुः ॥३१४
अथवा-कुत्रचिद्यत्र वस्त्राणि रक्तानि नृमनांसि हि। कर्तुं हीङ्गुलवृन्दानि रक्तानीव बभुर्गुरौ ॥
यत्रान्यत्र च कुत्रापि नीलवस्त्राणि रेजिरे। हरिन्मणिकुलानीव निराकर्तुं द्विपद्द्विपम् ॥३१६॥
उन्नालपुण्डरीकालिरिव यत्र व्यराजत। स्तम्भश्रेणिः सुखश्रेणिकारणं सरसि स्फुटम् ॥३१७॥
अथवा-साक्षान्निशामणिश्रेणिः समकालमिवोदिता। द्रष्टुं तद्वन्दनां यत्र स्तम्भश्रेणिस्तदा बभौ॥
यत्र चन्द्रोदयः साक्षाच्चन्द्रोदय इव व्यभात्। अभितो मौक्तिकस्त्रग्भिस्तारकाभिर्विराजितः॥३१९
आस्थानवेदिकास्तम्भपुत्रिका देवता इव। यत्र वीजयितुं सूरिं स्थिता इव सुचामरैः ॥३२०॥

३१२-यत्र वन्दनोत्सवमण्डपे मेरुः सूरी श्रीविजयदेवसूरि-श्रीविजयसिंहसूरी कर्मतापन्नौ प्रणन्तु किमायात इव आ बभौ शुशुभे। किं कृत्वा? क्वापि कस्मिन्नपि स्थले पीतवासः प्रशस्यश्रीमिषमासाद्य।

३१३-यत्र मण्डपे क्वापि कुत्रचित्स्थले असिताम्बरं कालं वस्त्रं इदं नभ एव आकाशमिव अवाभात् अतिशयेन अदीप्यत। अत्र एवेत्यव्ययमिवार्थे। कथं भूतं कालं वस्त्रं श्वेतपीताम्बरज्योतिः सूर्यचन्द्रोदितोदयं श्वेतपीताम्बरयोर्धवलपिङ्गलचेलयोर्ज्योतिः कान्तिस्तदेव सूर्यचन्द्रयोरुदित उदयो यस्मिंस्तत्तथा। कथं भूतं नभः? श्वेतपीताम्बरयोर्धवलपिङ्गलचेलयोर्ज्योतिः कान्तिर्ययोस्तौ श्वेतपीताम्बरज्योतिषौ। एवं विधौ यौ सूर्यचन्द्रौ तयोः उदित उदयो यस्मिंस्तत्तथा। श्वेतपीताम्बरज्योतिः प्रोदितादित्यचन्द्रमः इति पाठान्तरम्। तत्रायमर्थः-किं भूतं? असिताम्बरं श्वेतपीताम्बरज्योतिरेव। प्रोदितौ आदित्यचन्द्रमसौ यस्मिंस्तत्तथा। यस्मिन् श्यामवस्त्रे पूर्वापरनिबद्धश्वेतपीताम्बरज्योतिरेव प्रोदितादित्यचन्द्रमसौ इव शोभते। द्वितीयपक्षे नभो विशेषणे श्वेतपीताम्बरज्योतिषौ प्रोदितौ आदित्यचन्द्रमसौ यस्मिंस्तत्तथा। कवयो हि सूर्यं श्वेतवर्णं वर्णयन्ति, चन्द्रं च पीतवर्णमिति।

३१४-लक्ष्मीपुष्पं पद्मरागमणिः।

३१५-कथंभूतानि रक्तानि वस्त्राणि उत्प्रेक्ष्यन्ते-हि निश्चितं गुरौ श्रीविजयसिंहसूरौ नृमनांसि रक्तानि कर्तुं हीङ्गुलवृन्दानीव। इवोऽत्र भिन्नक्रमे।

३१६-अथैतनेनान्वयः। यत्र मण्डपे स्तम्भश्रेणिर्व्यराजत। कस्मिन् क्षेत्र-सरसि उन्नालपुण्डरीकालिरिव। कथंभूता स्तम्भश्रेणिः उन्नालपुण्डरीकालिश्च-स्फुटं सुखश्रेणिकारणम्।

अथवा-चित्रकृच्चित्रिताः स्तम्भपुत्रिका यत्र रेजिरे । नृत्यन्त्य इव नर्तक्यः करैः सितैः च चामरैः ॥
प्रालम्बानि प्रलम्बानि यत्र लम्बिनी चोचकैः । मुक्तास्रजोऽपि सर्वत्र व्यराजन्त च सर्वतः ॥
तानि तत्र विलोक्यैवमशङ्कन्त तदा जनाः । मङ्गल्या हंसजातीनां गुच्छामभरयश्च किम् ॥३२३
व्यराजयत्र सद्द्वारं रत्नादर्शविनिर्मितम् । प्रचण्डानेकमार्तण्डद्वारपालैरिवाश्रितम् ॥३२४॥
पार्श्वयद्वीपोद्दण्डमोघशुण्डाभतोरणम् । पश्यतां सर्वलोकानां परमानन्दकारणम् ॥३२५॥
अथवा-इन्द्रसज्जीकृतोद्दण्डकोदण्डोपमतोरणम् । पश्यतां सर्वलोकानां सर्वकल्याणमूलकम् ॥
मङ्गलैरष्टभिः श्रेष्ठमुक्तारत्नमयैः शुभैः । शोभमानं मनुष्याणां मनोनेत्रोत्सवप्रदम् ॥३२७॥

—चतुर्भिः कलापकम् ।

न्यवेशयद्यथात्यन्तमुद्यतं तत्र मण्डपे । सिंहासनमतिश्रेयो जयमल्लः शुभाशयः ॥३२७॥
शोभमानयथास्थानग्रथितानेकरत्नकम् । सुरेन्द्रासनशोभायाः सर्वथा व्यपहारकम् ॥३२८॥
एतस्यैवेदमीदृक्षं योग्यं नान्यस्य कर्हिचित् । विधात्रेति धिया स्वीयकराभ्यामिव किं कृतम् ॥
साधुसाधूचितानेकविस्तीर्णनवताद्भुतम् । स्पृहणीयं सुरेन्द्राणां नराणामुत का कथा ॥३३०॥

—चतुर्भिः कलापकम् ।

३२१—चित्रेति, अस्यान्वयलेशः—यत्र मण्डपे स्तम्भपुत्रिका रेजिरे । कथंभूताः? उत्प्रेक्ष्यन्ते—*सितैः सुचामरैः करैर्नृत्यन्त्यो नर्तक्य इव । यथा नर्तक्यः सितैः करैर्नृत्यन्त्यो राजन्ते तथा* स्तम्भपुत्रिकाः सितैः करैः सुचामरैर्नृत्यन्त्यो व्यराजन् इत्यर्थः ।

३२२—प्रालम्बानि झुम्बका इति भाषाप्रसिद्धानि यत्र मण्डपे ।

३२३—*तानि प्रालम्बानि तत्र मुक्ता स्रजः ।*

३२९–३०, कथंभूतं सिंहासनं विधात्रा स्वीयकराभ्यां इति धिया किं कृतमिव । इतीति किं ईदृक्षमिदं सिंहासनं, एतस्यैव श्रीविजयसिंहसूरेरेव योग्यं । अन्यस्य न कर्हिचित् । पुनः कथंभूतं सिंहासनं? साधु साधूचितानेकविस्तीर्णनवताद्भुतम् । साधवो रमणीया उपक्रियाकर्तृत्वात् । ये साधवोऽनगारास्तेषामुचितानि योग्यानि अनेकानि प्रचुराणि विस्तीर्णानि यानि नवतानां च नवतानि तैः—दलीचाप्रमुखविछायणासदृशवस्त्रैरद्भुतं यत्तत्तथा । 'कुथे वर्णपरिस्तोमप्रवेणी नवताऽस्त्रि वाः' इति हैमवचनान्नवतशब्दस्य दलीचाप्रमुखस्य पर्यायत्वात् । नवतानीव नवतीति उत्तमाच्छादनवस्त्राणीति व्याख्या । प्रवेण्याऽऽस्तरणं वर्णः परिस्तोमः कुथः कुथः नवतं चेति मुख्यार्थाः । 'प्रच्छदस्तोत्तरच्छद' इति हलायुधः । 'नवतवर्णकम्बले आच्छादनमात्रे वा' इति वृत्तिकावचनात् । नवतशब्दोऽत्र आच्छादनपर्यायोऽपि ज्ञेयः । तेन साधुसाधूचितानि अनेकानि विस्तीर्णानि यानि नवतानि बिच्छावणा इति भाषाप्रसिद्धानि तैरद्भुतं यत्तत् साधुसाधूचितानेकविस्तीर्ण-

श्रेष्ठकाष्ठमयं मध्ये नानारत्नमयं बहिः । मल्लप्रापयदुत्कृष्टं पट्टं समच्छदान्वितम् ॥३३१॥
सूरेश्चरणयोर्बाधा माभूत्तुच्छापि कर्हिचित् । इति निश्चित्य मल्लक्षितिपेन्द्रादधिको यतः॥३३२
आधिक्यमाह–अर्हतोऽध्वनि पन्न्यासे पद्मानीन्द्रो नवैव हि । मुञ्चेद्विरनो मध्ये समवसरणस्य न ॥
उपाश्रयस्य मध्येऽयं बहिस्तादपि चान्वहम् । पद्माधिकानि वासांसि मसृणानि पदोरयः ॥३३४

–चतुर्भिः कलापकम् ।

उत्थितात्कदाचिच्च कदाचित्स्थितादयम् । यथोचितमुपर्यस्य ददानः पदवन्दनाम् ॥३३५॥
इति कारणतः पट्टप्रतिष्ठापनयोग्यता । मण्डपे शोभमानाऽभूत्सद्विवेकः प्रमोदकृत् ॥३३६॥

–इति पट्टवर्णनम् ।

लोकचक्षुर्विनोदाय प्रारब्धं प्रेक्षणीयकम् । विजयदेवसूरीन्द्रोऽविशत्तमथ मण्डपम् ॥३३७॥
विजयसिंहसूरीन्द्रस्तं प्रविश्य यथोचितम् । श्रीसूरिवचसा श्रीमत्सिंहासन उपाविशत् ॥३३८
पश्यतां सर्वलोकानामकरोत्पादवन्दनाम् । विजयसिंहसूरीणां विजयदेवसूरिराट् ॥३३९॥
यथाविधि तदानीं स द्वादशावर्तवन्दनाम् । व्यदधाच्छ्रीमतस्तस्य यदाचारः परः सताम्॥३४०
वन्दनां ददतस्तस्य पट्टाः स्तम्भासनस्थिताः । बभुः पुंपुत्रिका इन्द्रास्तिरोजाता इवेक्षितुम् ॥

(–व साक्षिणः–इति वा पाठः) ॥३४१॥

सूरिमन्त्रं जगच्छत्रमिव सन्तापवारकम् । प्राददाद्वदनाम्भोजात् प्रसादप्रभगाद्गुरुः ॥३४२॥
श्रीजयसागराख्यस्य श्रीकीर्तिविजयस्य च । श्रीवाचकपदं प्रादात् सूरिर्यत्सर्वतोषकः॥३४३॥
अन्येषां साधुलोकानां विदुषां सज्जुषां नृणाम् । श्रीपण्डितपदं प्रादात् सूरीन्द्रो यद्विवेकवान् ॥
गीयमानशुभैर्गीतैः स्फूर्जज्जयजयारवैः । स्तूयमानो गुणैः पुण्यैर्मार्गणैर्विबुधैरपि ॥३४५॥
गतव्याधिः समाधिश्रीलब्धसिद्धिः समृद्धिमान् । विजयसिंहसूरीन्द्रः प्राभवत् प्रभुताश्रिया ।३४६
श्रीगुरौ सुप्रसन्ने हि किं न सिद्ध्यति वाञ्छितम् । अनीश्वरोऽपीश्वरः किं न नरः को भवेद्भुवि॥
सुस्वरा युवतीलोकास्तदा गेयान्यगाययन् । वाद्यान्यवादयन् वाद्यवादका अपि चोत्तमाः ॥३४८॥

नववाद्भुतम् । पुनः कथंभूतं ? अत एव सुरेन्द्राणां स्पृहणीयं । वलेति वितर्के नराणां का कथा– किं कथनीयमित्यर्थः । इति सिंहासनवर्णनम् ।

३३४–स जयमल्ल उत्कृष्टं पट्टं पाटि इति लोकभाषाप्रसिद्धं प्रत्यष्ठापयत् । कथंभूतं पट्टं मध्ये श्रेष्ठकाष्ठमयं बहिर्नानारत्नमयं । पुनः कथंभूतं ? प्रच्छादान्वितं प्रच्छदैः विछावणा इति भाषाप्रसिद्धैरन्वितं युक्तं । कया प्रत्यष्ठापयत् । सूरेः श्रीविजयदेवसूरेश्चरणयोः *कर्हिचित्तुच्छापि बाधा माभूदिति धिया । कथंभूतः स जयमल्लः–यतः इन्द्रादधिकः ।* तदेवाह–अर्हतोऽध्वनीत्यादि द्वाभ्यां अर्थः प्रसिद्ध एव ।

३३५–अस्य पट्टस्य उपरि । इति पट्टवर्णनम् ।

स्वच्छाच्छदादुकूलं सन्धी श्रीजयसागरः । स्वाम्यदर्शनमाहात्म्यमहाजनकराम्बुजे ॥१४९॥
षड्विंशान्यनेकानि प्रशुल्कानि नवानि च । यानकादिकलौकानां जयमङ्गलशब्दवात् ॥१५०॥
शिषकाशीर्षमन्वानी भक्तानीः सद्गुरूस्थीः । अलंकारान् स आहूय महाजनमपोजयत् ॥
एवं सारस्वत मेघाव सदा सन्दमखोत्सवः । सर्वेषां हृदि चानन्दः मासान्नैहिकसम्पदाम ॥१५२
श्रीमत्सूरेस्पादूर्ध्वं समन्तुपविनसपि । विजयसिंहसूरीन्द्रो जयताज्जगतीतले ॥१५३॥

दत्तं श्रीगुरुणा धर्मराज्यं लब्ध्वा स शोभाय । अग्निना निहितं तेजो दिनान्तेऽपि रविराविसन् ॥
दत्तगुरुस्पदं सूरिं सर्वं शुश्रूषां च तम । निःशल्ये हृदि शत्रूणां सोऽतिशल्यमिवाभवत् ॥१५५॥
सविसिहितं समाकर्ण्य गच्छराज्येऽभिषेजनि । द्विषां सोऽद्भुतिके पूर्वे हृदि सोऽभिरिवोस्थितः ॥
तस्य सूर्योदयस्येव मागच्छोपनाम्ब्यः । आनन्दन् भास्कस्य लोका नराम्युत्थानदर्शकाः ॥१५७॥
आमतामहीरुद्रं राज्यमरिहन्दं च दुर्दमम । समर्थेन स सूरीन्द्रः मतापतपनोपमः ॥१५८॥
शमुन जिहांस दुर्जयान् तेजसा चोजसा क्षणात् । यो जयति विशेषात् स विजयसिंह उच्यते ॥
इति नामाऽभवत्यस्य ततः प्रभृति सार्थकम । विजयसिंहसूरीन्द्रो जयतात्स चिरं भुवि ॥१६०॥

भट्टारकपदन्यासात् तपस्या स्वयं किल । भजतादुग्रतेजाः श्री राजसाम्राज्यदीक्षितम् ॥१६१
सूरिः सर्वस्य लोकस्य येन आचारतोऽद्भुतान् । आदर्शो नातिशीतोष्णः समीर इव दक्षिणः ॥
चतुर्भिरधिकैर्वर्षैरशीतिमिते शुभे । षोडशस्य शतस्यापि पक्षे पौषसितस्य हि ॥१६३॥
एवं महामहमन्दक्ष्मीकः कान्तकौतुकः । चिरंजीव्यात्स सूरीन्द्रो यस्यासीद्वन्दनोत्सवः॥१६४
तद्दिनमस्तुवन् लोका यं नवं गच्छनायकम् । आशिषं नेदनीं यस्मै ददुर्नन्दतु स प्रभुः ॥१६५॥

इत्थं श्रीविजयादिदेवसुगुरोः स्वीयेन सत्पाणिना,
आचार्योद्विजयादिसिंहसुगुरोः पट्टाभिषेकोत्सवम् ।

१४९—प्रशस्तं अच्छदादुकूलं प्रशस्तं दत्तवानित्यर्थः । तिर्यगनुस्यूतेत्यिरन्तादपि प्रशंसायां रूपप् इति रूपप् ।

१५४—अग्नि वादित्यः प्रविशतीति श्रुतिः । यथाग्निर्दिनान्ते सूर्येण निहितं तेजः प्राप्याधिकं शोभते तथा श्रीविजयसिंहसूरिरपि श्रीगुरुणा श्रीविजयदेवसूरिगुरुणा दत्तं धर्मराज्यं लब्ध्वा शोभमानाभिवाशीः ।

१५५—दत्तेति अस्यान्वयः—स श्रीविजयसिंहसूरिः शत्रूणां परमतमतिवादिवैयाधिकादि-दर्शनिनां हृदि अतिशल्यमिव अधिकशल्यो यस्यासौ अभवत् । कथंभूते हृदि ? निःशल्ये शल्यरहिते इत्यर्थः । कथंभूतानां शत्रूणां सूरिं श्रीविजयदेवभट्टारकं दत्तसूरिपदं श्रीविजयसिंहसूरीणां सूरिपदं येन स तथा तं च: पुनः तं श्रीविजयसिंहसूरिं प्रभुं स्वामिनं गच्छनायकं शुश्रूषताम् ।

दशमः सर्गः

अथ श्रीमेदताद्रङ्गे, हर्षो हर्षकरोऽभवत् । सदा तत्रत्य लोकानामन्येषां च विशेषतः ॥१॥
निर्विरीसा इवोर्वीशा धनीशाश्चापरे जनाः । यस्यासन् पुर आसीना नाहर्षंस्तेन केऽप्यमा ॥२॥
अवष्टभ्य सदा तिष्ठन् यदंह्री जीविकार्थिनः । कलौ लोका अनेकेऽस्मिन् नाहर्षंस्तेन केऽप्यमा ॥
सदादाने सदा नृभ्यो ददत्यन्नादि दायकाः । न पशुभ्यो विशिष्येति पशुभ्योऽपि ददात्यहम् ॥४
विचार्येत्यददद्दानं नरतिर्यग्भ्य ईप्सितम् । कर्णादिदानशौण्डेभ्यो हर्षोऽयमधिको यतः ॥५॥
तद्यथा–सदादाने ददौ सोऽन्नं नराणां जीविकाकृते ।
पशूनां च खदान् दिव्यान् तेन स्पर्धेत कोऽप्यमा ॥ ६ ॥
यस्याद्यापि सुताः शश्वद्ददत्यन्नं खदानपि । मनुष्येभ्यः पशुभ्यश्च तेन स्पर्धेत कोऽप्यमा ॥७॥
श्रीमच्छत्रुञ्जयसत्तीर्थरैवतकार्बुदादिषु । नेमुस्तीर्थकृतः सङ्घं कृत्वा प्राग् भरतादयः ॥८॥
कृत्वा तैः सह संहर्षं श्रीहर्षो हर्षवद्वरः । करवाणि महासङ्घमिति चेतस्यचिन्तयत् ॥९॥
पूजयानि च तत्रत्याः प्रतिमा अर्हतां समाः । निर्माणि च महापुण्यं फलं लक्ष्म्या लभे पुनः॥
–त्रिभिर्विशेषकम् ।
तदानीं स विचिन्त्येति महासङ्घं विधाय च । स्वगुरूनन्यसाधूंश्च लात्वाऽमा तीर्थमाव्रजत् ॥११॥

२–येन श्रीहर्षेण नाम्ना श्रावकेणाऽमा सह केपि नाऽहर्षन् न स्पर्धां चक्रुरित्यर्थः । तेन केन ? यस्य पुर आसीना उर्वीशा धनीशाः, चः पुनः अपरे जनाः निर्विरीसा इव नतनासिका इव कृतनासिका नमना इव आसन् । नेर्बिड् च बिरीसचौ । इति नासिकायाः सम्बन्धिनि नमने वाच्ये निशब्दात् बिरीसच् प्रत्यये निर्विरीसं, तद्योगात् पुरुषा अपि निर्विरीसाः । निर्विरीसा इव नतनासिकपुरुषा इव येतेऽपि । इव शब्दस्य लोपे निर्विरीसाः कृतनासिका नमनास्ते इव इत्युपमा ।

३–येन हर्षनाम्ना श्रावकेण अमा सह केपि नाऽहर्षन् न अस्पर्धन्त । येन केन ? यदंह्री अवष्टभ्य आलम्ब्य अस्मिन् कलौ जीविकार्थिनो अनेके लोकाः सदा अतिष्ठन् । अवष्टभ्येत्यत्र अवाच्चालम्बनाविदूर्ययोरिति आलम्बनेऽर्थे स्तम्भेः सकारस्य मूर्धन्यादेशः ।

४–सदादाने सत्रूकार इति भाषाप्रसिद्धे ।

१०–आशीः प्रेरणयोः–करवाणि पूजयानि निर्माणि एतानि त्रीणि मेर्निरिति लोटो मेर्नि इत्यादेशे आडुत्तमस्य पिच्चेति आडागमे लोट उत्तमपुरुषैकवचनानि । लभे इति च एतैरिति एत ऐ आदेशे लोट आत्मनेपदे उत्तमपुरुषैकवचनम् ।

११–तीर्थं श्रीरैवताचलं आव्रजत् प्राप्तवान् ।

श्रीनेम्यादिजिनाधीशान् पूजयित्वाऽभिवन्द्य च। कृत्वा लम्भनिकां सङ्घं प्रभोज्य च ततोऽचलत् ॥
प्रचलन् सह संघेन तीर्थं शत्रुञ्जयाभिधम् । प्राप्यारुह्य च सोऽभ्यर्चदादिदेवादितीर्थपान् ॥१३॥
सो वारुह्य ततः संघं प्रभोज्यामृतभोजनम् । पाणौ प्रदाय रूप्याणि पुण्यमादाय चाचलत् ॥१४॥
श्रीमदहम्मदावादं तत आगत्य समप्रभुः । अपूपुजज्जिनाधीशांश्चैत्येषु विविधेष्वपि ॥१५॥
विजयसेनसूरीन्द्रं विजयदेवसद्गुरुम् । अभिवन्द्य च सङ्घस्य मध्य आकार्य सोऽर्चयत् ॥१६॥
लम्भनिकां विधायाथ तत्रत्य श्रीमहाजने । प्रतस्थे प्रततस्थेमा ततो देशं स्वकं प्रति ॥१७॥
आयन् शंखेश्वरादीनि तीर्थान्यन्यानि चाध्वनि । पूजयन् लंभनीं कुर्वन् प्रापार्बुदगिरिं च सः॥
पूजयित्वा जिनांस्तत्र कृत्वा लम्भनिकां च सः । श्रीमच्छिवपुरीस्वर्णगिरिदेवानपूपुजत् ॥१९॥
एवं धर्माननेकान् यो व्यदधाद् विधिपूर्वकम्। श्रीहर्षः कस्य हर्षाय नाभूद्धर्मपरायणः ॥२०॥
तस्य पुत्रा अमी सन्ति पञ्च पञ्चेन्द्रिया इव। विराजन्ते जगज्जोतीरूपा रूपश्रियाऽद्भुताः ॥२१॥
तद्यथा—प्रथमो जसवन्ताख्यो, द्वितीयो जयराजकः । तृतीयो नेमिदासश्च सामीदासश्चतुर्थकः॥
श्रीमद्विमलदासश्च, पञ्चमः पञ्चमो गुणैः । पञ्चाप्येते मिथः प्रीताः सर्वप्रीतिविधायकाः ॥२३॥
—त्रिभिर्विशेषकम् ।

पञ्चानामादिमस्तस्य जीवराजः सुतोऽभवत् । पितुः सेवापरत्वेन पितुः स्वर्गमनुव्रजत् ॥२४॥
(—पितृस्नेहाधिकत्वेन—इति वा पाठः)

पञ्चापि चैकदेत्येते संभूयाचिन्तयन्मिथः । आत्मभिः कारितं श्रीमत्सुवर्णगिरिपत्तने ॥२५॥
श्रीमत्समवसरणप्रासादः सर्वतोऽद्भुतः । प्रतिमाः श्रीपार्श्वनाथादिजिनानां कारिता इमाः ॥२६॥
ताः प्रतिष्ठापयामाऽऽशु यदि स्यात्सर्वसम्मतम् । श्रीविजयदेवसूरीन्द्रमिहाहूय महादरात् ॥२७॥
—त्रिभिर्विशेषकम् ।

१८—आयन् आगच्छन्—इ गतौ अदादिः परस्मैपदि आङ्पूर्वस्य अस्य धातोः शतृप्रत्यये आयन् इति रूपम् ।

२३—'पञ्चमो रुचिरे दक्षे' इति ... रुचिरपर्यायः ।

२६—श्रीमत्समवसरण इत्यत्र पदे ... पि ... न दोषाय । यत् श्रीहेमचन्द्राचार्याः श्रीनेमिचरित्रे—" शुभेऽह्नि ... कलाचार्य- ... भूपतिः ॥१॥" । यथा ... पञ्चह्रस्वाक्षरं ... न दुष्टं तथा ... न ... निवृत्तौ ... हनुमति चे विशि चि ... वत्तमगुरुपञ्चपनम् ।

मिथोऽङ्गीकृत्य पश्चादपि श्रीप्रतिष्ठाविधापनम् (-मिथोऽङ्गीकृत्य पश्चाप्यर्हत्प्रतिष्ठाविधापनम्-
इति वा पाठः) भ्रातृव्यं जिनदासाख्यमपृच्छन् यज्ज्येष्ठनन्दनः ॥२८॥
आलोच्यैवं परस्परं ते मिथोऽमिलितनेतरः । अपृच्छन् मेडताद्रङ्गवासिसङ्घं विवेकिनः ॥२९॥
तद्यथा-कोठारीवंशविख्यातटीलाख्यः श्रावकोत्तमः ।
सोनीवंशे जिनो नाम, सिंहः श्रीमालगोत्रकः ॥३०॥
श्रीमालगोत्रसंजातः देवसिंहाभिधोऽभवत् । पुत्रत्वेन धृतस्तेन भाति डूङ्गरसिंहकः ॥३१॥
राजसिंहाभिधो मन्त्री, वल्हू नामा च मन्त्रिराट् । श्रीनाथो नाथनामा च, मन्त्री नरवदाङ्गजः ॥
नगरव्यवहारीन्द्रमित्यादिसमुदायकम् । समाहूय च संभूय प्राणपन्निति ते मिथः ॥३३॥
-चतुर्भिः कलापकम् ।
प्रतिष्ठां पार्श्वनाथादिबिम्बानां कारयाम हि । विजयदेवसूरीन्द्रमिहाहूय महोत्सवात् ॥३४॥
तैः पृष्ट इति ते प्राहुर्वरं कुरुत भो वरम् । अनालस्यमपास्यं यत् धर्मस्य त्वरिता गतिः ॥३५॥
तानिदं ते पुनः प्राहुः सहास्माभिः समावत । प्रसीदतात्र सद्धर्मकार्ये यूयं महाजनाः ॥३६॥
तेप्यूचुरिति तान् सर्वान् प्रतिपन्नमिदं वचः । गुरुं विज्ञपयिष्यामः सहैष्यामश्च निश्चितम् ॥३७॥
ततः श्रीमेडताद्रङ्गवासिसंघसमन्विताः । प्रातिष्ठन्त शुभे तेऽह्नि श्रीसुवर्णगिरिं प्रति ॥३८॥
प्रचलन्तः समाजग्मुस्ते जावालपुरं ततः । ववन्दिरे च सोत्साहाः श्रीसूरिचरणाम्बुजम् ॥३९॥
अभिवन्द्य तदानीं ते सूरिं व्यज्ञपयन्निति । गच्छनाथ समागच्छ श्रीमत्सन्मेदिनीतटे ॥४०॥
पार्श्वनाथादिदेवानां प्रतिमाः प्रतिष्ठ च । ततः समवसरणप्रासादे स्थापयामहि ॥४१॥ युग्मम् ।
मन्त्रिणं जयमल्लं ते मिलित्वा चावदन्निदम् । सूरीन्द्रं मुञ्च धर्मात्मन्नैति यत् त्वद्वचोविना ॥
ततः श्रीजयमल्लोऽपि मेदिनीतटराड्गुरुः । उपसूरि समागत्य नत्वा चैवं न्यवेदयत् ॥४३॥
जसवन्ताद्या इमे पञ्च श्रीहर्षतनयाः शुभाः । टीलादि-मेडताद्रङ्गवासिसङ्घसमन्विताः ॥४४॥
सूरे विज्ञपयन्तीति प्रतिमाः प्रतितिष्ठ हि । श्रीमन्मेदतटद्रङ्गमेहि नः कुरु चेप्सितम् ॥४५॥ युग्मम्।

२८-ज्येष्ठस्य वृद्धभ्रातुर्जीवराजाख्यस्य नन्दनः पुत्रः ज्येष्ठनन्दनः । 'ज्येष्ठः स्यादग्रजे' इति हैमानेकार्थः ।

३३-ते हर्षपुत्राः संभूय मिलित्वा इत्यादिसमुदायकं कोठारी टीलाप्रमुखं श्रीमेडतासङ्घं समाहूय मिथः इति प्राणयन् इत्यकथयन् । इतीति किं तदाह ।

३४-हीत्यव्ययं निश्चये । ३५-तैः हर्षपुत्रैः । ते टीलाप्रमुखाः ।

३६-समावतेति-अव गतौ इति धातोस्समाङ्पूर्वस्य आगमनार्थस्य लोटो मध्यमपुरुष-बहुवचनम् ।

मिथोऽङ्गीकृत्य पश्चादपि श्रीप्रतिष्ठाविधापनम् (-मिथोऽङ्गीकृत्य पश्चाप्यर्हत्प्रतिष्ठाविधापनम्-
इति वा पाठः) भ्रातृव्यं जिनदासाख्यमपृच्छन् यज्ज्येष्ठनन्दनः ॥२८॥
आलोच्यैवं परस्पेते मिथोऽतिप्रीतचेतसः । अपृच्छन् मेडताद्रङ्गवासिसङ्घं विवेकिनः ॥२९॥
तद्यथा-कोठारीवंशविख्यातटीलाख्यः श्रावकोत्तमः ।
सोनीवंशे जिनो नाम, सिंहः श्रीमालगोत्रकः ॥३०॥
श्रीमालगोत्रसंजातः पेतसिंहाभिधोऽभवत् । पुत्रत्वेन धृतस्तेन भाति डूङ्गरसिंहकः ॥३१॥
राजसिंहाभिधो मन्त्री, वल्लू नामा च मन्त्रिराट् । श्रीनाथो नाथनामा च, मन्त्री नरचन्द्रात्मजः॥
नगरव्यवहारीन्द्रमित्यादिसमुदायकम् । समाहूय च संभूय माणयन्निति ते मिथः ॥३३॥
-चतुर्भिः कलापकम् ।

प्रतिष्ठां पार्श्वनाथादिबिम्बानां कारयाम हि । विजयदेवसूरीन्द्रमिहाहूय महोत्सवात् ॥३४॥
तैः पृष्ट इति ते माहुर्वरं कुरुत भो वरम् । अत्रालस्यमपास्यं यत् धर्मस्य त्वरिता गतिः ॥३५॥
तानिदं ते पुनः प्राहुः सहास्माभिः समावत । प्रसीदतात्र सद्धर्मकार्ये यूयं महाजनाः ॥३६॥
तेऽप्यूचुरिति तान् सर्वान् प्रतिपन्नमिदं वचः । गुरुं विज्ञपयिष्यामः सहैष्यामश्च निश्चितम् ॥३७॥
ततः श्रीमेडताद्रङ्गवासिसंघसमन्विताः । प्रातिष्ठन्त शुभे तेऽह्नि श्रीसुवर्णगिरिं प्रति ॥३८॥
प्रचलन्तः समाजग्मुस्ते जावालपुरं ततः । ववन्दिरे च सोत्साहाः श्रीसूरिचरणाम्बुजम् ॥३९॥
अभिवन्द्य तदानीं ते सूरिं व्यज्ञपयन्निति । गच्छनाथ समागच्छ श्रीमत्सन्मेदिनीतटे ॥४०॥
पार्श्वनाथादिदेवानां प्रतिमाः प्रतिष्ठ च । ततः समवसरणप्रासादे स्थापयामहि ॥४१॥ युग्मम् ।
मन्त्रिणं जयमल्लं ते मिलित्वा चावदन्निदम् । सूरीन्द्रं मुञ्च धर्मात्मन्नैति यत् त्वद्वचोविना ॥
ततः श्रीजयमल्लोऽपि मेदिनीतटराड्गुरुः । उपसूरि समागत्य नत्वा चैवं न्यवेदयत् ॥४३॥
जसवन्ताद्या इमे पञ्च श्रीहर्षतनयाः शुभाः । टीलादि-मेडताद्रङ्गवासिसङ्घसमन्विताः॥४४॥
सूरे विज्ञपयन्तीति प्रतिमाः प्रतितिष्ठ हि । श्रीमन्मेदतटद्रङ्गमेहि नः कुरु चेप्सितम् ॥४५॥ युग्मम्।

२८-ज्येष्ठस्य वृद्धभ्रातुर्जीवराजाख्यस्य नन्दनः पुत्रः ज्येष्ठनन्दनः । 'ज्येष्ठः स्यादग्रजे' इति हैमानेकार्थः ।

३३-ते हर्षपुत्राः संभूय मिलित्वा इत्यादिसमुदायकं कोठारी टीलाप्रमुखं श्रीमेडतासङ्घं समाहूय मिथः इति प्राणयन् इत्यकथयन् । इतीति किं तदाह ।

३४-हीत्यव्ययं निश्चये ।　　　३५-तैः हर्षपुत्रैः । ते टीलाप्रमुखाः ।

३६-समावतेति-अव गतौ इति धातोस्समाङ्पूर्वस्य आगमनार्थस्य लोटो मध्यमपुरुष-बहुवचनम् ।

माज्यानि माज्यपोज्यानि कुण्डलीमुख्यानि ते। शालिदालिघृतालीनि भोजनानि अपाचयन् ॥
केसराणां सुवारीणि पूर्णानि सुरभीणि च। अकारयन् छटार्थं ते पत्त्रालाप च स्फुटम् ॥६३॥
कर्पूरागरुकस्तूरीचन्दनादीनि चानयन्। वस्तूनि ते महार्घानि प्रतिमार्चनहेतवे ॥६४॥
यथायोग्यं यथाशास्त्रं यथाविधि यथोदितम्। प्रतिष्ठायोग्यसामग्रीं व्यधुरेवं सुधा हि ते ॥६५॥
मण्डपे मण्डयन् बिम्बैः श्रीसहस्रफणादिभिः। अनेकैः शोभितं श्रीमत्पार्श्वबिम्बं ततस्तके ॥६६
विजयदेवसूरीन्द्रो विजयसिंहसूरियुक्। प्रतिष्ठासमयं ज्ञात्वा मण्डपेऽथ समागमत् ॥६७॥
बिम्बं श्रीपार्श्वनाथस्य श्रीसहस्रफणस्य च। बिम्बैरन्यैर्युतं सूरिः प्रत्यतिष्ठयथाविधि ॥६८॥
ततः श्रीजसवन्ताद्या भ्रातरः पञ्च भक्तितः। विजयदेवसूरीन्द्रनवाङ्गान्यभ्यपूपुजन् ॥६९॥
कारयित्वा प्रतिष्ठां ते रूपकाणि तदा ददुः। महाजनेभ्य इभ्योद्याः परमानन्दमेदुराः ॥७०॥
सूरीन्द्रोऽनेकसाधूनां श्रीपण्डितपदं ददौ। साधवः श्रावकाश्चान्ये तदा सन्तुतुषुस्तराम् ॥७१॥
ततः पञ्चजनीनास्ते निमन्त्र्य श्रीमहाजनान्। प्रभोज्यं केसराम्बूनां छटाचूर्णैरपूपुजन् ॥७२॥
एवं श्रीमेडताद्रङ्गेऽर्हत्प्रतिष्ठामहोत्सवः। विजयदेवसूरीन्द्रकृतः प्रावर्तताद्भुतः ॥७३॥
प्रतिष्ठाग्रुरयापृच्छत् सूरिः सङ्घं जगद्गुरुः। अत आकारयन्त्यन्ये प्रतिष्ठं भवदाज्ञया ॥७४॥
ततः श्रीमेडताद्रङ्गवासी सङ्घोऽब्रवीदिति। प्रतिष्ठसे यदा सूरे त्वां निषेधति को जनः ॥७५॥
परमत्रत्य सङ्घोऽयं भोज्यमाज्यं निषेधति। भोजने भोजनेष्टं च भो जनेश्वर सद्गुरो! ॥७६॥
स्मित्वा सूरिरपि प्राह श्रीसङ्घं विस्मयान्वितः। किं ब्रूपे सङ्घ सोऽप्याह चतुर्मासीं कुरुष्व भोः॥
तत एवमभाषिष्ट सूरिः सङ्घं विचारवित्। चतुर्मासीं विधातास्मि युष्माकं च समीहितम् ॥७८

अभिवन्द्यं जिनाधीशाः सन्ति ये तान् मरौ किल।

अथवा—अभिवन्द्यं जिनाधीशप्रतिमा या मरौ हि ताः।

तीर्थानि यानि विद्यन्ते तानि पन्थानि चात्मनाऽधुना ॥७९॥

प्रत्ययेऽस्मिन् गृहाणेदं मम स्वाध्यायपुस्तकम्। सत्यंकारमिवेदं चेत्संघ नो मनुषे वचः ॥८०॥
अस्मिन्नवसरे श्रीमत्पुरं योधपुरं वरम्। वरीवर्ति सुखस्फूर्ति लक्ष्मीमूर्तिमयं सदा ॥८१॥
गजसिंहो महाराजस्तत्र शश्वद्विराजते। पराजितपरानेकगजसिंहपराक्रमः ॥८२॥

६२—ते जसवन्तादयः पञ्च भ्रातरः भोजनानि अपाचयन्। कथंभूतानि माज्यानि प्रचुराणि माज्यपोज्यानि प्रवरहविर्योजनीयानि भोजनानि। अपाचयन् इत्यत्र इकोऽसवर्णे शाकल्यस्य ह्रस्वश्चेति प्रकृतिभावः, न इकोयणचीति यण्।

६३—पूर्णानि भृतानि कुसुमप्रचुरभाषाप्रसिद्धानि।

८०—हे सङ्घ! चेदिदं वचः चतुर्मासी स्थास्यामि इत्येवंरूपं नो मनुषे तर्हि अस्मिन् प्रत्यये प्रतीतौ इदं मम स्वाध्यायपुस्तकं सत्यंकारमिव गृहाण।

पद्मा पद्माशयं ज्ञात्वा पद्माख्यामिषतो श्रसत् । स श्रीपद्माभिधस्तत्र वसति व्यवहारिकः ॥८३
कदापि यद्वचो न्याये भूपा नैवोदलङ्घयन् । वार्ता का चान्यलोकानां माद्विकाक्रमतल्लिका ॥८४
धर्मात्मा न च दुष्टात्मा द्वेषचेताः कदापि न । भक्तः समस्तसाधूनामासक्तः सुकृतेऽर्हतः ॥८५॥
—त्रिभिर्विशेषकम् ।

तस्य पुत्रावुभावास्तां भैरवाख्य-शुभाख्यकौ । राज्ञः श्रीसूरसिंहस्य मन्त्रिणौ परमप्रियौ ॥८६॥
आयुषः क्षयतस्तौ हि प्रागेवागच्छतां दिवम् । वर्तन्ते च तयोः पुत्राः पौत्राः पद्माभिधस्य च ॥
तद्यथा—श्रीभैरवसुतः श्रीमान् सिंहमल्लवलो नृपु । श्रीसिंहमल्लनामास्ति मन्त्रिराजो महीपतेः ॥
शुभाः शोशुशुभाः पुत्राः शुभाख्यस्य शुभा इव । चत्वारः प्रियचत्वारः एते सन्तीह सम्प्रति ॥
तानाह—प्रथमः सुखमल्लाख्यो द्वितीयो रायमल्लकः । तृतीयो रणमल्लाख्यस्तुर्यः प्रतापमल्लकः ।
श्रीपद्माख्यस्य नप्तारस्त्रातारोऽमी नरान् भुवि । जिनधर्मं विधातारो वर्तन्ते गुरुसेवकाः ॥९१॥
सीहमल्लोऽभवत्पुण्यात् श्रीमद्योधपुराधिपः । मेदिनीतटसद्द्रङ्गनाथः श्रीसुखमल्लकः ॥९२॥
गजसिंहमहाराजराज्यभारधुरन्धरौ । गजसिंहमहाराजस्थापितौ तौ व्यराजताम् ॥९३॥
तयोः पितामहः श्रीमत्सूरीश्वरं विवन्दिषुः । श्रीपद्माभिध आगच्छत् तदानीं मेदिनीतटे ॥
तदा पद्माभिधो मन्त्री पद्मापद्ममदात्तराम् । महाजनाय सूरीन्द्रद्वयं नत्वातिभक्तितः ॥९५॥
(—महाजनाय सूरीन्द्रं प्रणिपत्याति भक्तितः —इति वा पाठान्तरम्)

ततः श्रीमेडताद्रङ्गात् प्रास्थात् सूरीश्वरो द्रुतम् । घंघाणीति प्रसिद्धाख्ये द्रङ्गे नन्तुं जिनेश्वरान् ॥
मार्गे ग्रामीणसल्लोकान् शीलधर्मे प्रपालयन् । घंघाणीनगरं प्राप श्रीसूरिः सङ्घसंयुतः ॥९७॥
समाजगाम तत्रापि श्रीपद्मः संघनायकः । नप्त्रा श्रीसीहमल्लेन देशाधीशेन संयुतः ॥९८॥

८८—भैरवसुतः सीहमल्लः ।

८९—शुभाख्यस्य एते चत्वारः पुत्राः इह योधपुरे सन्ति । किं भूताः ? शुभाः शौर्यौदार्यादिगुणैर्मनोहराः । अत एव पुनः क० शोशुशुभाः शुभि दीप्तौ, शोभन्ते पुनः पुनरिति शोशुभाः शोभनशीला इत्यर्थः । बहुलं गुणवृद्धी चादेरिति सिद्धहेमशब्दे यङ्लुपि द्वित्वे पूर्वस्य उकारे च साधुः । पुनः क० ? उत्प्रेक्ष्यन्ते—शुभा इव शुभयोगा इव । पुनः क० ? प्रियचत्वारः प्रियाः चत्वारो येषां ते प्रियचत्वारः । चतुःशब्दस्य उपलक्षणात् प्रियसर्वे इत्यर्थः ।

९१—त्रातारः विधातारः इत्युभयत्र न लोकाव्ययनिष्ठाखलर्थतृनामिति तृन् प्रत्ययान्तत्वात् षष्ठीनिषेधात् । नरान् जिनधर्मस्योभयत्र द्वितीया ।

९५—पद्मापद्मं लक्ष्मीनिधानम् ।

९७—सङ्घसंयुतः श्रीमेडताद्रङ्गसङ्घसंयुक्त इत्यर्थः ।

अभ्यवन्दत सूरीन्द्रस्तीर्थकृत्प्रतिमा रमाः । श्रीपदमरत्ना गुरुं चैव जनेभ्योऽदात् रूपकं (लंभनीम)
मादात् श्रीसीहमल्लोऽपि रूपकाणि यथोचितम् । प्रभोज्य मञ्जुलं भोज्यं मृष्टं सर्वमहाजनम् ॥
ततः श्रीतिमिरीदङ्गे पार्श्वनाथं जिनोत्तमम् । उपकेशपुरे सूरिर्वीरं च प्राणमत्तराम् ॥१०१॥
लोका अनेके रूप्याणामकुर्वन् लंभनीर्धनाः । उत्सवानप्यनेकांश्च तत्संख्यां नाभवं खलु ॥
न्यवर्तत ततः सूरिः प्रति श्रीमेदिनीतटम् । संविधातुं चतुर्मासीं सङ्घस्याग्रे प्रतिश्रुताम् ॥१०३
विहरन् क्रमतोऽथैवं प्रापोऽच्छ्रीमेदिनीतटम् । उत्सवैश्च सुभिर्दिव्यैः प्राविशत्तदुपाश्रयम् ॥१०४
परिपूर्णां चतुर्मासीं श्रीसूरिस्तत्रोत्सुखात् । तन्मुखालोकतृप्त्या तु श्रीसङ्घो नाक्षिसन्ततिम् ॥

एवं श्रीविजयादिदेवसुगुरुः सम्प्रत्यतिष्ठत्तराम्,
श्रीमन्मेदतटे स्फुटे सुखचयैश्चश्चतुर्मासकम् ।
अर्हद्बिम्बसमुच्चयं च रुचिरश्रीः प्रत्यतिष्ठत्तराम्,
श्रीश्रीवल्लभपाठकोदितयशाः सर्वत्र जाग्रद्यशाः ॥१०६॥

इतिश्री श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराजपातिसाहिश्रीअकब्बरप्रदत्त-जगद्गुरुविरुदधारकभट्टारक श्रीहीरविजयसूरीश्वरपट्टालङ्कारपातसाहिश्रीअकब्बरसभासंलब्धदुर्वादिजयवादभट्टारकश्रीविजयसेनसूरीश्वरपट्टपूर्वाचलसहस्रकरानुकारि पातिसाहिश्रीजिहांगीरप्रदत्तमहा-तपाविरुदधारि भ० श्रीविजयदेवसूरीश्वरगुणवर्णनप्रबन्धे श्रीमद्विजयदेवसूरीणां प्रथमागमन-प्रति-ष्ठाविधान-श्रीपामदचतुर्मास्यवस्थानवर्णनो नाम १० सर्गः ॥

९९–रूपकमित्यत्र आत्वैकवचनं तेन रूपकाणीति ज्ञायतेऽयम् ।

१०३–कथंभूतां चतुर्मासीं सङ्घस्याग्रे प्रतिश्रुतां अङ्गीकृतां । प्रतिज्ञातमूरीकृतोररीकृते संश्रुतमभ्युपगतमुररीकृतमाश्रुतं संगीर्णं प्रतिश्रुतं चेति हैमकोषः ।

१०४–तस्मिन् मेदिनीतटे उपाश्रयस्तदुपाश्रयस्तं तदुपाश्रयम् ।

एकादशः सर्गः

अथ सागरपक्षीयः सान्तीदासो महर्द्धिकः । श्रावकः श्रावकाधीशो नरेश इव शोभते ॥१॥
श्रीमत्यहम्मदावादे वदावदवरंवदः । श्रीमत्सागरपक्षीयसूरिधर्मपरायणः ॥ २ ॥ युग्मम् ।
एकदा व्यग्रशचित्ते स्वीयगुर्वोः परस्परम् । कथं विवाद एकत्वे द्वित्वं चापि कथं पृथक् ॥३॥
प्रभाते गुरुमापृच्छच परस्परप्ररूपणाम् (–धर्म द्वयप्ररूपणाम् –इति वा पाठः)
निर्णयानि हि साक्षित्वमङ्गीकृत्य तदा वरम् ॥४॥ युग्मम् ।
गुरोः पार्श्वे समागत्य श्रीगुरुं स न्यवेदयत् । मदुक्तं वचनं सत्यं कुरु चेद्दूरमिच्छसि ॥५॥
विजयदेवसूरीन्द्रं श्रीमन्मेदतटात् पुरात् । आहूयाऽन्याऽदरं कृत्वा मुक्त्वात्मीयजनानपि ॥६॥
यदि त्वं पूर्वशास्त्राणामनुसारनिरूपिताम् । कुर्याः प्ररूपणां सारां नान्यथा द्वेषपोषिकाम् ॥७॥
सूरे सर्वजनीना यज्जिनधर्मप्ररूपणा । क्वापि पारंपरीणा च भवेत्सर्वपथीनिका ॥८॥
ततस्तस्य गुरुः प्राह–भूपे श्रावक सुन्दरम् । तमाहूय, स आयानादायान्यहमितो ध्रुवम् ॥९॥
सान्तीदासस्तदोत्थाय साधर्मिकानकारयत् । तानापृच्छच च तानेव तमाह्वातुमचालयत् ॥१०॥
विजयदेवसूरीन्द्रश्रावकैरपि संयुतान् । परस्परमुभौ तौ हि यद्विरोधनिषेधकाः ॥११॥ युग्मम् ।
प्रचलन्तस्त आगच्छन् पुरं श्रीमेदिनीतटे । विजयदेवसूरींश्च प्राणमन् प्रेमपूरिताः ॥१२॥
ताम्यामुक्तामवोचं च वाचं वाचंयमेशितुः । पुरतः मीनिकर्त्री ते पत्राणि च ददुः करैः ॥१३॥
श्रुत्वा सूरीश्वरो वार्तां तत्पत्राणि प्रवाच्य च । ह्यमोदत निर्द्वन्द्वो जयो द्वन्द्वक्षयस्सताम् ॥१४॥
(अथवा–ह्यमोदत निर्द्वेषो जयो द्वेषक्षयः सताम् –इति पाठः)

८–सर्वजनीना सर्वजनेषु प्रसिद्धा । पारम्परीणा परम्परया प्राप्ता । सर्वपथीनिका सर्वपथीना एव सर्वपथीनिका सर्वपथिषु अव्याहता सर्वजिनधर्ममार्गेषु अव्याहता इत्यर्थः । सर्वजनीना सर्वपथीना–इत्युभयत्र प्रसिद्धाव्याहतयोर्जनपथोर्णिरं वा वक्तव्यं इति वार्तिकात् खप्रत्ययः । पारम्परीणा इत्यत्र पुरापरम्पराद्भ्यां भवनं प्राप्तगमूढे ख इति खः ।

९–आयानात् इति या प्रापणे लोट् तातङ्ङादेशे रूपं । आयानीति इण् गतौ आङ्पूर्वः इत्यस्य लोटः उत्तमपुरुषस्य मेर्निरिति मेनि इत्यादेशे आडुत्तमस्य पिच्चेति आडागमे रूपम् ।

११–उभौ इत्यत्र श्रीविजयदेवसूरिश्रावकसमुदायापेक्षया सागरपक्षीयश्रावकसमुदायापेक्षया च द्विवचनम् ।

१३–ताभ्यां सागरपक्षीयसूरिकथितां सान्तीदासकथितां च वाचं वचनं । वाचंयमेशितुः श्रीविजयदेवसूरिगुरोः पुरतोऽग्रे ।

मेदिनीतटसङ्घोऽपि श्रुत्वा वार्तामिमोदत । तैरुक्तां श्रीगुरुक्तां च विमुक्तां द्वेषभाषया ॥१५॥
परोपकारपरमीतिरतिनिश्चितचेतसा । प्रतिष्ठि नाथ तिष्ठानि सङ्घोऽभाणीति सूरिणा ॥१६॥
शुभमुहूर्तं समालोक्य पुरान्मेदतटाभिधात् । मातिष्ठत च सूरीन्द्रः सहस्रनरसंयुतः ॥१७॥
किष्किन्धाख्यपुरे पूर्वं, ग्रामे च श्रीवल्लुन्दके । पुर्यां श्रीजयतारिण्यां, ग्रामे चाङ्गे पुकाभिधे ॥
ग्रामे रायपुरे, ग्रामे सुरदावासनामके । तथा च वगडीग्रामे, श्रीसोजितपुरे वरे ॥१९॥
ततः श्रीआउयाग्रामे, ग्रामे श्रीपपरुयाभिधे । मञ्जुले धामलीग्रामे, पल्लिकापत्तने ततः ॥२०॥
श्रीमद् गुंदवचग्रामे, श्रीवींझेवाभिधे तथा । नाड्लनाम्नि च द्रङ्गे, नडुलाई पुरे पुनः ॥२१॥
श्रीपाणेराभिधे ग्रामे, वरे श्रीसादडीपुरे । श्रीसूरीन्द्रः समागच्छद् विहरन्नुत्सवैः क्रमात् ॥२२॥
—पञ्चभिः कुलकम् ।

अस्मिन्नवसरेऽथाऽभ्योदयपुरमहाजनः । पुनर्नागपुरादायाश्चमस्कर्तुं महाजनः ॥२३॥
उभावाह्वयतां सूरिं विज्ञप्यैवं कृपां कुरु । पर्युषितं चतुर्मासीं सर्वथाऽदृष्टपूर्विणौ ॥२४॥
सूरिः प्राहेति तौ वादं भेक्तुमाकारयन्त्यमी । मामतो नागतिर्महा सन्तीदासश्च सागराः ॥२५॥
ततो राणपुरे देवांस्ताभ्यामन्यैश्च संयुतः । अभिवन्द्य कृतास्तोकव्ययौ तौ स व्यसर्जयत् ॥२६॥
ततः प्रस्थित आनन्दसाधुवृन्दविराजितः । सुडाडाभिध सद्ग्रामे वाहलीग्रामके तथा ॥
ततः पावाभिधे ग्रामे, ग्रामे च कमलाभिधे । ततश्च धामलाग्रामे, ग्रामे आहुरिनामके ॥२८॥
एतेषु च विचालेषु ग्रामेष्वन्येषु भूरिषु । विचरन् क्रमतः प्राप्तत् क्रियमाणमहोत्सवः ॥२९॥
येन उत्पन्नसद्भावैः प्रतिग्रामं बहुव्ययैः । श्रीसूरिं प्राप्य श्राद्धैः श्रीजावालपुरं प्रति ॥३०॥
—अष्टभिःकुलकम् ।

आह्वानाय समागच्छन् श्राद्धाः स्वस्य च तस्य ये । श्रीमदहम्मदावादं प्रत्यमुश्चत्ततः स तान् ॥

२४— उभौ उदयपुर—नागपुर—महाजनौ सूरिं आह्वयतां । किं कृत्वा ? एवं विज्ञाप्य एवमिति किं—कृपां कुरु । कथंभूतौ उभौ सर्वथा अदृष्टपूर्विणौ ।

२५—सूरिः, तौ उदयपुर—नागपुर—महाजनौ प्रति इति प्राह ।

२६—सः श्रीविजयदेवसूरिः तौ उदयपुरनागपुरमहाजनौ व्यसर्जयत् । कथंभूतौ तौ कृताऽस्तोकव्ययौ ।

३१—सः श्रीविजयदेवसूरिः। ततः श्रीजावालपुरं आगमनानन्तरं स्वस्य आत्मनः, च: पुनस्तस्य सागरपक्षीयस्य ये श्राद्धाः आह्वानाय समागच्छन् तान् श्रीमदहम्मदावादं प्रति अमुञ्चत् पश्चात्प्रेषयत् इत्यर्थः ।

गत्वा तेऽपि ततस्तत्र सन्तीदासं न्यवेदयन् । विजयदेवसूरीन्द्रो जालोरपुरमागमत् ॥३२॥
मुक्तिसागर आदाय मानमभिगच्छतात् । मया-गुरुन्नादीय मानाय मानानीमगच्छतात् ।
पोस्फुरीति मनी शक्तिर्नं प्रतिमानो यदि ॥३३॥
सन्तीदासो वचः श्रुत्वा तेषामिति मनोहरम् । अपीनय गुरुं स्वीयं मुक्तिसागरनामकम् ॥३४॥
उत्सूत्रभाषकत्वाच्च श्रीसूर्युदितलोपनात् । तद्वचः कर्णयोः श्रुत्वा तद्वचःप्रहतोऽभवत् ॥३५॥
मुक्तिसागरनामा सो मुक्तिसागरनामभाक् । मुक्तिसागरनामौजःसंजातरसनादृषद् ॥३६॥
विजयदेवसूरीन्द्रनाममाहात्म्यतर्जितः । निरुत्तरमनःशक्तिर्नागच्छन्मुक्तिसागरः ॥३७॥
द्वौ भेदौ सागरो धत्ते विष-रत्नसमुद्भवात् । कलिकालस्य माहात्म्यात् सोऽधुनाऽप्याद्यमेदभाक्॥

३२–तेऽपीति श्रीविजयदेवसूरिश्रावकाः सागरपक्षीयश्रावकाश्च ततः श्रीजालोरपुरात् तत्र श्रीअहम्मदावादे ।

३५-३६–युग्मम्, व्याख्या–अयं मुक्तिसागरनामभाक् सः पण्डितः प्रतिवादी तद्वचः-प्रहतः अभवत् । तस्य सान्तीदासस्य वचो वचनं श्रीविजयदेवसूरिर्वादी महाहूतः त्वया सह वादं कर्तुं श्रीजालोरपुरे आयातः अथ त्वमपि तेन सह वादं कर्तुं मया सह चल इत्येतद्रूपं, तेन प्रहतो निराकृत इव । तद्वचःप्रहतः संजात इत्यर्थः । किं कृत्वा ? तद्वचः कर्णयोः श्रुत्वा तस्य सन्तीदासस्य वचः श्रीविजयदेवसूरिर्वादी त्वया सह वादं कर्तुं श्रीजालोरपुरे आयात इति कर्णविषये श्रुत्वा । कथंभूतो मुक्तिसागरनामा सः ? मुक्तिसागरनामभाक् । मुक्तिरेव सा लक्ष्मीस्तस्या गरनाम विषनाम भजतीति मुक्तिसागरनामभाक् । मुक्तिलक्ष्म्याः विषनाम समान इत्यर्थः । यथा अन्यस्यापि सज्जनस्य दुराशयः प्रतिकूलभाषी पुरुषो विषोपमो भवेत्तथा मुक्तिसागरोऽपि प्रतिकूलवादी प्रतिवादी मुक्तिलक्ष्म्या विषोपमानो जात इति भावः । पुनः कथंभूतो मुक्तिसागरनामा सः ? मुक्तिसागरनामौजःसञ्जातरसनादृषद्–मुक्तिरेव सा मुक्तिसा मुक्तिलक्ष्मीः तामस्यति क्षिपति नाशयति यत्तत् मुक्तिसाः–मुक्तिप्राप्तिनिषेधकमित्यर्थः । ईदृशं यद्गरमिव विषमिव यत् नाम स मुक्तिसागरनामा; अथवा अग इव पर्वत इव राजते यत्तत् अगरं पाषाणसदृशं मुक्तिसाश्च तत् अगरं च मुक्तिसागरं । एवंविधं यन्नाम तस्य यत् ओजस्तेजस्तेन संजाता रसना दृषद् यस्य सः, मुक्तिसागरनामौजःसंजातरसनादृषद्–मुक्तिलक्ष्मीविनाशकविषप्रायपाषाणप्राय नामप्रभावसंजातजिह्वापाषाण इत्यर्थः । असु क्षेपणे दिवादिः परस्मैपदी, क्विपि मुक्तिसाः । ओजो दीप्तिप्रकाशयोः अवष्टम्भे बले धातौ तेजसीति हैमानेकार्थः । कस्मात् ईदृशो जातः इत्याह–उत्सूत्रभाषकत्वात् । चः पुनः श्रीसूर्युदितलोपनात् । श्रीसूरिणा श्रीविजयदेवसूरिणा उदितं वक्तं श्रीसूर्युदितं तस्य लोपनं उल्लंघनं तस्मात् ।

आद्यं भेदं समासाद्य वर्तन्ते सागराः कलौ । सागरा इति नामानः प्रोच्यन्ते साधवोऽप्यमी ॥
विजयदेवसूरीन्द्रसत्यवादिपराजिताः । सागरा इत्यकथ्यन्त तत्प्रतीपा हि साधवः ॥४१॥
अन्त्यं भेदं समासाद्य विद्यन्ते सागरा हि ये । सागरा इति नामानः प्रोच्यन्ते तेऽपि साधवः ॥
विजयदेवसूरीन्द्रकथिताज्ञाविधायकाः । ते सर्वेषामुपादेया इव रत्नसमुच्चयाः ॥४३॥
अथवा सागराः प्रोक्ता द्विविधाः पूर्वसूरिभिः । केचित् मृष्टास्तथा क्षाराः केचिदिति जगत्स्थितिः ॥
आहताः सूरिणा ये ते मृष्टा-अन्येऽन्यथाविधाः । मृष्टाः क्षारा अगस्त्येन पीतास्त्यक्ता इवाऽभवन् ॥
सूरिप्रतापसन्तप्तो निश्शक्तिर्मुक्तिसागरः । काकनाशं ननाशेव तस्थौ तत्रैव निष्प्रभः ॥४६॥
अथ श्रीभिन्दिमालादिद्रङ्गवासिमहाजनाः । संरक्षितुं चतुर्मासीं श्रीसूरिं समाहूयन् ॥४७॥
इयता च समागच्छन् शीशेवाद्रङ्गवासिनः । संभूय श्रावकाः सर्वे निश्चित्याङ्गीकृतं ह्यदः ॥४८॥
अन्ये सभ्या यदीभ्याश्च श्रावका द्रङ्गवासिनः । रक्षिष्यामश्चतुर्मासीं तथाप्यत्र वयं गुरुम् ॥४९॥
प्राहुः सूरिं प्रणम्यैवं चतुर्मासीं गुरो कुरु । वयं ग्राम्याः क्व चास्माकं त्वत्पदाब्जरजोऽन्यतः ॥५०॥
तीर्थं श्रीवरकाणाख्यं वन्दस्व चिरमिन्द च । त्वदीयाः सेवकाः स्मो नः कृतार्थान् कुरु च ध्रुवम् ॥
भिन्दिमालादिकद्रङ्गवासिनः श्रावकास्तदा । तूष्णींशीला विलक्षाश्च व्यराजंश्चित्रिता इव ॥५२॥
विज्ञाय निश्चयं तेषां चातुर्मासकरक्षणे । तूष्णीकः सूरिरप्यास्थादङ्गीकृत्य च तद्वचः ॥५३॥
न विधास्ये चतुर्मासीं कथयिष्यामि चेदिति । एते दुःखं करिष्यन्ति यद्ग्राम्या नेति तिष्ठति
(-यद्ग्राम्या न वसत्यनः-पा०) ॥५४॥ युग्मम् ।
श्रावकान् कांश्चिदापृच्छ्य प्रमोच्यैव च कांश्चन । प्राप्नोत् प्रस्थाय शींशेवानगरं सह तैर्गुरुः ॥
सूरिः पर्यवसच्चत्र चतुर्मासीं महोत्सवैः । प्रीणयन् श्रावकान् धर्मान् प्रणयन् प्रणयाश्रयान् ॥५६॥

इत्थं श्रीविजयादिदेवगुरुणा सन्दब्धमुत्साहतो,
विद्वेषिप्रतिवादिनां परिभवं दौर्गत्यविध्वंसकम् ।

४८-अदः इति किं इत्याह-अतो अनु अस्मात् पश्चात् त्वत्पदाब्जरजः त्वच्चरणकमलरेणुः अस्माकं क्व न कदापीति भावः ।

५१-इदि परमैश्वर्ये भ्वादिः परस्मैपदी, लात्वाशिषि लिङ् छोटौ इति छोटो मध्यमपुरुषैकवचने, सेर्ह्यपिच्चेति सेर्हौ, अतोहेरिति हेर्लुकि इन्देति सिद्धिः ।

५५-कांश्चित् श्रावकान् मन्त्रिजयमल्लादि-जाबालपुरवासिनः, कांश्चन श्रावकान् भिन्दिमालादिद्रङ्गवासिनः । तैः सह शींशेवाश्रावकैः सह ।

५६-अत्र शींशेवानगरे प्रणयाश्रयान् प्रेममन्दिरान् प्रणयः प्रेमप्रश्रययोरिति हैमानेकार्थः ।

यं श्रीवल्लभपाठकः समदृभद् भूमण्डले विश्रुतं,
श्रुत्वा तं सुकृते भवन्तु भविकाः सान्द्रप्रतिज्ञाः सदा ॥५७॥

इति श्रीबृहत्खरतरगच्छीय . श्रीजिनराजसूरिसन्तानीय पाठकश्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराज पातशाह श्रीअकब्बरप्रदत्तजगद्गुरुविरुदधारक श्रीहीरविजयसूरीश्वरपट्टालङ्कार पातिशाहिश्रीअकब्बरसभासंलब्धदुर्वादिजयवाद भट्टारक श्रीविजयसेनसूरीश्वरपट्टपूर्वाचलसहस्रकरानुकारि पातिशाहि श्रीजिहांगीरप्रदत्त महातपाबिरुदधारि श्रीविजयदेवसूरीश्वरगुणवर्णनप्रबन्धे श्रीमद्विजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरिविरचित-प्रतिवादपराभववर्णनो नाम एकादशः सर्गः ॥११॥

विहरन्नन्यदा सूरिरायान् स्वर्णगिरिं प्रति । मार्गान्तरालवर्तित्वादायाच्छ्रीपल्लिकापुरीम् ॥
जीर्णोद्धारे महत्पुण्यमिति सूरिरुपादिशत् । श्रावकान् सुकृतं श्रोतॄन् सत्सदः सत्सदः सदः ॥
इत्युपादिश्य सूरीन्द्रस्ततः प्रास्थत हर्षतः । एकत्रावस्थितिर्युक्ता यतीनां न कदापि यत् ॥१४॥
अथैकत्रोपविष्टौ तौ ध्यायतः स्मैकदा हृदः । डूंगरभाखरेत्याख्या सर्वाद्रीणां श्रुता भुवि ॥
अतो विशेषभाषायां प्रवर्तेत तदा वरम् । डूंगरभाखरेत्याख्या जगदेकमरूपिका ॥१६॥
कर्तव्यात्सर्वलोकानां सर्वलोकैः कृतादपि । धर्मात् सान्द्रुतधर्मे चेत् करवाव तदा भवेत् ॥१७॥
श्रीमेरुगिरिनामानावावां ख्यातौ सहोदरौ । कारयाव मरौ मेरुं चैत्यं ज्ञापयितुं जनान् ॥१८॥
उद्धारयतां तौ हि विचिन्त्येति स्वचेतसि । नवलक्षाभिधं चैत्यं जीर्णं तन्वा न तेजसा ॥१९॥
नवलक्षाणि रूप्याणि लगन्त्यस्य विधापने । नवलक्षमतो नाम चैत्यास्यास्य भुवि श्रुतम् ॥२०॥
प्रतिमा पार्श्वनाथस्य कारितेहितपूरिका । ताभ्यां कामलतेवैषा सत्फणा नवपल्लवा ॥२१॥
रचितं स्वर्णरत्नौघैर्यशःस्तम्भमिवोन्नतम् । तौ न्यवेशयतां दण्डं चैत्ये ध्वजविराजितम् ॥२२॥
सुवर्णकलशं चैत्यगृहस्योपरि सुन्दरम् । प्रत्यष्ठापयतां तौ तत् तदा मेरुरिव व्यभात् ॥२३॥
मेरुःसुमेरुरित्याख्यां बिभ्राणे ते व्यराजताम् । आकारं पञ्चमेरूणामनुध्येतां च सज्जनैः ॥२४॥
नवपल्लवनामायं पार्श्वनाथः प्रभाववान् । अभवद्भवदैश्वर्यप्रथितः पृथिवीतले ॥२५॥
निष्पन्ने पार्श्वचैत्येऽपि पार्श्वचैत्येष्वयाद्भुते । प्रतिष्ठां न विना पूजा सत्प्रभावेपि तद्द्वये ॥२६॥
अतोऽस्य कारयावावां प्रतिष्ठां श्रेष्ठनिष्ठया । श्रीसूरीश्वरमकार्षं श्रीवीझैरापुरस्थितम् ॥२७॥

१२—आयान्—या प्रापणे, आङ् पूर्वः शतृप्रत्ययान्तः आगच्छन् इत्यर्थः प्रथमा। द्वितीयस्तु आयादिति अनद्यतने लङ् इति लङः प्रथमपुरुषैकवचनप्रयोगः आगच्छदित्यर्थः।

१३—सुकृतं श्रोतॄन्—न लोकाव्ययनिष्ठाखलर्थतृनामिति श्रोतॄन् इत्यस्य तृन्निति शीलार्थेतृन् प्रत्ययान्तत्वप्रयोगात् । सुकृतमिति द्वितीया । सत्सदः षद्लृविशरणगत्यवसादनेषु भ्वादौ, चुरादिः परस्मैपदी । सत्सु साधुलोकेषु सीदन्तीति सत्सदः साधुलोकसेवकास्तान् । सतां पण्डितानां पूजितानां वा राजादीनां सदांसि सभाः तेषु सीदन्तीति सत्सदः पण्डितसभोपवेशकाः राजसभोपवेशका वा इत्यर्थः । सत्सद इत्यत्र सत्सदस्सद इत्यत्र च सत्सू द्विषद्रुहेति क्विप् सदःशब्दः धौ[illegible]।

१९—तन्वा शरीरेण, अत्र तनू शब्द ऊङन्तः । तन्वादेर्वेति वैकल्पिकस्य ऊङः प्राप्तेः।

२२—तौ डूंगरभाखरौ भ्रातरौ तत् नवलक्षं नाम चैत्यं।

२४—ते श्रीरत्न्या [illegible] चैत्ययोर्द्वयं [illegible] । सः पुनः सज्जनैः पञ्चमेरूनामाकारे अनुध्येताम्।

२७—श्रेष्ठनिष्ठया अत्र निष्ठाशब्दः उत्कर्ष १ व्यवस्था २ निष्पत्ति ३ निर्वाह ४ प्रमाणां [illegible] पर्यायः। निष्ठोत्कर्षव्यवस्थयोः क्लेशे निष्पत्तौ नाशेऽन्ते निर्वाहे याचने व्रते इति हैमः।

विचिन्त्यैवमुभावेतौ श्रीमद्डुङ्गरभापरौ । भ्रातरौ संघसंयुक्तावाहातुं तमगच्छताम् ॥२८॥
प्रणम्य चरणौ सूरेः पुरस्तादुपविश्य च । अवक्तां व्यक्तवद् व्यक्तवाचया तौ गुरूत्तमम् ॥२९॥
नवपल्लवपार्श्वार्हत्प्रतिमां प्रतितिष्ठिपतात् । स्वच्छेन विधिनानुच्छगच्छेशागच्छ सत्वरम् ॥३०॥
श्रीसंघं सूरिराभाषीद् वीक्षेवापुरवासिनम् । ततो विगतसन्तापः सन्तापं चेतसो हरन् ॥३१॥
भवन्मनोरथः पूर्णश्चतुर्मासीविधानतः । अथ स्याद्भवदाशा चेद् प्रतिष्ठे पल्लिकां प्रति ॥३२॥
मामाह्वयत एतौ यत् श्रीमद्डुंगरभापरौ । भ्रातरौ श्रीप्रतिष्ठार्थं श्रीपल्लीसंघसंयुतौ ॥३३॥
अवोचच ततः श्रीमद्वीक्षेवासंघ आहतः । आह्वास्यतां न यद्येतौ नाऽवास्यविष्यमन्यथा ॥३४॥
प्रतिष्ठाया महान् लाभः प्रतिषेधामि तं कथम् । अतः सूरे प्रतिष्ठस्व प्रतिमां प्रतितिष्ठ च ॥३५॥
अचलत्स चलत्कल्पवृक्षकल्पो पृथुकल्पधीः । संकल्पपूरणार्थेव तयोर्नान्यात्र कल्पना ॥३६॥
सूरिः प्रापोद् पुरीं पल्लीं सदानीयध्वनिर्दिवम् । यशस्तस्य नमज्ज्योतिरिव विश्वं विवस्वतः ॥
अथाकारयतामन्याग्रामग्रामपरादितः । तौ मन्त्री च मतः श्राद्धान् ग्रामीणानपि चादरात् ॥
चतुर्दिग्भ्यः समाजग्मुः श्रावका जलदा इव । दातुं स्नातुं च साराणि नीराणि सुयशांसि च ॥
षोडशस्य शतस्याथ षडशीतितमेऽब्दके । वैशाखशुक्लपक्षस्य सुमुहूर्ते दिनेऽष्टमे ॥४०॥
प्रत्यतिष्ठद्गरिष्ठात्मा श्रेष्ठेन विधिना गुरुः । नवपल्लवपार्श्वार्हत्प्रतिमां प्रतिमामिमाम् ॥४१॥
अस्मिन्नवसरे मन्त्री जयमल्लः समागमत् । सौधर्मेन्द्र इव द्रष्टुं प्रतिष्ठां तौ च वन्दितुम् ॥४२॥
प्रतिष्ठा-प्रतिमा-चैत्यं निरीक्ष्येति च सोऽवदत् । अधिकाधिकमाहात्म्यं समकारयतामिमौ ॥

२९—अवक्तां—वच् परिभाषणे इत्यस्य अनद्यतने भूतेति लङि, प्रथमपुरुषद्विवचनं । व्यक्तवत् पण्डितवत्, व्यक्तवाचया स्पष्टभाषया । अत्र वाचाशब्दः हलन्तादिति वैकल्पिके टापि टाबन्तः । 'वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा॥' इति वचनात् ।

३०—प्रतितिष्ठिपतात् आशिषि लोटो मध्यमपुरुषस्य तुह्योस्तातङ्ङाशिष्यन्यतरस्यामिति हि स्थाने वैकल्पिके तातङ् इत्यादेशे रूपम् ।

३६—सः श्रीविजयदेवसूरिः अचलत् । किं विशिष्टः ? तयोः डुंगरभाभरयोर्भ्रात्रोः संकल्पपूरणार्थैव मनोरथसिद्धये एव चलत्कल्पवृक्षकल्पः जङ्गमकल्पवृक्षसमानः । पुनः कथंभूतः पृथुकल्पधीः विस्तृतसमानबुद्धिः ।

३९—श्रावकाः आजग्मुः । किं कर्तुं ? साराणि द्रव्याणि दातुं, श्रोतुं च इति शब्दे । पुनः किं कर्तुं ? सुयशांसि स्नातुं । के इव ? जलदा इव । किं कर्तुं ? नीराणि दातुं । चः पुन सुयशांसि स्नातुं । मेघाः सर्वतो दिशः समयन् वर्षन्तीति सुयशांसि स्नातुमिति सर्वं तुल्यम् ।

४१—प्रतिष्ठाप्रतिमाचैत्यमित्यत्र समाहारद्वन्द्वत्वादेकवचनम् ।

आययन्त चतुर्मासीं श्रीसुवर्णगिरिं पुरम् । भावाभिवृष्टमानन्दवार्धिं सूरिपुङ्गवम् ॥५४॥
सोऽपि गत्वा ततो नत्वा श्रीमद्विजयसिंहगुरुं । मासान्तरं परिचयं श्रीसूरीन्द्रपदाम्बुजे ॥५५॥
सूरिः सदा तस्य सम्पदं हर्षोत्कर्षोऽभिमोदनः । मरुदृत्नादिकं गुर्जरगिरिसिंहकम् ॥५६॥
श्रीमन्नाकुमारायसकलजनानिवहः सदा । सोनानाम्न्या इदं पत्रं श्राविकायाः महामहम् ॥५७॥
चातुर्मास्याय प्रहूतश्च तत्त्वं श्रीविजयदेवम् । प्रतिमानां प्रतिष्ठाया विद्यानिरिवारकम् ॥५८॥
समनुष्यत्वार्थं चित्तं प्रतिष्ठेनानिर्गमः । चातुर्येण च केनापि निरवनाम्नावृतगुरु ॥ युग्मम् ।
प्रतिष्ठामहोत्सवं सहितो विहाय देशानि । श्रीसूरीन्द्रमिति प्राह प्रार्थनार्थकनकः ॥६०॥
इतीति किं तदा-पर्वताशाः प्रतिष्ठार्थं नायास्यन् किल पथिका ।

साधार्मिकप्रदेशानो दष्टिपोर्ण सदं न मे ॥६१॥

तपःशमवरिष्ठस्य प्रतिष्ठस्य गरिष्ठधीः । न निषेधाम्बयो धर्मकार्यविघ्नं करोमि न ॥६२॥
अथ प्रतिष्ठा श्रेष्ठ मुहूर्ते मूर्तिमान् महान् । गद्धर्षे इव सूरीन्द्रः श्रीनाडोलपुरागतः ॥६३॥
प्रतिष्ठामं प्रतिष्ठं विपदचापरन् वरम् । साध्वाचारं मनोचारं कारयन् श्रावकादिकान् ॥६४॥
मेदिनीतटसमृद्धं समवाप गणाधिपः । श्रुत्वा समागतं सङ्घो नन्तुमभ्यागमत्तदा ॥६५॥
अभिवन्द्य पदाम्भोजे सह मत्वा च तं गुरुम् । नयति स्म मुदा सङ्घः स्वकीयं सदुपाश्रयम् ॥
तदा सङ्घोऽकरोद्दिव्यमनल्पमहोत्सवम् । गुरोरागमने किं किं न कुर्वन्ति भक्तिका जनाः ॥६७॥
अथ सोनाभिधा श्राद्धी प्रतिष्ठार्थं शुभे दिनम् । अपृच्छत्सूरीगुरुं भक्त्या सर्वसङ्घसमक्षकम् ॥६८॥

५४—एवं विधायेति युग्मव्याख्या लिख्यते—शौण्डीरः गर्ववान् तस्य भावः शौण्डीर्यं, गर्ववत्त्वमित्यर्थः । निरनुस्वारतालव्यचतुर्दशस्वरादिरयं । तया सोनां नाम्न्या अर्योण्या वैश्यजाति-स्त्रिया वणिग्जातिस्त्रिया वणिजः पुंवेरवर्थेः । कथंभूतया तया ? अर्योणां अर्थेया अर्योणां वणिग्जातिर्वाणां अर्थया स्वामिन्या । अर्याणी अर्यो अत्र उभयत्र जातिवाचित्वात् 'अर्ये-क्षत्रिया-र्ध्यो वा स्वार्थे' इति वैकल्पिके ङीपि आनुगागमे च अर्याणी ङीपो अभावे आनुकम अभावे अजादयष्टाविति टापि अर्या अर्यः स्वामि वैश्ययोरिति निपातितः । स्वार्यः स्वामिवैश्ययोरिति हैमानेकार्थः । एवं अर्योण्या अर्या अर्योणामिति । त्रिषु ह्रस्व एव अकारो ज्ञेयः । भावसम्वामिति-श्रीसुवर्णगिरि पुरमावसग्वमित्यत्र उपाऽन्वध्याङ्वस इति आद्पूर्वस्य वसतेराधारस्य श्रीसुवर्णगिरि पुरमित्यस्य कर्म । चतुर्मासीमित्यत्र कालाध्वनोरत्यन्तसंयोगे इति कर्म ।

५९—समनुष्यदिति—तस्याः सोनां नाम्न्याः श्राविकायाः चित्तं ज्ञानत्वं मतित्वं वा तद्वित्वं तेन ।

६२—तपःशम इति—तपःशमौ एव वरिष्ठं स्वं धनं यस्य तत्सम्बोधनं हे तपःशमवरिष्ठस्व हे श्रीविजयदेवसूरे प्रतिष्ठस्व प्रवक्ष । द्वा गतिनिवृत्तौ समवप्रविभ्यः स्थ इत्यात्मनेपदी ।

श्रीसूरीन्द्रस्तदा प्राह सोनाख्ये श्राविकेऽस्ति हि। प्रतिष्ठार्हं दिनं ज्येष्ठशुक्लपक्षत्रयोदशम् ॥६९॥
सुसामग्रीं प्रतिष्ठाया विधाय विधिवत्तदा। प्रतिमाः सूरिहस्तेन प्रतिष्ठापयति स्म सा ॥७०॥
प्रतिमाः प्रत्यतिष्ठत्ताः सूरिर्जातमहोत्सवम्। रूप्यकाण्यददाद्धर्पाद्भक्त्या संघान् प्रभोज्य सा ॥
षोडशस्य शतस्यास्मिन् सप्ताशीतितमेऽब्दके। प्रतिमानां प्रतिष्ठाऽभूदेवं श्रीमेदिनीतटे ॥७२॥

एवं श्रीविजयादिदेवसुगुरुः स्वर्णाचलाख्ये पुरे,
श्रीमन्मेदतटे पुरे च स लसद्बिम्बप्रतिष्ठे व्यधात्।
श्रीश्रीवल्लभपाठकः समपठत् यस्य प्रशस्यानिमान्,
सत्कर्मण्यचयान् विचक्षणगणैः संवर्णनीयान् सदा ॥७३॥

इतिश्री श्रीबृहत्खरतरगच्छीय श्रीजिनराजसूरिसन्तानीय पाठकश्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराज पातशाह श्रीअकब्बरप्रदत्तजगद्गुरुबिरुदधारक श्रीहीरविजयसूरीश्वरपट्टालङ्कार पातिशाहिश्रीअकब्बरसभासंलब्धदुर्वादिजयवाद भट्टारक श्रीविजयसेनसूरीश्वरपट्टपूर्वाचलसहस्रकरानुकारि पातिशाहि श्रीजिहांगीरप्रदत्त महातपाबिरुदधारि श्रीविजयदेवसूरीश्वरगुणवर्णनप्रबन्धे श्रीमद्विजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरिनिर्मित-श्रीजाबालपुर—श्रीमेदिनीतटपुरप्रतिमाप्रतिष्ठाप्रतिपादको नाम त्रयोदशमः सर्गः ॥१३॥

चतुर्दशः सर्गः

अथ नागपुरान्सङ्घः समाह्वातुं समागमत् । गौरक्षितुं चतुर्मासं सूरीन्द्रं मेडतापुरे ॥१॥
प्रणम्य सद्गुरुः मौनत्वेन सूरिः स्वभक्तितः । अपृच्छन्मेडतासङ्घं संघो मामाह्वयत्ययम् ॥२॥
मेदिनीतटसंघोऽत्र संघं नागपुरीयकम् । प्राहेति साम्प्रतीनेऽब्दे चतुर्मासं वसिष्यति ॥३॥
महत्त्वमिदमानन्य प्रसद्य च प्रदेहि मे । संघो नागपुरस्येति श्रुत्वा तूष्णीं व्यधात्तदा ॥४॥
मेदिनीतटसद्द्रङ्गं चतुर्मासमुपागमत् । सूरिर्नागपुरीयोऽपि सङ्घः प्रास्थात् तदाज्ञया ॥५॥
अथार्जुनपुरीनाम पुरासीच्छ्रेयसी पुरी । पंचाणीत्यधुना नाम्ना प्रसिद्धास्ति पुरी वरा ॥६॥
तत्र सम्प्रतिराजा प्राक् जिनागारमकारयत् । पद्मप्रभजिनं तत्र स्वामित्वेन न्यवेशयत् ॥७॥
अनेकाः प्रतिमा रीरीमय्यः सर्वा मनोरमाः । श्वेतस्वर्णमयी पार्श्वप्रतिमैका प्रभावभाः ॥८॥
पद्मप्रभजिनाधीनपार्श्वासीना इमा व्यधुः । प्रभावोऽपि महानासीत्तस्य तासां च सर्वदा ॥९॥
कुतोऽपि कारणाद् द्रङ्गभङ्गात्तद्रागिणो जनाः । ताः सर्वाः प्रतिमा भूमौ न्यस्यन्नुपसरः पुराः ॥
अगच्छत्सपुरोऽनेहा अम्रियन्त जना अपि । तासां निक्षेपकाः सर्वे द्रङ्गं ग्रामोऽपि चाभवत् ॥
अखनन्नन्यदा लोकाः समीपे सरसो भुवम् । प्रतिमैका तदा खण्डा प्रादुरासीत्स्वभावतः ॥
अन्या अपि ततः सर्वाः प्रादुरासन् यथाश्रुतम् । अभवच्च तदा तासां सत्पूजा महिमापि च ॥
अहो अजीववस्तूनां रागद्वेषाद्यभावतः । कदा नार्चा कदाप्यर्चा पुनरर्चा कदापि यत् ॥१४॥
विचस्तत्कर्म नो किंचिद्वक्तुं नो तदनुभोऽपि च । संभावयामः कर्मैव किंचित्तत्रापि निश्चितम् ॥
अथासीत्सवणो धर्मे त्रिगुणः साकुलाकुले । तस्य पुत्रा अमी पञ्च जनीनाः पञ्च सज्जनाः ॥१६॥
तद्यथा-हंसस्तेजस्तथा राजा मदः श्रीमहिराजकः । तेषु भ्रातृद्वयं स्वर्गमापुषः सयनोऽग्रजत् ॥

१-मेडतापुरे इति-मेदिनीतटे पाठान्तरम् ।

२-तेनेति नागपुर सङ्घेन । अयमिति नागपुरसङ्घः ।

३-वसिष्यतीति-विधास्यति पाठान्तरम् ।

५-मेदिनीतटसद्द्रङ्गमित्यत्र उपाऽन्वध्याङ्वसः इति उपपूर्वस्य वसतेराधारत्वात् द्वितीयैकवचनं । चतुर्मासमित्यत्र कालाध्वनोरत्यन्तसंयोगे इति द्वितीया । तदाज्ञयेति श्रीविजय-देवसूरेराज्ञया ।

६-वरेति जने पाठान्तरम् ।

८-प्रभावेण भासते दीप्यते इति क्विपि प्रभावभाः ।

१०-न्यस्यन् निचिक्षिपुः । उपसरः तटाकसमीपे ।

१७-हंसमहिराजभ्रातृद्वयम् ।

पञ्चदशः सर्गः

पूर्वमेव तपोऽकुर्वन्नर्हन्तोऽर्हत्त्वसिद्धये । तपस्यत्यधुनार्हत्त्वमासाद्यापं नवो जिनः ॥१॥
सूरयः साम्प्रतीना हि वर्तमाना जिना अपि । वर्धमानं विहायान्ये कर्तारो नेदृशं तपः ॥२॥
तपः स्तुमोऽत एवास्य कृतं कर्ता करोति च । दीपन्तोऽन्ये च कुर्वन्तो दीप्यतेऽसौ दिने दिने ॥
षोडशस्य वत्सरस्यास्मादेकपष्ठितमाब्दकात् । प्रथमं यत्तपः सूरिर्व्यधात्तत् स्तौमि सम्प्रति ॥
एकवर्षं पुराचाम्लषष्ठाष्टमतपो गुरुः । पारणाविकृतित्यागं निर्विकृतिकमातनोत् ॥५॥
आचाम्लानि चतुर्मासं द्रव्यत्रययुतानि च । स्थानस्थभक्तपानानि व्यदधात्स तपोनिधिः ॥६॥
षष्ठाष्टमोपवासानां पारणायां तपोभिदि । गृह्णन् द्रव्याणि चत्वारि द्वितीयाब्द इदं तपः ॥ युग्मम् ।
द्रव्याणि त्रीणि चत्वारि गृह्णन्नेकाशनं तपः । आवर्षयुगलं सूरिरकरोच्च निरन्तरम् ॥८॥
वन्दनाभिग्रहे श्रीमद्विजयसेनसद्गुरोः । ज्ञात्वेति विरहे सूरेर्भुक्तिर्युक्ता न मे सदा ॥९॥
एकान्तरोपवासान् स व्यधाद्दामासमप्तकम् । निर्विकृतिकमातन्वन् पारणादिवसे सदा ॥ युग्मम् ।
षष्ठमाचाम्लमेकाशं निर्विकृतिकं तथा । षड्द्रव्यसहितं स्थानभक्तपानसमन्वितम् ॥११॥
यावद्वर्षत्रयं सूरिरकरोच्चप ईदृशम् । यावत्प्रहरमेकं च कायोत्सर्गं सदा निशि ॥१२॥ युग्मम् ।
अभिग्रहे च यात्राया आ मासनवकं किल । षड् विकृतीर्निषिध्यैश्च कुर्वन् षष्ठाष्टमादिकम् ॥१३
निर्विकृतिकमाचाम्लमेकासनमनिन्दितम् । यावन्मासत्रयं सूरिः पारणावासरेऽकरोत् ॥१४॥
पञ्च द्रव्याणि संगृह्णन् एकां च विकृतिं ध्रुवम् । स्थानस्थभक्तपानं च तप एतादृगन्यदा ॥१५॥
—त्रिभिर्विशेषकम् ।

कस्मिंश्चिद्वत्सरे सूरिर्व्यधात्पंक्तित्रिकं तपः । उपवासैस्तथाचाम्लैर्निर्विकृतिकैः [च] पुनः ॥१६॥
एकाशनैश्च कृत्वैव द्रव्याणां परिमाणकम् । परित्यज्य रसान् षट् च रसनासुखकारिणः ॥ युग्मम् ।
कर्मक्षयविधानार्थमुपवासादिकं तपः । अस्तोकमकरोत्स्तोका भुञ्जानो विकृतीर्गुरुः ॥१८॥
कस्मिंश्चिदब्दे गुरोरुक्तया मासमध्ये तु कल्पते । एका विकृतिरन्या मे न कल्पन्ते कदापि च ॥१९
यथेच्छमुपवासादि करणीयं मया तपः । व्यपोहाय च पापानां सोऽभ्यगृह्णादिति द्रुतं ॥ युग्मम् ।
कस्मिंश्चिद्वत्सरे संघाग्रहान्मासद्वयं ध्रुवम् । सन्निर्विकृतिकं सूरिरगृह्णात्साधिकं ततः ॥२१॥
आचाम्लान्युपवासांश्च निर्विकृतिका अपि । अकरोच्छेषमासेषु दशसु श्रेयसे गुरुः ॥२२॥
अष्टकर्मक्षयं कर्तुमुपवासादिकं तपः । कस्मिंश्चिद्वत्सरे सूरिरकरोद्दुष्करं चिरम् ॥२३॥

२—कर्तारो नेदृशं तप इति—नाकुर्वन्नीदृशं तपः ।

३—दीङ्च् क्षये दिवादिरात्मनेपदी ।

२०—स श्रीविजयदेवसूरिः इति द्रुते अभ्यगृह्णात् अभिग्रहमकरोत् ।

तेजो राजा च विद्येते एतौ तत्तनयाविह । साक्षात्तौ तादृशावेव रूपवन्तौ महीतले ॥१८॥
हंसस्य महतो भ्रातुः पुत्रः सम्प्रति वर्त्तते । नाम्ना श्रीजयवन्तोयमर्थतो जयवानपि ॥१९॥
मेदिनीतटसद्दुर्गे समाजग्मतुरन्यदा । वलुन्दाग्रामतः सूरिं वन्दितुं तौ सहोदरौ ॥२०॥
अभिवन्द्योपविष्टौ तौ सूरेरग्रे कृताञ्जली । जीर्णोद्धारे महापुण्यमिति सूरिरुपादिशत् ॥२१॥
जीर्णोद्धारविधाने तौ व्यदधातां मनस्तदा । श्रुतेरनन्तरं सत्यं यतः स्तोकभवौ भुवि ॥२२॥
अब्रूतां तौ गुरोरग्रे न कदापि युवयुवी । उद्धारयाव घंघाण्यां जीर्णं चैत्यं यदस्ति तत् ॥२३॥
इत्युक्त्वा श्रीगुरोरग्रे तच्चरणौ प्रणम्य च । तत उत्थाय चाब्रूतां संघस्य पुरतश्च तौ ॥२४॥
घंघाण्यां कारयावावां जीर्णोद्धारं हितप्रदम् । ददात्याज्ञां यदा सङ्घः प्रसद्योपरि चावयोः ॥२५॥
श्रीसङ्घोऽपि तदाऽवादीत्तौ प्रति प्रतिभूरिव । कारय तं हितं श्रीमज्जीर्णोद्धारं युवां द्रुतम् ॥
ततस्तौ संघसंयुक्तौ श्रीजयमल्लमन्त्रिणम् । अब्रूतां कारयावावां जीर्णोद्धारं तवौजसा ॥२७॥
जयमल्लोऽवदन्मन्त्री चैत्यं कारय तं द्रुतम् । विलम्बेथां युवां नात्र कार्ये साहाय्यमस्ति मे ॥
ततस्तौ शिल्पिनो विदत्कल्पान शिल्पिकलाविदाम् । समाकारयतां जीर्णोद्धारकार्योत्सुकौ [illegible]
माहयानगरांस्तांश्च तौ न्योदयतामिति । जीर्णोद्धारं च घंघाणीग्रामे दिव्यं विशद भोः ॥
चतुर्दशे दिने काले तेऽप्यकुर्वंस्तदुक्तितः । जीर्णोद्धारं जिनेन्द्राणां सुन्दरं जिनमन्दिरम् ॥
[illegible]जिनाधीशं [illegible] । प्रत्यष्ठापयतां चैत्ये कृत्वा तौ तत्र उत्सवम् ॥३२॥
इत्थं [illegible] प्रभोज्य श्रीमहाजनम् । महाजनकराम्भोजे माहानां रूप्यकाणि च ॥
[illegible] मत्वा जीर्णोद्धारान्महाद्भुतान् । अनेकानि च चैत्यानि सन्ति नव्यान्यकारयत् ॥
[illegible] गिरिरिन्द्रवत् । कारयन्त्यास्तिकाः केऽपि केऽपि प्राकारमद्भुतम् ॥
[illegible] चान्येऽपि पुरस्तादन्यनेकशः । एवमेवावनीपीठे स सूरिर्जीवताच्चिरम् ॥३६॥
—त्रिभिर्विशेषकम् ।

एवं निरे श्रीजिनचन्द्रसूरीश्वरो राजतु गच्छराजः ।
श्रीवल्लभः पाठक एष [illegible] पर्वरिचापनानि ॥३७॥

इति श्री [illegible] श्रीजिनराजसूरि[illegible] पाठकश्रीज्ञानविमल[illegible] [illegible] नाम चतुर्थः सर्गः ।

[illegible] ।
[illegible] ।

पञ्चदशः सर्गः

पूर्वमेव तपोऽकुर्वन्नर्हन्तोऽर्हत्त्वसिद्धये । तपस्यत्यधुनाऽऽचार्यमासाद्याऽयं नवो जिनः ॥१॥
सुरपः साम्प्रतीना हि वर्तमाना जिना अपि । वर्धमानं विहायान्ये कर्तारो नेदृशं तपः ॥२॥
तपः स्तुमोऽत एवास्य कृतं कर्ता करोति च । दीप्यन्तेऽन्ये च कुर्वन्तो दीप्यतेऽसौ दिने दिने ॥
षोडशस्य शतस्यास्मादेकषष्टितमाब्दकात् । प्रथमं यत्तपः सूरिर्व्यधात्तत् स्तौमि सम्प्रति ॥
एकवर्षं पुराचाम्लषष्ठाष्टमतपो गुरुः । पारणाविकृतित्यागे निर्विकृतिकमातनोत् ॥५॥
आचाम्लानि चतुर्मासं द्रव्यत्रययुतानि च । स्थानस्थभक्तपानानि व्यदधात्स तपोनिधिः ॥६॥
षष्ठाष्टमोपवासानां पारणायां तपोभिदि । गृह्णन् द्रव्याणि चत्वारि द्वितीयाब्द इदं तपः ॥ युग्मम् ।
द्रव्याणि त्रीणि चत्वारि गृह्णन्नेकाशनं तपः । आवर्षयुगलं सूरिरकरोच्च निरन्तरम् ॥८॥
वन्दनाभिग्रहे श्रीमद्विजयसेनसद्गुरोः । ज्ञात्वेति विरहे सूरेर्भुक्तिर्युक्ता न मे सदा ॥९॥
एकान्तरोपवासान् स व्यधाद्द्वामासपक्षकम् । निर्विकृतिकमातन्वन् पारणादिवसे सदा ॥ युग्मम् ।
षष्ठमाचाम्लमेकाशं निर्विकृतिकं तथा । षड्द्रव्यसहितं स्थानभक्तपानसमन्वितम् ॥११॥
यावद्वर्षत्रयं सूरिरकरोच्चप ईदृशम् । यावत्प्रहरमेकं च कायोत्सर्गं सदा निशि ॥१२॥ युग्मम् ।
अभिग्रहे च यात्राया आ मासनवकं किल । षड् विकृतीर्निषिध्यैश्च कुर्वन् षष्ठाष्टमादिकम् ॥१३
निर्विकृतिकमाचाम्लमेकासनमनिन्दितम् । यावन्मासत्रयं सूरिः पारणावासरेऽकरोत् ॥१४॥
पञ्च द्रव्याणि संगृह्णन् एकां च विकृतिं ध्रुवम् । स्थानस्थभक्तपानं च तप एतादृगन्यदा ॥१५॥
—त्रिभिर्विशेषकम् ।

कस्मिंश्चिद्वत्सरे सूरिर्व्यधात्पंक्तित्रिकं तपः । उपवासैस्तथाचाम्लैर्निर्विकृतिकैः [च] पुनः ॥१६॥
एकाशनैश्च कृत्वैव द्रव्याणां परिमाणकम् । परित्यज्य रसान् षड् च रसनासुखकारिणः ॥ युग्मम् ।
कर्मक्षयविधानार्थमुपवासादिकं तपः । अस्तोकमकरोत्स्तोका भुञ्जानो विकृतीर्गुरुः ॥१८॥
कस्मिंश्चिदब्दे गुरोरुक्त्या मासमध्ये तु कल्पते । एका विकृतिरन्या मे न कल्पन्ते कदापि च ॥१९
यथेच्छमुपवासादि करणीयं मया तपः । व्यपोहाय च पापानां सोऽभ्यगृह्णादिति द्रुकि ॥ युग्मम् ।
कस्मिंश्चिद्वत्सरे संघाग्रहान्मासद्वयं ध्रुवम् । सनिर्विकृतिकं सूरिरष्टाष्टाधिकं ततः ॥२१॥
आचाम्लान्युपवासांश्च निर्विकृतिका अपि । अकरोच्छेषमासेषु दशसु श्रेयसे गुरुः ॥२२॥
अष्टकर्मक्षयं कर्तुमुपवासादिकं तपः । कस्मिंश्चिद्वत्सरे सूरिरकरोद्दुर्धरं चिरम् ॥२३॥

२—कर्तारो नेदृशं तप इति—नाकुर्वन्नीदृशं तपः ।

३—दीप्यन्ते क्षये दिवादिरात्मनेपदी ।

२०—स श्रीविजयदेवसूरिः इति द्रुके अभ्यगृह्णात् अभिग्रहमकरोत् ।

तपांस्येनादृशान्येवमनेकान्यकरोद्गुरुः । तद्विधौ पुनरद्यापि तस्याद्यो दिवसोऽसति ॥२४॥
अथ यावद्गणाधीशोऽप्यतपद्दुस्तपं तपः । एतादृशोऽस्त्यभिप्रायश्चिरायास्य च तत्कृतौ ॥२५॥
जीर्णोद्धारान्जरत्तीर्थाऽनरुद्धेत्यादिकं भवेत् । तपो लाभोपमं तर्हि तद्दर्पेऽल्पं तपोऽस्तु चेत् ॥२६॥
कस्यचिन्महतो मन्त्रिजयमल्लादिकस्य हि । विज्ञप्तिकरणादेव नान्यथा तत्तपोऽल्पता ॥ युग्मम् ।
क्रियायुक्तया साक्षादवतीर्णो धनो मुनिः । सन्दिहन्तीति यं वीक्ष्य कवयो ये कलौ किल ॥
आनन्दविमलसूरिर्द्वितीयोऽयमभूद्गणे । नैवमेषोऽधिकस्तस्मादित्यन्ये ब्रुवते बुधाः ॥२९॥
तदाह-क्रियोद्धारः कृत्स्नेन नैतादृशं कृतं तपः । महातपा इति ख्यातं नाम च विरुदं श्रितम् ॥
इति हेतुत्रयाश्चिरं शोभतेऽस्मिन्नहर्निशम् । यदत्रान्यगुणाधिरूपमस्ति वक्तुं न तत्क्षमः ॥३१॥
—त्रिभिर्विशेषकम् ।

क्रियावासरसस्यास्य पारं वक्तुं कदापि हि । शक्नुवन्ति कवीन्द्रा नो बृहस्पतिसमा अपि ॥३२॥
इत्युत्तमं श्रीविजयादिदेवसूरिस्तपो दुस्तपमाननोचत् ।
श्रीवल्लभः पाठक एवमाख्यत् कर्तुं न शक्तोऽन्यजनो यदीदृक् ॥३३॥

इतिश्रीः श्रीबृहत्खरतरगच्छीय श्रीजिनराजसूरिसन्तानीयपाठक श्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराज पातशाह श्रीअकब्बरप्रदत्तजगद्गुरुबिरुदधारक श्रीहीरविजयसूरीश्वरपट्टालंकार पातिशाहि श्रीअकब्बरसभासंलब्धजयवादमहारक श्रीविजयसेनसूरीश्वरपट्टप्रभाकर[illegible] पातिशाहि श्रीजिहांगीरप्रदत्तमहातपाविरुदधारि श्रीविजयदेवसूरीश्वर[illegible] श्रीविजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरितपो[illegible] [illegible] सर्गः ॥१५॥

२४—[illegible] ।

२५—[illegible] । [illegible] । [illegible] ।

२६—[illegible]

[illegible]

[illegible]

षोडशः सर्गः

अथास्ति पत्तनं नाम पत्तनं यत्र चाभवत् । विजयसिंहसूरीणामुपाध्यायपदं पुरा ॥१॥
विजयदेवसूरीन्द्रमावसन्तं सुखेन तत् । श्रीमदहम्मदावादसंघ आह्वातुमागमत् ॥२॥
आपृच्छ्य पात्तनं संघमापृच्छ्याहूय चादरात् । श्रीमदहम्मदावादसंघः सूरियुतोऽचलत् ॥३॥
संघः सूरिं विधापातिमहाद्भुतमहोत्सवम् । श्रीमदहम्मदावादसदुपाश्रयमानयत् ॥४॥
श्रीमदहम्मदावादद्रङ्गे सूरिरुपावसत् । साधूचितहितातिथ्यैर्वैरीयान् वर इवोत्सवैः ॥५॥
स्तम्भनीर्थादथागच्छदतुच्छश्रीसमुच्छ्रितः । संभूय संघ आह्वातुं मणन्तुं च गणेश्वरम् ॥६॥
मौक्तिकैः स्वर्णपुष्पैश्च संवर्धाञ्जलिभिः शुभैः । श्रीस्थंभतीर्थसङ्घस्तमभ्यवन्दत भक्तितः ॥७॥
श्रीमदहम्मदावादद्रङ्गश्रीस्थंभतीर्थयोः । सङ्घौ ब्रूत इति स्पष्टं मिथो न वितथं वचः ॥८॥
तद्यथा–आद्यः सङ्घ इति ब्रूते द्वितीयं सङ्घमागतम् । भट्टारको नवीनोऽयं चतुर्मासं निवत्स्यति॥
अवश्यं स्थापयिष्यामि न च स्थास्यति चेत्स्वयम् । चतुर्मासमसौ सूरिः पत्तनायत्पुराद्द्वयं नयम ॥
द्वितीयः स्तंभतीर्थस्य संघो वक्तीति तं प्रति । भवान्मोक्ष्यति सन्तुष्य समेष्यति यदा गुरुः ॥
अत्र त्वमानयः सूरिं श्रीसंघ किल पत्तनात् । गृह्णाति माध्यस्थ्यसद्वस्तु सङ्घः माघूर्णको हि ते ॥१२
श्रुत्वेति प्रथमः सङ्घः कृत्वा तूष्णीं स्थितस्तदा । प्रोक्तं द्वितीयसंघेन विनयेनोचितं वचः ॥१३॥
उभौ संघौ समागत्य प्रणत्य च वदतः तम् । अमतां स्वस्वविज्ञप्तिं स्वस्वनेनोदितावरम् ॥
आधुनिकं चतुर्मासमिदं स्ववशा वस । विजयदेवसूरीन्द्र विजयदेवसौख्यभाक् ॥१५॥
इति साक्षीव सूरीन्द्रः संघौ प्रति तदावदत् । आसीनौ पुरतो भक्त्या मुखादिर्मनिशादिव ॥
इतीति किं तदाह–विजयसेनसूरीन्द्रपादुकावन्दनां विना ।
विहरिष्यामि नाहारमीति पुरा गृह्णामभिग्रहम् ॥१७॥
इत्युक्ते सूरिराजेन पुरस्तात्संघयोर्द्वयोः । पूर्वपक्षनिषेधोऽभूत् द्वितीयाङ्गीकृतिः स्वयम् ॥१८॥
श्रीसंघोऽहम्मदावादद्रङ्गवासी महाशयः । प्रसद्य स्तम्भतीर्थस्य संघं मन्यपीदिति ॥१९॥
अभिग्रहमिमं सूरिर्नाकरिष्यद्यदा पुरा । नामोक्ष्यं च तदा सूरिं श्रीसंघस्थंभतीर्थग ॥२०॥
त्वम एव हि सूरीन्द्रो विना विज्ञप्तिमारयोः । स्थंभतीर्थे चतुर्मासे पुण्यादिरणतराम् ॥२१॥
अचलपत्तनौ मुञ्चन् कौसेयादिसिगम्पुजे । सुदिने जिनवन्मूरिः संघयुक् स्थंभतीर्थगम् ॥२२॥

२–उपान्वध्याङ्वस इति आङ्पूर्वस्य वसतेराधारस्य । तदिदस्य स्थाने तदिति कर्म ।

१८–पूर्वपक्षनिषेध श्रीमदहम्मदावादनगरचतुर्मासावस्थानरूपपक्षनिषेधः । द्विती-याङ्गीकृतिरिति श्रीस्तम्भतीर्थचतुर्मासावस्थानरूपपक्षाङ्गीकारः । स्वत. आत्मतः ।

२२–कौसेयादिसिगम्पुजे कौसेयादिवस्त्रकमलेषु । कौसेयादिसिगम्पुज इत्यत्र क्रम्स्या-

तपांस्येतादृशान्येवमनेकान्यकरोद्गुरुः । तद्दिने पुनरद्यापि तस्याद्यो दिवसोऽभवत् ॥२४॥
अद्य यावद्गणाधीशोऽभ्यतपद्दुस्तपं तपः । एतादृशोऽस्त्यभिप्रायश्चिरायास्य च तत्कृतौ ॥२५॥
जीर्णोद्धाराजरत्तीर्थाऽजरच्चैत्यादिकं भवेत् । तपो लाभोपमं तर्हि तद्रूपेऽल्पं तपोऽस्तु चेत् ॥२६॥
कस्यचिन्महतो मन्त्रिजयमल्लादिकस्य हि । विज्ञप्तिकरणादेव नान्यथा तत्तपोऽल्पता ॥ युग्मम् ।
क्रियात्युग्रतया साक्षादवतीर्णो धनो मुनिः । सन्दिहन्तीति यं वीक्ष्य कवयो यं कलौ किल ॥
आनन्दविमलसूरिर्द्वितीयोऽयमभूद्गणे । नैवमेषोऽधिकस्तस्मादित्यन्ये ब्रुवते बुधाः ॥२९॥
तदाह–क्रियोद्धारः कृतस्तेन नैतादृक्षं कृतं तपः । महातपा इति ख्यातं नाम च बिरुदं भुवि ॥
इति हेतुत्रयाधिक्यं शोभतेऽस्मिन्नहर्निशम् । यदत्रान्यगुणाधिक्यमस्ति वक्तुं न तत्क्षमः ॥३१॥
—त्रिभिर्विशेषकम् ।

क्रियायास्तपसश्चास्य पारं वक्तुं कदापि हि । शक्नुवन्ति कवीन्द्रा नो बृहस्पतिसमा अपि ॥३२॥

इत्युत्तमं श्रीविजयादिदेवसूरिस्तपो दुस्तपमाननोचत् ।
श्रीवल्लभः पाठक एवमाख्यत् कर्तुं न शक्तोऽन्यजनो यदीदृक् ॥३३॥

इतिश्री श्रीबृहत्खरतरगच्छीय श्रीजिनराजसूरिसन्तानीयपाठक श्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराज पातशाह श्रीअकब्बरप्रदत्तजगद्गुरुबिरुदधारक श्रीहीरविजयसूरीश्वरपट्टालंकार पातिशाहि श्रीअकब्बरसभासंलब्धदुर्वादिजयवाद भट्टारक श्रीविजयसेनसूरीश्वरपट्टपूर्वाचलसहस्रकरानुकारि पातिशाहि श्रीजिहांगीरप्रदत्तमहातपाबिरुदधारि श्रीविजयदेवसूरीश्वरगुणवर्णनप्रबन्धे श्रीमद्विजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरिकृततपोवर्णनो नाम पञ्चदशः सर्गः ॥१५॥

२४–अष्टमादिदीक्षादानेषु अष्टादिकमयपदी ।

२५–अस्य श्रीविजयदेवसूरेः । तत्कृतौ तपोविधाने । एतादृशोऽभिप्रायोऽस्ति ।

२६–[illegible]लाभोपमं जीर्णोद्धाराऽजरत्तीर्थाऽजरच्चैत्यादिकं भवेत्तर्हि तद्रूपे कस्यचिन्महतो मन्त्रिजयमल्लादिकस्य विज्ञप्तिकरणादेव अल्पं तपोऽस्तु । अन्यथा तत्तपोऽल्पता तस्य श्रीविजयदेवसूरेस्तपोऽल्पता तपसोऽल्पत्वं नान्यथा नान्येन प्रकारेणेत्यर्थः ।

विचित्रैश्चित्रिताश्चित्रैर्जननेत्रकृतोत्सवाः । आनाययत्स संघेशः शिबिकाः शिवकारिकाः॥४१॥

–त्रिभिर्विशेषकम् ।

एवं विधाय सामग्रीं पूःप्रवेशोत्सवोचिताम् । जिनदासो धृतोल्लासो महाजनान् समाह्वयत् ॥

वाजिनो हस्तिनोऽनेकान् अलङ्कारैरलङ्कृतान् । समास्तीर्णपरिस्तोमान् श्रीमानानाययत्ततः ॥४३

वाद्यान्यनेकजातीनि समानाय्य विशेषतः । छटाः सत्केसराम्भूनामकरोत्स महाजने ॥४४॥

प्रक्षेपं पटवासानां महाजनपटेष्वपि । अतिभक्तिमनाः स्वीयहस्ताभ्यां स व्यधात्तदा ॥४५॥

पूःप्रवेशोत्सवस्यैवं सामग्रीमग्रतोऽग्रिमाम् । कृत्वाभिमुखमानन्दादानेतुं सोऽव्रजद् गुरुम् ॥

गत्वा महाजनोपेतो जिनदासो हरिर्गुरुम् । अभिवन्द्य हृदानन्द्य स्वर्णपुष्पैरवर्धयत् ॥४७॥

इन्द्राण्योऽपि हृदा प्रीताः पूर्णकुम्भान्विताः स्त्रियः । अभ्यवन्दन्नुन्मुक्ता पङ्क्त्या तं चाभ्यवर्धयन्॥

सह लात्वाग्रतः कृत्वा स सूरिं परमन्तरा । प्रापेशयच्च धर्माङ्को यशो देशान्तरं स्वकम् ॥४९॥

(–'कीर्ति देशान्तरं स्वकाम्'–इति वा पाठः)

साध्वाचारात् प्रतिक्रम्य स ईर्यापथिकीं तदा । जिनेन्द्र इव भद्रासनमध्यास तत्क्षणात् ॥५०

जिनदासः सुराधीश इवासत च तत्पुरः । श्रीसङ्घसहितो भक्त्या सुरप्रकरराजितः ॥५१॥

आसन्ताग्रत इन्द्राण्य इव देवीसमन्विताः । योषितो योषितां तत्या श्रियां तत्या च चञ्चुराः॥

धर्मोपदेशं श्रीसूरिः शुभाशिषमिवेदृशम् । उपादिशत्प्रसन्नात्मा ततः संघसमक्षकम् ॥५३॥

ईदृशं इति कीदृशं तदाह–जिनाः सिद्धास्तथाचार्या उपाध्यायाश्च साधवः ।

श्रियं च मङ्गलं कुर्युः पञ्चैते परमेष्ठिनः ॥५४॥

श्रुत्वेति जिनदासोऽथ समुत्थाय स्वपाणिना । श्रीमहाजनहस्तेषु न्यस्तवान् रूपकोत्करम् ॥५५॥

पूःप्रवेशोत्सवे सूरेरेवं श्रीजिनदासकः । त्रयोदशशतान्यत्र रूप्याण्यव्ययपयत्तराम् ॥५६॥

ततः संघेन संयुक्तः समहोत्सवपूर्वकम् । विजयसेनसूरीन्द्रपादकाब्जमवन्दत ॥५७॥

उपाध्यायपदं श्रीमद्रत्नचन्द्राय सोऽददात् । पण्डितपदमन्येभ्यः साधुभ्यश्च तदोत्सवात् ॥५८॥

विकृत्यभिग्रहं पूर्णमपूर्णमिव सोऽकरोत् । विकृतीनां समस्तानां न सदा भोजनाद् भृशम् ॥५९॥

जिनदासादिक-स्थम्भतीर्थसंघाग्रहाद्गुरुः । अध्यवसच्चतुर्मासं स्तम्भतीर्थपुरं सुखात् ॥६०॥

भव्यान् प्रावर्तयद् धर्मे सिद्धान्तोक्तचतुर्विधे । चतुर्दशानवद्याश्च विद्या अध्यापयन् मुनीन् ॥६१॥

४३–श्रीमान् जिनदासः ।

५६–व्यय वित्तसमुत्सर्गे चुरादिः परस्मैपदी । यद्यपि अव्ययत्तरामित्यनेन वित्तसमुत्सर्ग इत्यर्थो लब्धस्तत् कथं पुनरूप्याणीति ? सत्यं, कविकुलभवदुक्तिदोषाभदोषः । अथवा वित्त इत्यस्य सामान्यधनपर्यायत्वात् रूप्याणीति रूप्यशब्दस्सामान्येन सर्वनाणकपर्यायं ब्रुवन्नपि अत्र रूपइया इति भाषापर्यायं ब्रवीति, इत्यतो न पुनरुक्तिदोषः ।

सप्तदशः सर्गः

अथाग्रानगरे श्रीमन्मण्डपं सर्वसम्पदाम् । पत्तनं मण्डपं नाम चाभात्पुत्तलमण्डपम् ॥१॥
पातिसाहि-जहाँगीर-सिलेमसाहिरुत्तमः । हिन्दू-तुरुष्कभूपालनायकस्तत्र शोभते ॥२॥
पातिसाहिसभागीना विद्वांसोऽन्ये जना अपि । दर्शनानां शुभां षण्णां धर्मवार्तां जगुर्मिथः॥३
तद्यथा–दर्शनेष्वेषु सर्वेषु जैनं दर्शनमुत्तमम् । दानं तपः क्रियाक्रूरा शीलं श्रेयश्च यत्र यत् ॥४॥
तत्रापि साम्प्रतं भाति विजयदेवसद्गुरुः । कुर्वन्नुग्रं तपश्चोग्रां क्रियावत्सुव्रतः क्रियाम् ॥५॥
उग्रत्वं तपसः श्रुत्वा क्रियायाश्च यतिव्रजे । पातिसाहिर्जहांगीरोऽन्यदेति समपादयत् ॥६॥
इतीति किं तदाह–भो चन्द्रः संघप ! क्वासि धर्माचार्यस्तवाधुना ।
विजयदेवसूरीन्द्रो नाऽमिलत्स कथं च नः ॥७॥
तदा चन्द्ररिति प्राह पातिसाहिं कृताञ्जलिः । अस्ति सम्प्रति सूरीन्द्रः स्थम्भतीर्थे गुरुर्मम ॥८॥
पातिसाहिरिति श्रुत्वा प्राह चन्द्रं मनीति च । विजयदेवसूरीन्द्रं समाहूय ममाज्ञया ॥९॥
फुरमाणं तदालेख्य सूरेराह्वानसूचकम् । चन्द्रसंघपतेर्हस्ते पातिसाहिरदान्मुदा ॥१०॥
अवदद्दनापेत्थं मदीयमहदीं चरम । प्रेष्य सूरीश्वराह्वानहेतवे सुखहेतये ॥११॥ युग्मम् ॥
ततश्चन्द्रः समाहूय तदा सदर्दीं द्रुतम् । स्फुरन्मानं स्वहस्तेन तद्धस्ते च समार्पयत् ॥१२॥
अचालीदहदीः शीघ्रं ततः सन्तुष्टमानसः । स्थम्भतीर्थपुरं प्राप्नोत् सभाप्नोत् स्वेहितानि च ॥
प्रणम्य शिरसा सूरिं स्फुरन्मानं समार्पयत् । वाचं वाचं गुरुः सङ्घः श्रावं श्रावं त्वमोदत ॥१४॥
प्रीतिदानं तदा प्रादाज्जीविताईमनेकधा । संघः श्रीस्थम्भतीर्थस्य तुष्टः किं किं ददाति न ॥१५
विहारो नोचितः साधोश्चतुर्मासे कदापि हि । तथापि कारणे कार्य उक्तिरस्त्यार्हतीति च ॥
(–जैनीत्युक्तिश्च वर्तते–इति वा पाठः) ॥१६॥
शास्त्रार्थमवधार्येति निवेद्य च महाजनान् । महालाभं च विज्ञाय श्रीसूरिरचलत्ततः ॥१७॥
अर्जयन्नध्वनि श्रेयः प्रापयंश्चापरान् जनान् । व्यापारीव सुवस्त्वौघलाभं ग्रामादिकं प्रति ॥१८॥
मण्डपं नगरं सूरिः प्राप्नोद्दिव्यमहोत्सवैः । आश्विनस्यावदातस्य दिवसे हि त्रयोदशे ॥१९॥
ततश्चन्द्रः प्रसन्नात्मा पातिसाहिं न्यवेदयत् । आगतो भवदाहूतो विजयदेवसूरिराट् ॥२०॥

१४–तुरत्र पुनरर्थे । तेन गुरुः श्रीविजयदेवसूरिः वाचं वाचममोदत । तु पुनः सङ्घः श्रीस्तम्भतीर्थश्रावकगणः श्रावं श्रावं श्रुत्वा श्रुत्वा अमोदत । वाचं वाचं श्रावं श्रावमित्युभयत्र आभीक्ष्ण्ये णमुल् चेति णमुल्, नित्यवीप्सायां द्विरुक्तिश्च ।

१७–ततः श्रीस्तम्भतीर्थात् ।

इत्थं श्रीविजयादिदेवसुगुरुः श्रीस्तम्भतीर्थे पुरे
चातुर्मासकमद्भुतं समकरोत् सङ्घाग्रहादुत्सवैः ।
साम्राज्यं प्रतिपद्य सूरिपदजं जाग्रत्प्रतापोज्ज्वलम्
श्रीश्रीवल्लभपाठकप्रपठितं हर्षं प्रकर्षंप्रदम् ॥६२॥

इतिश्री श्रीबृहत्खरतरगच्छीय श्रीजिनराजसूरिसन्तानीय पाठकश्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराजपातशाह श्रीअकब्बरप्रदत्तजगद्गुरुबिरुदधारक श्रीहीरविजयसूरीश्वर पट्टालङ्कारपातिशाहि श्रीअकब्बरसभासंलब्धदुर्वादिजयवाद भट्टारक श्रीविजयसेनसूरीश्वरपट्टपूर्वाचलसहस्रकरानुकारि पातिशाहि श्रीजिहांगीरप्रदत्त महातपाविरुदधारि श्रीविजयदेवसूरीश्वरगुणवर्णनप्रबन्धे श्रीमद्विजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरि-श्रीस्तम्भतीर्थ-प्रथमचतुर्मासककरणवर्णनो नाम षोडशः सर्गः।

पातिसाहि-जहांगीर-महातपा अयं गुरुः । विजयदेवसूरीन्द्र इति ख्यातोऽभवद्भुवि ॥४२॥
श्रीजिनशासनस्यास्य तपागच्छस्य चाद्भुतः । अभवन् महिमा ज्यायान् श्रीपूज्यस्यापि च ध्रुवः॥
पातिसाहिरथापृच्छत् श्रीचन्द्रं संघनायकम् । तस्मिन् रात्रिंदिवे चैवं गोसलखानसंस्थितः ॥
एवमिति किं तदाह–भो चन्द्रस्त्वमथातुष्य उत नो वेति मां वद ।
अतुष्यमिति सोऽवादीत् पातिसाहिं प्रति स्फुटम् ॥४५॥
पातिसाहे चिरं जीव ध्रुवं न्यायवतां सदा । रामराज इव न्यायं स्वं व्यधा विबुधाग्रणीः ॥४६॥
अहं कथमतुष्यं नो समतुष्यं विशेषतः । धर्मन्यायविधानाद्यत् सर्वस्तुष्यति सज्जनः॥४७॥ युग्मम्।
पातिसाहिरिति प्राह लोकभूपसमक्षकम् । सर्वेषां गुरुरेषोऽस्तु सर्वस्वामी च सर्वदा ॥४८॥
समस्तपूर्वसूरीन्द्रपरम्पराक्रमाश्रितः । यथाहं पातिसाहीनां क्रमायातस्तथा ह्यसौ ॥४९॥
वर्त्तते दीप्यते चोर्व्यां सर्वसूरिशिरोमणिः । हिन्दू-तुरुष्कभूपालमौलिचूडामणिः सदा ॥५०॥
अतः समस्ता भो लोका मन्यन्तामिममुत्तमम् । समस्तानि समस्तानां मामिव प्रभुतोत्तमम् ॥
पातिसाहिरभाषिष्ट वारं वारमिति स्फुटम् । यतोऽप्यधिकतेजस्वी यद्वर्त्ते वशवर्त्यहम् ॥५२॥
कुपितः कोऽपि पापीयान् कोपनः कोपपूरितः । भविष्यति सदा दुःखी स एतस्मात्पराङ्मुखः ॥
धन्योऽयं कृतपुण्योऽयं तपस्तेजःसमुच्चयः । दर्शनेपूत्तमं चास्य दर्शनं सुखकारि यत् ॥५४॥
एवं मासंसमानेकभूपलोकसभास्थितः । पातिसाहि-जहांगीर-सिलेमसाहिरदो गुरुम् ॥

इत्थं प्राप महातपाविरुदकं श्रीपातिसाहेर्मुखाद्
यः श्रीमद्विजयादिदेवसुगुरुः सोऽयं सदा दीप्यताम् ।
श्रीश्रीवल्लभपाठकेन कविना व्यावर्णितं सर्वतः
श्रोतॄश्रोत्रसुखप्रदं सुविशदं सत्योक्तितः सर्वदा ॥५६॥

इतिश्री श्रीबृहत्खरतरगच्छीय श्रीजिनराजसूरिसन्तानीय पाठकश्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराज पातिशाहि श्रीअकब्बरप्रदत्तजगद्गुरुविरुदधारक श्रीहीरविजयसूरीश्वरपट्टालङ्कार पातिशाहिश्रीअकब्बरसभासंलब्धप्रचुरवादिजयवाद भट्टारक श्रीविजयसेनसूरीश्वरपट्टपूर्वाचलसहस्रकरानुकारि पातिशाहि श्रीजिहांगीरप्रदत्त महातपाविरुदधारि श्रीविजयदेवसूरीश्वरगुणवर्णनप्रबन्धे श्रीमद्विजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरिकृत्य-जहांगीरमहातपाविरुदवर्णनो नाम सप्तदशः सर्गः ॥१७॥

४८–सर्वेषां एतद्गच्छीयसाधुश्रावकलोकानां सर्वस्वामी साधुसाध्वीश्रावकश्राविकाजिनप्रासादोपाश्रयादिस्वामी सर्वदा एष विजयदेवसूरिरस्तु ।

पातिसाहिरिति श्रुत्वा स्वमतुष्यत्स्वचेतसि । अस्ति स्वस्ति गुरोः कार्यं मासीदिति च तं मतिः ।
चन्द्रखन्दसमं सौम्यात् इहाद्य तमानय । पादौ गोष्ठीं च धर्मस्य नमानि न विद्यानि च ॥२२॥
आश्विनस्यावदातस्य चतुर्दशदिने शुभे । मध्याह्ने तसवीखानास्थाने सूरिवरोऽगमत् ॥२३॥
पातिसाहिस्तदोत्यायाभ्यागत्य च पदत्रयम् । अभ्यवन्दत पादाब्जं श्रीसूरेः पुण्ययोगतः ॥२४॥
तपस्तेजस्विनं सूरिं दृष्ट्वेति व्यस्मयत्तराम् । अहो धन्योऽयमीदृक्षः साक्षादेव तपस्तनुः ॥२५॥
कथमीदृक्षकायोऽयं ज्योतीरूपं दधत्सदा । कथमीदृग् तपः कृत्वा धर्त्ता पुष्टिं तनौ तनुः ॥२६॥
स्वागतादिकसद्वार्तां समपृच्छत्पुनः पुनः । सद्वान्धव इव स्नेहात्पातिसाहिर्जहाङ्गुरः ॥२७॥
धर्मगोष्ठीं वरिष्ठात्मा गरिष्ठैन गुणैः सदा । श्रीसूरिणा सह श्रीमान् पातिसाहिर्व्यधात् ततः ॥
रात्र्याहारपरित्यागं साध्वाहारविधिं पुनः । अपृच्छचापरं साधु साध्वाचारं स सद्गुरुम् ॥२९॥
रात्र्याहारपरित्यागविधानसुफलाफलम् । अवदत् श्रीगुरुः सर्वमन्यदपि च तं प्रति ॥३०॥
कृत्वैवं धर्मसद्गोष्ठीं पातिसाहिरमोदत । श्रेयानेतस्य धर्मोऽयमवादीदिति चाद्भुतम् ॥३१॥
इतीति किं तदाह—नागविरुद इत्यस्ति भवतां प्राकृतस्सदा ।

सदानस्त्वं मदुक्तोऽसि जहांगीरमहातपाः ॥३२॥

जिनदेवसूरीन्द्रमन्वन्ये सूरयो भुवि । तपस्विनोऽपि विद्वांसः क्रियावन्तश्च सर्वदा ॥३३॥ पुनः
उग्गूदमाषिणो ये च तदीयाः मतिवादिनः । पातिसाहिः समस्तांस्तान् सर्वथा हि निराकरोत् ॥
महातपा इति ख्यातः शब्दः सिद्ध उणादिषु । सार्थकस्त्वय विख्यातस्त्वय्येवान्यत्र नैव च ॥३५॥
पातिसाहिरिति प्रेम्णा निरीय विरुदं मुखात् । चन्द्रसंघपतिं साह कुर्वित्यस्य महोत्सवम् ॥
तदा—यानि सर्वाणि पात्राणि गृहीत्वा तानि मेऽधुना ।

वादयन् स्थानतोऽस्मात्तं नायय स्वमुपाश्रयम् ॥३७॥

[illegible] पातिसाहिं समादाद्दिलोचनं लोचनोत्सवम् ॥३८॥
पातिसाहिः [illegible] सञ्चयम् । महाजनान् समाकार्य वर्योऽगात्पुरस्सरम् ॥३९॥
[illegible] पातिसाहिसंसदाग्रतः । समभूत्पानेकसल्लोकविलोकितमुखाम्बुजम् ॥४०॥
जिनदेवसूरीन्द्र[illegible]श्चर्यं मुदा । भानयन्नयतो नित्यं जिनविंशतिपूर्वकम् ॥४१॥

—चतुर्भिः कलापकम् ।

२१—तं प्रति [illegible] प्रति । २२—[illegible] ।

३०—[illegible] सुफलं शोभनं फलं [illegible], [illegible] ।

[illegible] ।

३३—अन्ये सूरयो भुवि [illegible] । [illegible]

[illegible]

[illegible] ।

पातिसाहि-जहांगीर-महाराजा भयं गुरुः । विजयदेवसूरीन्द्र इति ख्यातोऽभवद्भुवि ॥४३॥
श्रीजिनशासनस्यास्य तपागच्छस्य चाद्भुतः । अभवन् महिमा ज्यायान् श्रीपूज्यस्यापि च ॥४४॥
पातिसाहिरथाप्यूचे श्रीचन्द्रं सेवनायकम् । तस्मिन् सर्वविदे चैव गोसलखानमेरितः ॥
एवमिति किं महाद-भो चन्द्रस्यमयथानुप उत नो चेति मां वद ।
मनुष्यमिति सोऽवादीत् पातिसाहिं प्रति स्फुटम् ॥४५॥
पातिसाहे चिरं जीव पुण्यं न्यायवता सदा । रामराम इव न्यायं त्वं यथा विदुषाग्रणीः ॥४६॥
अर्हं यथायुज्यं नो समनुष्यं विशेषतः । धर्मन्यायविधानाद्यन् मर्त्येस्तुष्यति सज्जनः ॥४७॥ युग्मम् ।
पातिसाहिरिति माह लोकभूपसमासदम् । सर्वेषां गुरुरेषोऽस्तु सर्वस्वामी च सर्वदा ॥४८॥
समस्तपूर्वसूरीन्द्रपरम्परामहासाधितः । यथार्हं पातिसाहीनां क्रमायातस्तथा यतो ॥४९॥
वर्तते दीप्यतो योऽयं सर्वसूरिशिरोमणिः । हिन्दू-तुरुष्कभूपालमौलिचूडामणिः सदा ॥५०॥
अतः समस्ता भो लोका मन्यन्तामिममुत्तमम् । समस्तानि समस्तानां स्वामिनं प्रभुतोत्तमम् ॥
पातिसाहिरमाचिष्ट वारं वारमिति स्फुटम् । यतोऽप्यधिकतेजस्वी यद्वर्षो धनवर्षेहम् ॥५२॥
दुष्टः कोऽपि पापीयान् कोपनः कोपपूरितः । भविष्यति सदा दुःखी स एतस्मात्पराङ्मुखः ॥
धन्योऽयं कृतपुण्योऽयं महातेजःसमुच्चयः । दर्शनेऽपूर्वमस्य दर्शने सुखकारि यत् ॥५४॥
एवं मानेमनानेकभूपलोकसभाश्रितः । पातिसाहि-जहांगीर-सिलेमसाहिरहो गुरुम् ॥

इत्थं प्राप महातपाविरुदकं श्रीपातिसाहेर्मुखाद्
यः श्रीमद्विजयादिदेवसुगुरुः सोऽयं सदा दीप्यताम् ।
श्रीश्रीवल्लभपाठकेन कविना व्यावर्णितं सर्वतः
योऽभूच्छ्रीमद्गुणमदं सुविशदं सत्योक्तितः सर्वदा ॥५६॥

इतिश्री श्रीबृहत्खरतरगच्छीय श्रीजिनराजसूरिसन्तानीय पाठकश्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराज पातिशाहि श्रीअकब्बरप्रदत्तजगद्गुरुविरुदधारक श्रीहीरविजयसूरीश्वरपट्टालङ्कार पातिशाहिश्रीअकब्बरसभासंलब्धदुर्वादिजयवाद भट्टारक श्रीविजयसेनसूरीश्वरपट्टपूर्वाचलसहस्रकरानुकारि पातिशाहि श्रीजिहांगीरप्रदत्त महातपाविरुदधारि श्रीविजयदेवसूरीश्वरगुणवर्णनप्रबन्धे श्रीमद्विजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरिलब्धजहांगीरमहातपाविरुदवर्णनो नाम सप्तदशः सर्गः ॥१७॥

४८—सर्वेषां तपागच्छीयसाधुश्रावकलोकानां सर्वस्वामी साधुसाध्वीश्रावकश्राविकाजिनप्रासादोपाश्रयादिस्वामी सर्वदा एव विजयदेवसूरिरस्तु ।

अष्टादशः सर्गः

अथ यस्य सदानन्दात् कुर्वन्त्यादरतः सदा । स्वर्णरूप्यादिभिः पूजां नवाङ्गानां वराङ्गिनः ॥१॥
प्रतिग्रामं प्रतिद्रङ्गं धर्मरङ्गेण धर्मिणः । नीलीरागा गुणग्रामान् गायन्तो गुणरञ्जिताः ॥२॥ युग्मम् ।
यदीयवचसा भव्याः कारयन्ति दिने दिने । बिम्बानि विविधान्यत्र स्वर्णरूप्यमयानि च ॥३॥
प्रासादान् विविधान् नव्यान् जीर्णोद्धारांश्च सुन्दरान् । यदीयवचसा श्राद्धाः कारयन्ति दिने दिने ॥४॥
तद्वर्षं नास्ति यस्मिन्न प्रतिष्ठा स्यात्कदाचन । करोति चाकरोत्कर्ता प्रतिष्ठां च स सद्गुरुः ॥५॥
याः प्रतिष्ठाः कृताः पूर्वं द्रङ्गशत्रुञ्जयादिषु । नालमेव सर्वथा तासां संख्यां यावदियत् क्षणम् ॥६॥
शत्रुञ्जयादितीर्थानां यात्रां कर्तुं यदुक्तितः । सङ्घान् कुर्वन्त्यकुर्वंश्च कर्तारश्चोत्सवाञ्जनाः ॥७॥
साधवः श्रावकाश्चान्ये सद्धर्मं साध्नुयुः सदा । उपाश्रयानिति श्रेयोबुद्ध्या श्राद्धाश्च कुर्वते ॥८॥
अकुर्वंश्च करिष्यन्ति यद्वचःप्रेरिता भृशम् । व्ययित्वा प्रचुरं द्रव्यं सत्सुधर्मसभा इव ॥९॥
सत्साधर्मिकवात्सल्यं श्रावका भावभासुराः । सर्वे कुर्वन्ति सर्वत्र यत्पवित्रवचोयुताः ॥१०॥
व्याख्यानागमनादौ च यस्यानेहस्यहर्निशम् । प्रभावनां प्रकुर्वन्ति रूप्याद्यैः श्रावका मुदा ॥११॥
प्रक्षिप्य मोदकाद्येषु छन्नं रूप्यादिकं धनम् । ददति श्रावकादिभ्यः श्रावका यद्वचःश्रुतेः ॥१२॥
श्रीमत्पर्युषणापर्वदिवसेषु नवस्वपि । व्याख्यानेषु च कुर्वन्ति यन्नवाङ्गार्चनं जनाः ॥१३॥
चौरादिबन्दिलोकानां छोटनं कुर्वते नृपाः । विना स्वं वचसा यस्य श्रावकान्यजनस्य च ॥१४॥
अन्यद्रव्यसुवस्त्रादिप्रदानं सदा जनाः । ददति श्रावकादिभ्यो यस्य शास्त्रोपदेशतः ॥१५॥
जन्तुमात्रदयां लोकास्तुरुष्का दुष्टचेतसः । पालयन्ति यदीयेन वचसा शुद्धचेतसा ॥१६॥
कथनीयं किमन्येषां हिन्दूभूमिभुजां खलु । सदा धरित्र्यां सर्वत्र जन्तुमात्रसुखप्रदाम् ॥१७॥

३—चकारात् पित्तलस्फटिकपाषाणादिमयानि ।

६—क्षणशब्दः कालविशेषस्य पर्यायोऽपि सामान्यविशेषयोरभेदोपचाराद् अत्र कालपर्यायो व्याख्येयः । अथवा क्षणः अवसरः । यदनेकार्थः—क्षणः कालविशेषे स्यात्, पर्वण्यवसरे महे इति । इयांश्चासौ क्षणश्च इयत्क्षणस्तं इयत्समयं यावत् षोडशशतैकोननवतितमवर्षं यावद् इत्यर्थः ।

७—जनाः श्रावकलोका इत्यर्थः ।

९—धर्ममूलान् उपाश्रयान् । सत्सुधर्मसभा इव सत्सुधर्मशाला इव इत्यर्थः । अशाला चेति सभान्तस्य अत्र शालार्थत्वात्तत्पुरुषत्वेन क्लीबलिङ्गता । लिङ्गभेदं तु मेनिरे इति वचनात् भिन्नलिङ्गोपमापि न दोषाय ।

१४—श्रावकाश्च अन्यजनाश्च श्रावकान्यजनमिति समाहारो द्वन्द्वस्तस्य ।

तपः सूरिजिनचन्द्रो वर्षाणि द्वादशाकरोत् । तत्तपोऽप्यधिवर्षाणि कृत्वा यस्तमुतोऽजयत् ॥१८॥
तपसां संविधानेन मर्यादावर्जितेन हि । न कृतेन पुरा कैश्चिन्महद्भिः पूर्वसूरिभिः ॥१९॥
तपसा क्रियया चोग्रं मत्यक्ष्यं वीक्ष्य सद्गुरुम् । विस्मरन्ति धनागारं श्रुतं दृष्टं न कर्हिचित् ॥
करोत्याशातनामस्य यः पुमान् कोऽपि पापधीः । लभते स कलावेव सकलाङ्गेषु वेदनाम् ॥२१॥
सेवन्ते ये नरा नित्यं सत्येनैव च चेतसा । साम्राज्यादि लभन्ते ते यं गुरुं सुरसन्निभम् ॥२२॥
यादृशोऽतिशयोऽस्यास्ति नान्येषां तादृशः कलौ । सेवाविधायिनां पुंसां सौख्यदो दुःखनाशकः॥
पराङ्मुखानां लोकानां पराङ्मुखसुखप्रदः । दुर्मुखानां सदा मातृमुखानामिव दुःखदः ॥२४॥
यस्य प्रभावतो बद्धमुखा वाक्पतयोऽद्भुताः । ये च मातृमुखास्ते च समुखाः स्युः सुसेवकाः ॥२५
दरिद्रा अदरिद्रेन्द्रा रोगिणोऽरोगिणोऽपि च । धनिनो धनिनामीशा नीरोगा भोगभोजिनः ॥
यस्यास्यैकावतारित्वं लघुकर्मत्वतः किल । सम्भावयन्ति सर्वेऽपि कवयो भविका अपि ॥२७॥
एष देवभवादेवावतीर्ण इति निर्णयात् । दृढसंहननाङ्गत्वात्तप ईदृग् करोति यत् ॥२८॥
नित्यं पद्मासनादीनि यः करोत्यासनानि च । चतुरः प्रहरान् यावद् ध्यानं ध्यायति च ध्रुवम् ॥

इत्थं लसच्छ्रीविजयादिदेवसूरीश्वरश्रीसुकृतोपदेशान् ।
शृण्वन्ति कुर्वन्ति च भव्यलोकाः श्रीवल्लभः पाठक इत्यपाठीत् ॥३०॥

इतिश्री श्रीबृहत्खरतरगच्छीय श्रीजिनराजसूरिसन्तानीयपाठक श्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराज पातिशाहि श्रीअकब्बरप्रदत्तजगद्गुरुबिरुदधारक श्रीहीरविजयसूरीश्वरपट्टालंकार पातिशाहि श्रीअकब्बरसभासंलब्धदुर्वादिजयवाद भट्टारक श्रीविजयसेनसूरीश्वरपट्टपूर्वाचलसहस्रकरानुकारि पातिशाहि श्रीजिहांगीरप्रदत्तमहातपाबिरुदधारि श्रीविजयदेवसूरीश्वरगुणवर्णनप्रबन्धे श्रीमद्विजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरिधर्मोपदेशश्रवणाङ्गीकरणवर्णनो नाम अष्टादशः सर्गः ॥१८॥

२५-२६-ये सुसेवका अवाङ्मुखाः दुर्मुखाः छवाड इति भाषाप्रसिद्धास्ते यस्य श्रीविजयदेवसूरेः प्रभावतो अद्भुताः वाक्पतयः प्रधानवक्तारः स्युः । दुर्मुखे मुखराबद्धमुखौ इति । वागीशो वाक्पती इत्युभयं हैमकोषः । च: पुनः । ये सुसेवकाः मातृमुखा मूर्खाः ते च समुखाः वाग्मियुक्तिपटवः स्युः । अथ बालिशः मूढो मन्दो यथाजातो बालो मातृमुखो जडः इति । वाग्मी वाग्मी युक्तिपटुः प्रवाक् पंमुखो वावदूकः-इत्युभयं हैमकोषः । समुखवदन्यावागरादिरेव । ये इति पदं, ते इति पदं, सुसेवका इति च पदं अग्रिमेऽपि श्लोके योज्यम् । यथा ये सुसेवकाः दरिद्राः ते यस्य प्रभावत अदरिद्रेन्द्राः धनिनः स्युः। ये सुसेवकाः रोगिणस्ते यस्य प्रभावतो अरोगिणो नीरोगाः स्युः । ये सुसेवकाः धनिनस्ते यस्य प्रभावतो धनिनामीशाः धनेश्वराः स्युः । ये सुसेवका नीरोगास्ते च यस्य प्रभावतः भोगभोजिनः स्युः । भोगान् भुञ्जन्तीत्येवं शीलाः भोगभोजिनः । युग्म-व्याख्यानम् ।

एकोनविंशः सर्गः

अथ श्रीकल्पशाखीव शाखाभिरभिशाखिकः। गच्छेऽयं समुद्भ्रोतु विजयमानामिरन्वहम्॥
(–शाखवाञ्जगतीं जाग्रज्जगज्जगदधीश्वरः–इति वा पाठः)
सर्वान् विजयते शत्रून् अस्त्यस्याविजयोऽथवा। विजया प्रथमा शाखा ज्यायां विजयते मता॥
सुन्दरा सद्गुणैः सर्वैस्तपःप्रभृतिभिर्भृशम्। शोणादिगणपाठात् स्यात् सुन्दरीत्यपि ङीपि च॥
निरतीचारचारित्रतपोविद्यादिभिर्गुणैः। वल्लभा निर्मला चैव हंसा हंस इवोदिता॥४॥
मलते सर्वशास्त्राणां परमार्थं विशेषतः। जगत्यां च यतः शस्यमिन्दुत्का विमला बुधैः॥५॥
चन्द्रवत्सर्वलोकानां चन्द्रोत्काछादनात्वतः। सदा कुशलसंयोगात् कुशला कुशलप्रदा॥
यस्याश्च तपस्साधुभ्योऽर्हद्धर्मो रोचते सदा। सच्छास्त्राध्ययने चाग्रं रुचिस्तेनोच्यते बुधैः॥७॥
सद्विद्यालक्षणां लक्ष्मीं गृणातीत्यपि सागरा।
सौभाग्यं सर्वदास्त्यस्यां सौभाग्येति बुधैः स्मृता॥ ८॥
सर्वेषां हर्षहेतुत्वात् हर्षोऽस्त्यस्यां च शाश्वतम्। अस्त्यर्थप्रत्ययाकारयोगाद् हर्षा निगद्यते॥
कलाभिः सहिता नित्यं सकलेत्युच्यते बुधैः। सर्वदोदयसम्बन्धादुदयेत्युच्यते जनैः॥१०॥
आनन्दति सदानन्दैः सर्वविद्याविनोदतः। आनन्देति समाख्याता सारासारप्रभावतः॥११॥

१–अयं श्रीविजयदेवसूरिः श्रीकल्पशाखी शाखाभिरन्वहं समुद्भ्रोतु वर्धतामित्याशीर्वादः। कथंभूतः अयं ? शाखिकाः अभिशाखाः, अभिलक्षीकृत्य संतुष्टः, आभिरभागे इति लक्षणेऽर्थे अभीत्यव्ययस्य योगे शाखिका इत्यत्र द्वितीयाबहुवचनम्, अव्ययीभावसमासाभावात्। अव्ययीभावसमासे तु लक्षणेनाभि प्रती आभिमुख्ये इति अव्ययीभावे, अव्ययीभावश्चेति अव्ययीभावस्य नपुंसकत्वे, नपुंसकत्वाद् ह्रस्वत्वे अभिशाखिकमिति स्यात्। शाखाः अभि लक्षीकृत्येत्यर्थः। शाखा एव शाखिकाः। सर्वशब्देभ्यः स्वार्थे कन्निति कनि, केण इति ह्रस्वे, प्रत्ययस्थात्कात्पूर्वस्यातः इदाप्यसुप इति अकारस्य इकारः। एवं कल्पशाखि विशेषणमपि व्याख्येयम्। शाखवाञ्जगतीं जाग्रज्जगदधीश्वरः–इति पाठे जगदधीश्वरः श्रीविजयदेवसूरिः शाखाभिः जगल्लोकं शाखवान् व्याप्नोतु। कः कां इव श्रीकल्पशाखीव, कां जगतीं, यथा कल्पशाखी जगतीं व्याप्नोति तथा श्रीविजयदेवसूरिरपि।

२–सर्वान् शत्रून् अन्तरस्थान् कामक्रोधलोभमोहमदहर्षान्। अथवा अस्याः शाखायाः ज्यायां पृथिव्यां विजयोऽस्तीति प्रथमा विजया शाखा।

३–सुन्दरा सुन्दरीति अस्त्यर्थप्रत्ययाऽकारयोगात् सुन्दरा, शोणादिगणपाठात् ङीपि सुन्दरी।

९–अस्त्यर्थे प्रत्ययः अस्त्यर्थप्रत्ययः स चासौ अकारश्चेति अस्त्यर्थप्रत्ययाकारस्तस्य योगः सम्बन्धस्तस्मात्।

१०–कलाश्चातुर्यादयस्ताभिः।

इत्यादिका महीयस्यः शाखाः शाखन्ति सर्वदा। यत्तपागच्छगच्छस्य विख्याता जगतीतले॥१२
श्रीपण्डितपदाम्बुधाराद्वन्दैरिमा गुरो। श्रीतपाकल्पसद्वृक्षमूलं सिश्चंस्त्वमेधय ॥१३॥
मालाकारानिव श्राद्धांस्तत्पालनतत्परान्। सूरिमन्त्रप्रभावाशीर्वादैर्वर्धय सद्गुरो ॥१४॥
एवतां श्रीतपागच्छो दीप्यतां सवितेव च। तेजसा सूरिमन्त्रस्य त्वदीयस्य च सर्वदा ॥१५॥
महीयान् श्रीतपागच्छः सर्वगच्छेषु सर्वदा। सर्वदा सर्वदाता च पर्वनात्सर्ववाञ्छितम् ॥१६॥
राजान इव विद्यन्ते श्रावका यत्र सर्वदा। नन्दताच्छ्रीतपागच्छः सततं सततक्षणः ॥१७॥
यत्र त्वमीदृशः सूरिर्वर्तसे गच्छनायकः। स्तूयसे चेति विद्वद्भिः पातिसाहादिभिर्नृपैः ॥१८॥
इतीति किं तदाह-
उल्लसन्ति भुवि व्योम्नि सूरयस्तारका इव। एकैकतो महीयांसो जाग्रज्ज्योतिष उद्धताः ॥१९॥
विच्छायीकृत्य तान् सर्वान् राजते सवितेव यः। विजयदेवसूरीन्द्रस्तपागच्छे स वर्तते ॥२०॥
भूयः सूरयः सन्तो भूतलेऽभ्युदिता दिवि। यत्प्रतापरविध्वस्ता न प्रेक्ष्यन्ते ग्रहा इव ॥२१॥
यत्रार्य दीप्यते सूरिः सूरयस्तत्र नापरे। यत्र सूर्यस्सदोदेति तत्र स्युस्तारकाः कथम् ॥२२॥
(' तत्र किं चन्द्रतारकाः ' इति वा पाठः।)
त्वं सूरिर्वासरो यत्र न निट् तत्रान्यसूरयः। सदोद्योतः सदोद्बोधः पदार्थानां नवो नवः ॥२३॥
प्रातः सूरिर्यदा यत्र प्ररूपयति सद्वृषम्। मत्यक्षोऽयं महादेव इति माहुस्तदा जनाः ॥२४॥
व्याख्यातिरूपमुत्कर्षात् शास्त्रार्थान् सूरिशेखरः।
व्याख्यान्ति किं परव्याख्यां व्याख्यातारोऽन्यसूरयः ॥२५॥
शास्त्रार्थांस्तन्मुखप्रोक्तान ये शृण्वन्तितरां नराः। ब्रुवन्तिरूपमेवं ते ब्रुवन्तु किं परे बुधाः ॥२६

१६-पर्व पूरणे भ्वादिः परस्मैपदी।

२४-सूरिर्यदा यत्र प्रातः सद्वृषं प्रधानं पुण्यं दानादिचतुर्विधं प्ररूपयति कथयति तदा जनाः अयं प्रत्यक्षो महादेव इति प्राहुः कथयन्ति। महादेवो हि सद्वृषं प्रधानवृषभं प्रकृष्टरूपं करोतीत्यर्थः। तत्करोति तदाचष्टे इति चुरादित्वात् सुबन्ताण्णिच्; अथवा सद्वृषं विद्यमानवृषभं प्ररूपयति प्रकृष्टरूपं पश्यति। अत्र दर्शनार्थे णिच्।

२५-सूरिशेखरः श्रीविजयदेवसूरिः सूरिशिरोवतंसः शास्त्रार्थान् व्याकरणसाहित्यालङ्कारच्छन्दस्तर्कप्रमुखानेकशास्त्रार्थान् उत्कर्षात् व्याख्यातिरूपं प्रशस्तं व्याकरोतीत्यर्थः। व्याख्यातारोऽन्यसूरयः परव्याख्यां शास्त्राणां प्रधानव्याख्यानं व्याकुर्वन्ति किं कुत्सितं व्याकुर्वन्तीत्यर्थः।

२६-ये नरास्तन्मुखप्रोक्तान् श्रीविजयदेवसूरिगुरुप्ररूपितान् शास्त्रार्थान् शृण्वन्तितरां अतिशयेन शृण्वन्ति, ते नरा एवं ब्रुवन्तिरूपं प्रशस्तं कथयन्ति। एवमिति किं तदाह-परेऽन्ये बुधाः शास्त्रार्थान् ब्रुवन्तु किं कुत्सितं कथयन्तीत्यर्थः।

इत्यादिका महीयांसः प्राज्ञाः शासन्ति सर्वदा । यत्तपागच्छगच्छस्य विद्यन्ते जगतीतले ॥१२॥
श्रीपार्श्वनपदाम्बुधारावृन्दैरिमा पुरी । श्रीतपाकल्पवृक्षमूलं सिञ्चंस्तमेधय ॥१३॥
मान्याकारानिव श्राद्धांस्तन्वपान्मतान्परान । सूरिमन्त्रप्रभावाशीर्वादैर्दैव सद्गुरो ॥१४॥
एधतां श्रीतपागच्छो दीप्यतां सवितेव च । तेजसा सूरिमन्त्रस्य त्वदीयस्य च सर्वदा ॥१५॥
महीयान् श्रीतपागच्छः सर्वगच्छेषु सर्वदा । सर्वदा सर्वदाता च पौनःपुन्येन वाञ्छितम् ॥१६॥
राजान इव दीप्यन्ते श्रावका यत्र सर्वदा । नन्दतात् श्रीतपागच्छः सततं सततागमः ॥१७॥
यत्र स्वमीदृशः सूरिर्वंशे गच्छनायकः । स्तूयते येन विद्वद्भिः पातिसाहादिभिर्नृपैः ॥१८॥
इतीति किं तदाह–
उल्लसन्ति भुवि ज्योतिषि सूरयस्तारका इव । एकैकतो महीयांसो जाग्रज्ज्योतिष उद्गताः ॥१९॥
निष्प्रभीकृत्य तान् सर्वान् राजते सवितेव यः । विजयदेवसूरीन्द्रस्तपागच्छे स वर्तते ॥२०॥
भूयः सूरयः सन्तो भूतलेऽभ्युदिता दिवि । यत्प्रतापरविध्वस्ता न प्रेक्ष्यन्ते ग्रहा इव ॥२१॥
यथार्थं दीप्यते सूरिः सूरयस्तत्र नापरं । यत्र सूर्यस्सदोदेति तत्र स्युस्तारकाः कथम् ॥२२॥
(' तत्र किं चन्द्रतारकाः ' इति वा पाठः ।)
त्वं सूरिर्वागिरो यत्र न निद्रतान्यसूरयः । सदोषोनः सदोद्बोधः पदार्थानां नवो नवः ॥२३॥
प्रातः सूरिर्यदा यत्र प्ररूपयति सद्वृषम् । प्रत्यक्षोऽयं महादेव इति प्राहुस्तदा जनाः ॥२४॥
व्याख्यातिरूपमुत्कर्षात् शास्त्रार्थान् सूरिशेखरः ।
व्याख्यान्त्यकि वरव्याख्यां व्याख्यातारोऽन्यसूरयः ॥२५॥
शास्त्रार्थांस्तन्मुखप्रोक्तान् ये शृण्वन्तितरां नराः । ब्रुवन्तिरूपमेवं ते ब्रुवन्त्यकि परे बुधाः ॥२६

१६—पर्व पूरणे भ्वादिः परस्मैपदी ।

२४—सूरिर्यदा यत्र प्रातः सद्वृषं प्रधानं पुण्यं दानादिचतुर्विधं प्ररूपयति कथयति तदा जनाः अयं प्रत्यक्षो महादेव इति प्राहुः कथयन्ति । महादेवो हि सद्वृषं प्रधानवृषभं प्रकृष्टरूपं करोतीत्यर्थः । तत्करोति तदाचष्टे इति चुरादित्वात् सुबंताण्णिच्; अथवा सद्वृषं विद्यमानवृषभं प्ररूपयति प्रकृष्टरूपं पश्यति । अत्र दर्शनार्थे णिच् ।

२५—सूरिशेखरः श्रीविजयदेवसूरिः सूरिशिरोवतंसः शास्त्रार्थान् व्याकरणसाहित्यालङ्कारच्छन्दस्तर्कप्रमुखानेकशास्त्रार्थान् उत्कर्षात् व्याख्यातिरूपं प्रशस्तं व्याकरोतीत्यर्थः । व्याख्यातारोऽन्यसूरयः वरव्याख्यां शास्त्राणां प्रधानव्याख्यानं व्याख्यान्त्यकि कुत्सितं व्याकुर्वन्तीत्यर्थः ।

२६—ये नरास्तन्मुखप्रोक्तान् श्रीविजयदेवसूरिमुखप्रज्ञापितान् शास्त्रार्थान् शृण्वन्तितरां अतिशयेन शृण्वन्ति, ते नरा एवं ब्रुवन्तिरूपं प्रशस्तं कथयन्ति । एवमिति किं तदाह—परेऽन्ये बुधाः शास्त्रार्थान् ब्रुवन्त्यकि कुत्सितं कथयन्तीत्यर्थः ।

अतिशेषेतरां सूरीन् विशालैर्गोगुणादिभिः । राजन्तकि महान्तोऽपि सूरयोऽन्ये त्वदग्रतः ॥२७॥
गुणैरित्यादिभिः स्वर्गगुरुस्तैर्नोपवर्णितः । विजयदेवसूरीन्द्रः साक्षाद्देभिवाजति ॥२८॥
सत्यवादी सदावादी नोन्मादी न च दुर्मदी । न प्रमादी मृषावादी न वादे प्रतिवादिभिः ॥२९॥
प्रतिवादी जनोऽवादीदु यशोवादीति यद्यशः । स्याद्वादवादमानन्दी वावदीति स सद्गुरुः ॥३०॥
यशोभग्योऽनिशीभाग्याज्जगज्जनयशस्विषु । येषांभग्योऽपि गुरं गं निशिभेषु चन्द्रिका ॥३१॥
अयं सूरिर्जगत्त्राता पाता दुर्गतिपातनः । प्रमाता सप्ततत्त्वानां दाता वाञ्छितान् मनीषितान् ॥३२॥
सूरिः सूरिरयं यत्र तत्र न पटु पटोटरुम । यत्र विप्रेन्द्र इत्यत्र स्यात्कि कण्टकिरुम ॥३३॥
विरटत्पारटत्येव पटुहूटं कटूत्कटम । स्वात्मं सद्गुरुं सिद्धं कूटं कठिनासिव ॥३४॥
निराचकार निस्सारानन्यवादीश्विराय यः । उपाचारक्रियाकारः सोऽभूद्दानारतस्तरः ॥३५॥
मामुपात् कः खगोऽनन्तं मेरुमुत्पाटयेच्च कः । कस्तरं गाररः सिन्धुं गुरे कः स्तौति ते गुणान् ॥
सहस्रद्वितयेनापि जिह्वानां नागनायकः । स्फुटान् स्फटान् सहस्रं च धरन् निरमि मन्ततम् ॥
यदीयानि प्रशस्यानि विशदानि यशांसि हि । शेषो वक्तुं न शक्नोति को वराकोऽपरस्तुकः ॥

२७–भो श्रीविजयदेवसूरे ! त्वं विशालैर्गोगुणादिभिः सूरीन् अर्थात् पूर्वभट्टारकान् अतिशेषेतरां अतिशयेन अतिशयं प्रापयसि । अत एव त्वदग्रतो महान्तोऽप्यन्ये सूरयो राजन्तकि कुत्सितं शोभन्त इत्यर्थः । व्याख्याविरूपं सुवान्तिरूपमित्युभयत्र प्रशंसायां रूपप् इति विशे- नुवृत्तोस्तिङंतादपि रूपप्प्रत्ययः । शृण्वन्तितरां अतिशेषेतरामित्युभयत्र किमेत्तिङ्व्ययेऽद्रिव्यप्रकर्षे तरप् तमपौ च इति सूत्रेण प्रकर्षकस्य तरप् प्रत्ययस्य आमुः । व्याख्यान्ताकि सुवान्तिकि राजन्ताकि इति त्रिषु सुबन्तस्य विशेऽनुवृत्तः कुत्सितेऽर्थेऽकच् प्रत्ययः ।

३०–स सद्गुरुः श्रीविजयदेवसूरिः स्याद्वादवादं वावदीति आतिशयेन वदति । स कः ? यद्यशः प्रतिवादी जन इति अवादीत् अकथयत् । कथं० प्रतिवादीजनः यशोवादी । इतीति किं ? किं भूतः सद्गुरुः सत्यवादी । पुनः कथं० सदावादी षड् दर्शनानां मध्ये मुख्यवादि- त्वात् । शेषं स्पष्टं । पुनः कथं ? प्रतिवादिभिरिह सहयोगं विनापि तृतीया, वृद्धो यूनेति निर्देशात् । ततोऽयमर्थः–प्रतिवादिभिः सह नैयायिकादिपञ्चदर्शनसम्बन्धिभिः सार्धं वादे न प्रमादी न प्रमादवान् न मृषावादी न कूटभाषकः ।

३१–यशः माहात्म्यं सत्त्वं श्रीः ज्ञानं प्रतापः कीर्तिश्चेति हैमोणादिः, श्रीकामप्रयत्नमा- हात्म्यवीर्ययशसां भगशब्दः । यशोभगोऽस्य विद्यते यशोभग्यः, वेश इति बलमुच्यते वेशो बलं भगो विद्यतेऽस्य वेशोभग्यः । अत्र उभयत्र वेशो यश आदेर्भगाद्यल् इति मत्वर्थे यल् प्रत्ययः लकारः स्वरार्थः ।

ईक्षमाणः सहस्राक्षः सहस्राक्षिभिरन्वहम् । नैव तृप्यति यद्वक्त्रं कथं तर्हि जगज्जनः ॥३९॥
अवतारस्त्वदीयोऽयं संसारापारपारदः । अवतार इव श्रेयान् श्रेयस्कारी च सद्गुरो ॥४०॥
अन्येषां सद्गुणान् सम्यक् पश्यतां त्वद्गुणाननु । विश्रामस्थानकं सूरे कवीनां वचसामसि॥
ईश्वरीकरणं सत्यं द्योतते त्वयि सम्प्रति । सर्वीय इव सर्वीयसर्वसर्वगुणाग्रणीः ॥४२॥
चिकीर्षसि रणं शूरे यदमा प्रतिवादिभिः । भजन्ते विकृतं तर्हि तमहो प्रतिवादिनः ॥४३॥
चपूर्वं प्रतिबुद्ध्य द्राक् तपूर्वं भववारिधेः । मपूर्वं तपसा सिद्ध्यै शपूर्वं ते सुखाप्तये ॥४४॥
त्वं रणं कुरुषे सूरे यदा क्षणमयः क्षणे । श्रुत्वा तं च तदा तं च दधते विविधं बुधाः ॥४५॥
कपूर्वं सर्वदायत्तं यपूर्वं संयमश्रियः । भपूर्वं तपसः शश्वत् वपूर्वं शिवयोषितः ॥४६॥ युग्मम्।

४१–किं कुर्वतां कवीनां अन्येषां भट्टारकादीनां सद्गुणान् अनु त्वद्गुणान् भनुत्वद्गुणेभ्यो हीनान् पश्यतां, अन्यसूरीणां समीचीनान् धर्यशौर्योदार्यगाम्भीर्यादीन् गुणान् त्वद्गुणेभ्यो हीनान् पश्यन्तः कवयो न स्तुवन्तीति कविवचनानां त्वं विश्रामस्थानकं वर्तसे इत्यर्थः । त्वद्गुणान् अनु इत्यत्र हीने इति सूत्रेण हीनेऽर्थे अनुः कर्मप्रवचनीयः । कर्मप्रवचनीयत्वात् हीनार्थस्य अनोरस्य-यस्य योगे त्वद्गुणान् इति द्वितीया, अनुना सह समासाभावात् पृथक् पदं च ।

४२–ईश्वरीकरणं अनीश्वरस्य पुरुषस्य ईश्वरस्य करणं सत्यं त्वयि संप्रति द्योतते । कस्मिन्निव सर्वीय इव तीर्थङ्कर इव इत्यर्थः । सर्वीय इत्यपि जिने इत्यभिधानकोपात् । सर्वीय इव सर्वेषु सर्वैर्गुणैरग्रणीर्मुख्यस्तत्सम्बोधनं सर्वीयसर्वसर्वगुणाग्रणीः ।

४४–हे सूरे यदि प्रतिवादिभिरमा सह विकृतं विकारापन्नं प्रतिवादिप्रतिपादितप्रतीपो-त्तरदानात् रणं संग्रामं वाद्लक्षणं चिकीर्षसि कर्तुमिच्छसि । तर्हि अहो इति आश्चर्ये प्रतिवादिनः तं रणं अविकृतं विकाररहितं भजन्ते सेवन्ते । कथंभूतं रणं चपूर्वं चरणं चारित्रं । किं कृत्वा ? प्राक् प्रतिबुद्ध्य । पुनः कथंभूतं रणं तपूर्वं तरणमित्यर्थः । केन ? तपसा । किमर्थं ? सिद्ध्यै । पुनः कथंभूतं ? शपूर्वं शरणमित्यर्थः । कस्य ? ते तव । किमर्थं ? सुखाप्तये सुखलब्धये ।

४६–व्याख्याः–हे सूरे त्वं यदा क्षणे व्याख्यानादि सम्बन्धिनि कालविशेषे रणं शब्दं कुरुषे तदा बुधाः पण्डिताः प्रतिवादिनः तं रणं श्रुत्वा, चः पुनः, तं रणं विविधं बहुप्रकारं दधते धरन्ति । कथंभूतः त्वं क्षणमयः उत्सवप्रधानः प्रचुरोत्सवो वा । कथंभूतं रणं ? कपूर्वं करणमि-न्द्रियमित्यर्थः । जातावेकवचनं, पञ्चेन्द्रियाणि अथवा एकं जिह्वेन्द्रियमित्यर्थः । पुनः कथं० ? करणं सर्वदा सर्वकालं आयत्तं वशं निरुत्तरीकरणात् मौनं कुर्वन्तीत्यर्थः । पुनः कथं० रणं ? यपूर्वं यरणं संग्रहं । कस्याः संयमश्रियः । पुनः कथं० रणं ? भपूर्वं भरणं पोषणं । कस्य ? तपसः । शश्वत्सदा । पुनः कथं० रणं ? वपूर्वं वरणं । कस्याः ? शिवयोषितः ।

सुखायन्तो विषायन्त इव शश्वन्महाजनाः । पीयन्ते गोपयःश्रेयःश्रद्धया यद्वचःसुधाम् ॥
पयस्यन्ति यदीयं ये जना शुचिवचोमृताः । वचः शुचि शुचिश्रेयोमयं ज्ञानमयं किल ॥४८
सर्वदा ये सुखस्यन्ति दुःखस्यन्ति कदापि न । ऋद्धिस्यन्ति बुधा ये च साम्राज्यस्यन्ति चावनौ ॥
स्तुवन्ति त्वां त एवैवं श्रयन्ते च शुभाश्रयम् । त्वदीयं चरणाम्भोजं भट्टारकशिरोमणे ॥५०॥ युग्म
सूरयोऽन्ये महीयांसो गरीयांसो यशस्विनः । स्वस्वगच्छेषु यथा पुण्यं तु बिभ्रति ॥
बिभर्ति भक्तिवत्तित्वं तेषु यो जिनशासने । दिव्यं च दानशौण्डत्वमिति तं स्तौति को न विट् ॥
धैर्यस्थैर्यसुशौण्डीर्यशौर्यौदार्यादिभिर्गुणैः । सर्वेभ्योऽप्यधिकः किन्तु धात्रैकत्र कृतस्त्वयि ॥५३॥
—त्रिभिर्विशेषकम् ।

४७—व्याख्या.—महाजनाः शश्वत् यद्वचःसुधां श्रीविजयदेवसूरिवचनामृतं पीयन्ते पिब-न्ति । पीङ् च पाने चतुर्थस्वरान्तो दिवादिरात्मनेपदी । कया गोपयःश्रेय.श्रद्धया—गोरिव-निर्मलसर्वदोषापहारिश्रेयस्कारिगव्यदुग्धसमानधर्मश्रद्धया । किं कुर्वन्तः ? सुखायन्तः आत्मनोऽमृतं वाञ्छन्तः । कथंभूता उत्प्रेक्ष्यन्ते—विषायन्त इव आत्मन ऋद्धिं वाञ्छन्त इव । यथा ऋद्धिलालसाः आत्मन ऋद्धिमिच्छन्ति तथा महाजनाः आत्मनः सुधामिच्छन्तीत्यर्थः । विषार्द्धिमूल्ययोरिति हैमानेकार्थः । सुधास्यन्तः विषास्यन्त इत्युभयत्र सर्वप्रातिपदिकानां क्यचि । लालसायां सुक् असुक् वागम इत्यपरे—इत्युक्त्वा लालसायां क्यचि सुगागमे च शतृप्रत्ययः ।

४८—एते जना यस्य श्रीविजयदेवसूरेः शुचि पवित्रं वचः कर्मतापन्नं पयस्यन्ति आत्मदुग्धमिच्छन्ति । अस्माकं श्रीविजयदेवसूरिप्ररूपितं वचनं दुग्धमित्यर्थः । शेषं स्पष्टं । पयस्-स्यन्त्यत्र सर्वप्रातिपदिकानां क्यचि, लालसायां असुगागमः ।

५०—हे भट्टारकशिरोमणे हे श्रीविजयदेवसूरे त्वां त एव एवं पूर्वोक्तप्रकारेण स्तुवन्ति । च: पुनः त एव त्वदीयं चरणाम्भोजं श्रयन्ते सेवन्ते, ये सर्वदा सुखस्यन्ति आत्मनः सुखमि-च्छन्ति । कदापि न दुःखस्यन्ति आत्मनो दुःखं न वाञ्छन्ति । च: पुनः ये बुधाः ऋद्धिस्यन्ति आत्मनः ऋद्धिं वाञ्छन्तिः । च: पुनः येऽवनौ पृथिव्यां साम्राज्यस्यन्ति आत्मनः साम्राज्यं वाञ्छन्ति । सुखस्यन्ति दुःखस्यन्ति ऋद्धिस्यन्ति साम्राज्यस्यन्ति इत्येतेषु चतुर्ष्वपि सर्वप्राति-पदिकानां क्यचि, लालसायां सुगागमः ।

५३—विट् पुरुषः अथवा विट्, विद् ज्ञाने वेत्तीति विट् पण्डित इत्यर्थः । सुशौण्डीर्य-मिति अद्भुतसाहसिकत्वं । अत्र शौण्डीर्यशब्दः तालव्यचतुर्दशस्वरादिः । एकत्रेत्येकस्मिन् त्वयि धात्रा वेधसा कृतैरिति ।

सूरिः सपरिवारोऽपि हृष्टस्तल्लेखवाचनात् । कस्य न स्यान्मदोऽमन्दो हीन्दूच्छत्रपतेर्हवे ॥६९॥
श्रीराणाकारणं तस्य गुरोः श्रुत्वा तदा मुदा । सर्वस्संघश्चमचके वक्रेतरतराशयः ॥७०॥
तदानीं मेदिनीद्रङ्गवासी सङ्घोऽनघो घनः । श्रीमन्नागोरनगरे गुरुं नन्तुमुपागमत् ॥७१॥
सौवर्णै रौप्यकैः पुष्पैः शक्तिभक्त्यनुसारतः । पूज्यः पट्टधरेणामा श्रावकैः पूजितस्ततः ॥७२
मेडतीयस्य संघस्याग्रहतश्चलितस्ततः । श्रीनागोरीयसंघेन संयुतः संयताधिपः ॥७३॥
सपादलक्षदेशीयजन्तुजातं भवोधयन् । क्रमेण फलवर्द्धीशे श्रीपार्श्वप्रभुमानमत् ॥७४॥
गुरुः श्रीपार्श्वतीर्थेशमेकमेव तदाऽनमत् । जङ्गमं तीर्थमापान्तं तं जना बहवोऽनमन् ॥७५॥
कुशलात्सागरा विज्ञा गुरुभिर्वाचकाः कृताः । यतो महीयसि पदे ते महाफलदाः खलु ॥७६॥
अत्रान्तरं गूर्जरत्रासत्कः संघो महर्द्धिकः । समागाच्छर्करापात इवाभूदुग्धमध्यगः ॥७७॥
तेन संघेन सर्वेण शर्वेणेवोरुभूतिना । पूजितास्तत्र तीर्थेशाः श्रीपूज्याचार्यसंयुताः ॥७८॥
अथ नागपुरीसंघे गुरुं नत्वा गृहं गते । गुरवो गुरुसंघाढ्याः प्रापुः श्रीमेडतापुरीम् ॥७९॥
जयमल्लाख्यमन्त्रीशस्तत्रागाद् गुरुसंमुखः । कुर्वन्महोत्सवाद्वैतमौत्सुक्याधिचित्तवित्तयोः ॥८०॥

६९–पूर्वार्धं सुबोधं हीन्दूछत्रपतेः श्रीराणाजीकस्य हवे आकारणे सति कस्यान्यस्य लोकस्य मदोऽहङ्कारः, गुरोस्तु स सर्वथा नास्तीति गुरुपक्षे मदो हर्षः । यदनेकार्थः–मदोऽहङ्कारे हर्षे चेति । हर्षोऽपि गुरोर्जिनशासनोन्नतिर्भाविनीति हेतोः ।

७०–वक्रात् इतरो वक्रेतरः सरल इति यावत् । अतिशयेन वक्रेतरो वक्रेतरतरः आशयोऽभिप्रायो यस्य सोऽतिसरलमना इति । अत्र प्रकृष्टेऽर्थे तरतमाविति तरप्रत्ययोऽतिशयार्थवाचक इति।

७२–पूज्यः श्रीभट्टारकः । पट्टधरेण श्रीविजयसिंहसूरिणा अमेति सार्धं । साकं सत्रा समं सार्धममा सहे ति श्रीहैमनाममालाकोशे । तेनात्रामायोगे तृतीयाऽन्यत्स्पष्टम् ।

७३–संयतानां साधूनामधिपो गुरुरित्यर्थः ।

७५–द्वितीयपदे–णम् प्रह्वीभावे इत्यस्य धातोः अनद्यतन्या विभक्तेः परस्मैपदैकत्वम् चतुर्थपदे तस्यैव धातो बहुत्वं । जनानां बहुत्वं तु नागोरमेडतादनेकस्थानीयमहाजनसमागमादिति ।

७६–पश्चिमार्धे–यद्भूतास्ते गुरवः सूरयः बृहत्पतयश्च महीयसि पदे स्थाने फलवार्द्धिमहातीर्थलक्षणे, पक्षे महीयसि पदस्थाने समागतास्सन्तो महाफलदा भवन्त्येवेति ज्योतिर्विदां मतम् ।

७८–अत्र द्वितीयपदे–शर्वेण ईश्वरेणेव । कि० उर्वी भूतिः सम्पद् यस्येति तेन; पक्षे भूतिर्भस्म यस्य तेनेति । शेषं सुबोधं ।

७९–सुगमं । परं गुरवः सूरयः । कि० गुरुणा महता सङ्घेन गूर्जरत्रासत्केन मेडतासत्केन च आढ्यास्सन्त इति ।

स्वच्छस्फटिकरत्नादिप्रतिमानां शुभे दिने। कृत्वा प्रतिष्ठामुत्कृष्टां ततस्सूरिवरोऽचलत् ॥९९॥
गत्वा कल्याणजीराज्यास्पदे द्राग् देलवाडके। मन्त्रिमुख्येन मांडाख्यश्राद्धेन विहितोत्सवम्॥
श्रीशालिशैलबिम्बानां प्रतिष्ठां सूरिराड् व्यधात्। तस्मिन्महोत्सवे मेघो ववर्ष स्पर्धयेव किम्॥
तत्र गत्वानेकचैत्यानां वन्दनं च विलोकनम्। उपदेशप्रदानेन जीर्णोद्धारश्च निर्ममे ॥१०२
अथोदयपुरीयोऽपि संघस्तत्रैत्य सत्वरम्। विधाय विविधां भक्तिं विज्ञप्तिं च पुरो गुरोः ॥१०
विशिष्टशकुनान्वीक्ष्य श्रीपूज्याचार्यवर्ययोः। चतुर्मासकसम्बन्धि वचः प्राप्य पुरं ययौ ॥१०४॥
गुरुर्नागह्रदे नत्वा श्रीपार्श्वं नवखण्डकम्। अद्भुतं शान्तिनाथं च श्रीआघाटमुपागमत् ॥१०५॥
तपेति बिरुदप्राप्तिस्थानेऽत्राघाटपत्तने। सर्वोदयपुरीयोऽपि सङ्घोऽगाद्वन्दितुं गुरुम् ॥१०६॥
अथाषाढादिमेपक्षे सुराचार्यस्य वारके। पवित्रे पुष्यऋक्षे च शुभेषु शकुनादिषु ॥१०७॥
आगच्छतो गुरून् ज्ञात्वा श्रीजगत्सिंहराणकः। संघायादात् सम्पदं स्वां समग्रां सिन्धुरादिकाम्॥
अथ सज्जीकृतोत्तुंगतोरणश्रेणिबन्धुरम्। राणाजीदत्तपूर्वोक्तसामग्रीप्रीणितप्रजम् ॥१०९॥
शृङ्गारिताशेषजनस्त्रीगीतोद्दाममङ्गलम्। पुरं प्रविश्य सुगुरुः प्रतिश्रयमुपाश्रयत् ॥११०॥
अथ तत्रोत्सवाह्वने चतुर्मासं गुरुर्व्यधात्। श्रीमदाचार्यधुर्यस्तु श्रीआहडपुरे पुनः ॥१११॥
आघाटे वीरचैत्यस्य जीर्णोद्धारो व्यधायि च। संघेन श्रीमदाचार्यवाक्प्रामाणीतचेतसा ॥११२॥

१०१—श्लोकसप्तकं कण्ठ्यं। परं सप्तमश्लोकार्द्धे—तस्मिन्महोत्सवे यथा सर्वोऽपि संघ-लोको गुर्वागमात् प्रोत्सवम् बिसेवेवर्ष। तथैव तत्स्पर्धया मेघोऽपि मुशलधाराभिस्तथा ववर्ष यथा सर्वापि पृथ्वी जलमयी जातेति। अनेन तदानीं गुरुमाहात्म्यादेव लोके दुर्दर्शनाभिवर्षं मेघागमनं चासूचि।

१०२—तत्र तस्मिन् देवकुलपाटके अनेकचैत्यानां शत्रुञ्जयगिरिनारावतारादीनां बहूनां सु तपागच्छेन्द्रश्रीसोमसुन्दरसूरिवारके जातानां केषांचित्तु श्रीविजयदेवसूरिवारके तदुपदेशादेव तद्-गच्छीयैः पण्डितकीर्तिविजयैः श्रीराणाजी श्रीकल्याणजी प्रतिबोधन तत्सदाकारापरमा-सादपातननिवारण-बाकलाराजितानेकनागर-व्यवहारि-चारण-ग्रामेश्वर-ठकुरोपदेशप्रदान-बहुगुणा-नयनानुग्रहेण जीर्णोद्धारविषयीकारितानां पुनः सज्जीकृतमण्डितप्रतिमानां चैत्यवन्दनं निर्ममे। पवित्राणां चैत्यानां च विलोकनं पुनरुपदेशद्वारेण जीर्णोद्धारश्च कारितस्तत्र चैत्यस्य कल्याणवसहीति नामकप्रासादस्य श्रीकल्याणजीकृतोद्धारकरणं प्रतिवर्षमष्टाधिकदशवर्षजागरणनिवारणं च प्रतिपन्नमिति।

१०८—अत्र सिन्धुरादिकां गजादिकां आदिशब्दादनेकतुरङ्गमाश्वीयमहावादकक्षत्रबन्धन-नगरशृङ्गारणादिकम्। शेषमन्वयादिकं स्पष्टम्।

दर्शनादेव पूज्यानामाचार्याणां गिरापि च। मिथ्यात्विनोऽपि विप्रायास्तत्रासन् प्राप्तबोधयः॥
तस्मिन् वर्षे वर्षाब्दोऽदृष्टपूर्वोऽद्भुतावहः। यं दृष्ट्वा मानवाः प्राहुश्चतुर्थारिष्किमागतः॥११४॥
श्रीजगत्सिंहराणोऽपि चमत्कारात्ततोऽवदत्। सत्यं सुगालिभो मर्दः समागादत्र सद्गुरुः॥
ततः प्रभृति सर्वत्र सुकालभवनाद् भुवि। असौ सुगालिओ मर्द इति ख्यातिरभूद् गुरोः॥
कदा स वासरो यत्र भावी मे गुरुसङ्गमः। इति ध्यायन् राजकार्येऽव्यग्रत्वान्नृपतिः स्थितः॥
अथ पारणके जाते चतुर्मास्या मुनीश्वरः। मेवाडदेशे व्यहरत्तीर्थयात्रार्थमुद्यतः॥११८॥
गुरुः श्रीकरहेडादितीर्थयात्रां विधाय च। चित्रकूटमहादुर्गे दूरादप्यवलोक्य च॥११९॥
खमणोरपुरं प्राप्य प्रतिष्ठां चरमप्रभोः। मोहीग्रामीयसंघेन कारितामकरोत्ततः॥१२०॥
ग्रामे गोगुंदके गत्वा नत्वा श्रीनवपल्लवम्। नाडीनाम्नि सन्निवेशे तथाप्याघाटपत्तने॥१२१॥
एकैकां क्रमतश्चक्रे प्रतिष्ठां शिष्टसद्गुरुः। एवं देशे मेदपाटे प्रतिष्ठापञ्चकं कृतम्॥१२२॥
अथ गूर्जरदेशेषु ज्ञात्वा चिचलिषून् गुरून्। प्रागप्युत्कण्ठितो द्रष्टुं श्रीजगत्सिंहराणकः॥१२४
पींछोलारुयसरोमध्ये महोद्यानान्तरालगम्। दलवादलके सौधे प्राच्यराणककारिते॥१२५॥
आश्चर्यकारके नाकिविमानमदहारके। नानामहोम्बरासुरूपोद्भटभट्टयुतोऽभ्यगात्॥१२६॥
दर्शनादेव सूरीन्दोर्नत्वावर्तादिपूर्वकम्। कृताञ्जलिपुटस्तस्थौ सुविनीतस्तुनिष्यवत्॥१२७॥

११३—श्लोकचतुष्कं कण्ठ्यं। अन्तिमे श्लोके तत्रेत्युदयपुरे विप्रभट्टराजपुत्रादयोऽनेके मिथ्यात्विनोऽपि प्राप्तबोधयोऽङ्गीकृतशुद्धधर्मा आसन् जाताः। किं बहुना? केचित्षडावश्यकप्रत्याख्यानादिपाठिनो जाताः।

११९—अत्र पञ्चमे श्लोके स मुनीश्वरः श्रीविजयसिंहसूरिसंयुतोऽनेकश्लोककृतां विज्ञप्तिमवधार्य बहुप्रकारायानेकतीर्थानां श्रीकरहेडकपार्श्वनाथादीनां यात्रां विधानाय च मोहीग्रामवास्तव्यकारितप्रतिष्ठाकरणाय च श्रीराणाजीकेन प्रथमतरं मद्द्वारा विज्ञप्तोऽपि श्रीराणाजीकेन मद्विज्ञप्ते मम महालाभो भावीति पुनरत्र पादावधारणीयमेवेति मद्विज्ञप्तिं प्रतिपाद्य च एतत्प्रथमं मेवाडदेशे व्यहरदिति।

१२६—श्लोकत्रिकं कण्ठ्यं। परं प्राच्यः प्राचीनो यो राणकः श्रीमत्पूर्वराजसिंहाख्यः श्रीउदयपुरनिवासकः पुनरुदयसागरसरोवरकारकश्च तेन कारिते।

१२७—सौधे पुनः किं० नाकिनां देवानां विमानस्य मदहारके अत एवाश्चर्यकारके द्वादशकोटनाम्नि सद्मविशेषे। राणकः किं० नानाजातीया ये प्रवरा वाणियाख्याः सिद्धवसंतराजी कीर्तिप्रधानश्रीमानसिंहजीश्रीमुकुन्दसिंहजीश्रीमानसिंहजीश्रीभीमजीश्रीदेवभागश्रीमुख्याः। पुनः उद्भटा ये भट्टा व्याकरणादिपाठिनो भट्टवासुदेवहरिपाठकप्रमुखास्तैर्युक्तः श्रीजगत्सिंहराणकः श्रीगुरून् द्रष्टुं [illegible] अभ्यागात् इति।

गुरुरपि किं कृतवानित्याह–

गंभीरध्वनिना तस्मै धर्मलाभं गुरुर्ददौ । ननाम मेदपाटानामधीशाय हसन्मुखः ॥१२८॥
ततो गुरोरेव मुखे न्यस्तनेत्रो नरेश्वरः । अद्य मे सफलं जन्म जातमित्यूचिवान्मुदा ॥१२९॥
गुरुणा दीयमानायां देशनायामथान्तरे । भाने पृथ्वीपतिः स्वामिन् विज्ञप्तिं मेऽवधारय॥१३०
आयुर्धनतरं येन कर्मणा प्राप्यते प्रभो । सम्यग् विज्ञाय शास्त्रेभ्यस्तस्योपायं समादिश ॥१३१
अथोवाच गुरु राजन् सावधानमनाः शृणु । पूर्वं श्रीभीमभूपालो जातोऽणहिलपत्तने ॥१३२॥
दीर्घायुषोऽन्यदा श्रुत्वा सोऽथ मालवभूपतीन् । धारायां भोजराजस्य पार्श्वे प्रैषीत्स्वमन्त्रिणम्॥
गत्वा नत्वा च तेऽप्यूचुः पृष्टं भीमेन वोऽस्त्यदः । कथं दीर्घायुषो यूयं वयं त्वल्पायुषः कथम् ॥
येनोपायेन दीर्घायुर्भवेत्तीमस्तमादिशत् । तिष्ठन्तु भो कियत्कालं सुखं भोजोऽप्यदोऽवदत् ॥
इत्संकमथोद्दिश्य भोजः मोने च मन्त्रिणम् । जातेऽस्मिन् सर्वथाऽपत्रे तत्रोपायो वदिष्यते ॥
पत्राण्यस्य पतन्तु द्रागिति दध्यौ स मन्त्रिराट् । तच्चिन्तयैव वृक्षोऽभूत् निष्पत्रः पूर्वतो द्रुतम् ॥
अथोपाये च तत्पृष्टे स्पष्टं भोजोऽप्यवक् पुनः । सर्वथा फलिते वृक्षेऽस्मिन्नुपायोऽथ वक्ष्यते ॥
सत्फलः फलदः शीघ्रं स्तादेवं चिन्तितोऽमुना । पुरा नैवाभवद् यादृक् तादृक् स फलितः क्षणात् ॥
इत्सभयो भोजनृपः प्राह तं भीमधीसखम् । तत्र ध्यानाद्यथा वृक्षो जातोऽपत्रश्च पत्रयुक् ॥
तथा प्रजानां दुर्ध्यानादल्पायुः स्यादिलापतिः । प्रजानां च शुभध्यानादनल्पायुः पुनर्भवेत् ॥
दीर्घस्य जीवितस्येति श्रुत्वोपायमिमं स्फुटम् । यथाहदं जगौ गत्वा पत्तने भीमभूपतेः ॥१४२॥
ततः प्रभृति भीमोऽपि प्रजानां परिपालनात् । चिरं राज्यं च भुंक्ते स्म लोकानां हितचिन्तनात् ॥
तथा त्वमपि भूपाल लोकपालोऽसि पञ्चमः । चिरायुर्भव लोकानामन्योऽन्यहितचिन्तनात् ॥
श्रीजगत्सिंहजीराणः श्रुत्वेति गुरुदेशनाम् । साधु साधु वदन्नुच्चैः स्वं शिरो धूनयन्मुहुः ॥
गुरो त्वद्दर्शनादेव नूनं भावी जयो मम । गुरुस्त्वे पुना राजन् यतो धर्मस्ततो जयः ॥१४६॥

अथ राणकः प्राह–

स धर्म्मः कीदृशः स्वामिन् यतो नित्यं जयो भवेत् । गुरुर्जगौ शृणूर्वीश स तु जीवदयामयः ॥
अथ श्रीराणकः स्माह रञ्जितो गुरुवाक्यतः । यद्युष्माकमभीष्टं तद् ब्रूत सर्वं करोम्यहम् ॥१४८॥
ततो गुरुर्जगौ राजन् जालपातान्निषेधय । पींछोलाख्ये तटाके च तथा उदयसागरे ॥१४९॥
जन्मनो मासि भाद्राख्ये जीवहिंसां निवारय । जन्ममासे यतः शाहि-दिल्लीनाथोऽप्यपालयत् ॥
राज्याभिषेकवारेऽपि गुरो हिंसां निवारय । मचिन्दनामके दुर्गे जीर्णोद्धारं च कारय ॥१५१॥
गुरूक्तांश्चतुरो जल्पानेतान् स मत्यपद्यत । तद्देवारोपयद् पाटे जालक्षेपनिषेधकम् ॥१५२॥
स्तुत्वेति नियमान्नत्वा गुरुं द्राग् मेदपाटराट् । ययौ स्वं सौधमात्मीयपरिवारविराजितः ॥१५३
अथो गुरुर्गूर्जरधां प्रति प्रस्थातुमुत्सुकः । संघेन रक्ष्यमाणोऽपि ममोनाग्राममागमत् ॥१५४॥

प्रणम्य पार्श्वविम्बं तत्र तस्य प्रभोः पुरः । गुणविजयविज्ञानामुपाध्यायपदं ददौ ॥१५९॥
ततश्च योगिनीपुर्यां तीर्थयात्रां व्यधाद् गुरुः । कोटडीग्रामचैत्यानि पञ्च पूज्यान्यकारयत् ।
ततः श्रीऋषभं नाथं नत्वा वागडसन्निवगम् । गुरुः क्रमादिलादुर्गं प्राप्तवान् जन्मभूमिकाम्
गुरुराकारयां चक्रे पुत्रमेषणपूर्वकम् । रत्ननाम्ना महेभ्येनाह्म्मदावादवासिना ॥१५८॥
श्रीशत्रुञ्जययात्रार्थं संघः संमेलितो महान् । रत्नेन यनयत्नेन गुरुश्चाग्रेसरीकृतः ॥१५९॥
ततस्तत्र महातीर्थे यात्रां कृत्वा महोत्सवैः । गुरुभ्यां सह संघोऽसौ क्षेमेणागान्निजं पुरम् ।
तत्र कृत्वा चतुर्मासं सोल्लासं तस्य पारणे । स्तंभतीर्थे महातीर्थे ननाम गुरुपादुकाम् ॥१

इदानीं तपागच्छीयश्राद्धादिमुखाद्यथा मया श्रुतं तथा देवसान्निध्यं श्रीविजयदेवसूरेर्वर्ण्यते
अथास्य देवसान्निध्यमहं वक्ष्ये यथा श्रुतम् । स्तंभतीर्थेऽभवद्देवचन्द्रो नाम्ना महान् गृही ॥
स तु श्रीविजयदेवसूरिं शुद्धपरम्परम् । जानंस्तदुक्तमेवायं कुरुते धर्ममार्हतम् ॥१६३॥
तस्य भार्ये उभे जाते सुशीले अपि सन्ततम् । ते तूपाधिमतं नैव त्यजतो वारिते अपि ॥१
कालान्तरेण ते देवीभूतेनाप्यथ तेन हि । परंपरागतं धर्मं कुर्वातामिति भाषिते ॥१६५॥
इति प्रोक्तेऽपि ते नैव त्यजतस्तन्मतं यदा । तदा तस्यैव श्राद्धस्य प्रेत्यवासरकर्मणि ॥१६६
उपाधिमतरक्तेषु निविष्टेषु जनेष्वथ । दृपद्वृष्टिस्तया चक्रे नेशुस्सर्वेऽपि ते यथा ॥ युग्मम्
प्रदीपे प्रकटीभूतं प्रोचतुस्ते स्त्रियौ च तम् । त्वं कोऽसि कस्मादागत्य नित्यं भापयसीह नौ

१५९–एते सुगमाः । परं गुणविजयाख्या ये विज्ञाः पण्डिताः पूर्वं सादडीग्रा
म्यादौ बिम्बे क्रियमाणे श्रीकर्णराणकमिलनेन तथाः सत्या लुङ्काग्रामतया इतिकुम्भ्यानकारा
पूर्वकं श्रीगुरुप्रभावाज्जिनशासनस्यापकारस्तेषां श्रीसमीनाख्यपार्श्वनाथप्रतिमायाः पुरो गुरवो
पदं ददौ दत्तवानिति ।

१६०–एते सुगमाः । परं तत्र महातीर्थे शत्रुञ्जये यात्रां कृत्वेति श्रीऋषभदेवादीनन्वे
गुरुभ्यां श्रीसूरिआचार्याभ्यां सह स रत्नश्रावकसङ्घः कुशलेन निजं पुरं राजनगरं आगतवान् इति

१६१–सुबोधोऽयं । गुरोः श्रीविजयसेनसूरेर्निर्वाणस्थानवर्तिस्तूपे पादुकां ननामेति
[illegible] शेषः ।

१६४–सुगमम् । नवरं तस्य देवचन्द्रस्य श्राद्धस्य द्वे अपि भार्ये संवत् १६७३ वर्षे
[illegible] पश्चात् [illegible] धर्मं
नैव वारिते अपि ते न त्यजत इति ।

१६६–अथ किं जातमित्याह—प्राक्तनानीति सुगमं । परम्परागतं धर्मं श्रीविजयदेव
सूरिभिर्दत्तं कुर्वाथां, उपाधिमते तु त्यजतामिति ।

सोऽप्यूचे युवयोर्भर्तादिं देवो देवचन्द्रकः । भवत्योः प्रतिबोधाय दृष्टदूष्टिर्मया कृता ॥१६९॥
अहं श्रीविजयदेवसूरिसान्निध्यमन्वहम् । कुर्वाणोऽस्मि गुरैः सप्तदशभिश्चापरैः सह ॥१७०॥
इत्युक्ते तेन ते जाते सद्यः सद्धर्मनिश्चिते । मुक्तोपाधिमतं को हि सत्याज्ये तैलमीहते ॥१७१
इत्येकं देवसान्निध्यं. द्वितीयं शृणुताधुना । श्रीमण्डपाचले दुर्गे चलति सति सद्गुरौ ॥१७२॥
मार्गे सेहरपोग्रामस्वामिपुत्रः कमाभिधः । परमारः स भूतार्त इत्यभूत्परमारकः ॥१७३॥
मारयन् स पढ्ँल्लोकान् पित्रा निगडितस्ततः । तस्मिन्नवसरे तत्र सूरिसिंहस्समागतः ॥१७४॥
महान्तमागतं मत्वा वासक्षेपोऽस्य कारितः । सज्जीभूतत्क्षणात्सोऽपि जातं तच्चित्रकृत्सताम् ॥
द्वितीयं देवसान्निध्यं. मोच्यतेऽथ तृतीयकम् । श्रीराजनगरस्थायी कोऽप्यस्ति वणिजः सुतः ॥
सप्तवर्षाणि यावत् स ग्रहिलोऽभूद्भाग्यतः । तत्रागाच्चाष्टमे वर्षे तद्भाग्यात्सद्गुरूत्तमः ॥१७७॥
पित्रादिभिस्तदाऽकारि करन्यासोऽस्य मस्तके । तत्कालं सोऽपि सज्जोऽभूत्सर्वो लोकश्चमत्कृतः॥
चतुर्थं देवसान्निध्यमथो शृणुत सज्जनाः । मेडताद्रङ्गवास्तव्यः श्राद्धः खीमसरान्वयी ॥१७९॥
नवमासावधिस्थानाभिरो दुष्कर्मयोगतः । गृहीतः क्षेत्रपालेन भृशं दुःखाकुलोऽभवत् ॥१८०॥
तत्रागादन्यदा भाग्याद्विजयदेवसूरिराट् । वासक्षेपेण तस्याशु क्षेत्रपालः प्रणष्टवान् ॥१८१॥
नीरोगता तदीयेऽङ्गे भूतले च चमत्कृतिः । वार्ता च सकले संघे जाताहो महिमा गुरोः ॥१८२
अथातः प्रोच्यते देवसान्निध्यं पञ्चमं प्रभोः । अस्ति गूर्जरदेशान्तः पेटलादाभिधं पुरम् ॥१८३॥
तत्रासीदधिपः क्रूरः स्वभावादेव दुष्टदृक् । व्युद्ग्राहितो विशेषेण द्वेषिभिर्वेषधारिभिः ॥१८४॥
वणिग्भिः मत्यनीकैश्च द्रव्यलोभेन लोभितः । रुरोध निर्विरोधं तं तदा तत्रागतं गुरुम् ॥१८५॥
गोपुरान्तर्वेदिकायां त्रिगुप्तं सपरिच्छदम् । रक्षार्थं मानुषान्मुक्त्वा स्वयं स्वावासमाविशत् ॥
अथ सायं गुरुस्तत्र चिन्तयामास चेतसि । इह नः शयनं युक्तं नक्तं नैनेतरैः सह ॥१८७॥
ध्यात्वेति तत्र ग्रामान्तर्गर्वकस्य तरोस्तले । सुष्वाप सपरीवारो वार्यमाणो जनैर्घनैः ॥१८८॥

अथ तत्र यज्जातं तदाह—

प्रतोलीपार्श्वगेहान्तर्वह्निर्दारुभरेऽलगत् । तद्ज्वालाभिः करालाभिः प्रतोली सहसाऽपतत् ॥
तया पतन्त्या तत्राधः सुप्ता ये रक्षकादयः । तत्क्षणात्ते क्षयं प्राप्ता अहो दुष्कर्मणां गतिः ॥१९०
गुरुं कुशलिनं दृष्ट्वा सुखसुप्तं तरोस्तले । वर्णयन्ति स्म राजाद्या अहो ज्ञानी गुरुर्महान् ॥१९१॥

१८७—पूर्वार्धं सुबोधं । इहेति अत्र प्रतोल्यधः सुस्थानवेदिकायां इतरैर्नैवेद्युरक्षकादिभिः सार्धं नक्तं रात्रौ नोऽस्माकं शयनं नैव युक्तं नोचितमिति ।

१८८—गुरुर्घनैर्जनैरैतैरात्मकैरन्यैरपि ग्रामागतैः पथिकैः श्रीनैर्मा यातेति वार्यमाणोऽपि तरोरधो गत्वा पौरूर्वाविधिपूर्वं सुष्वाप क्षेमं रमेति ।

चमत्कृतेन तेनाथ यवनेन नतस्ततः । सत्कृतः क्षामितस्सूरिर्ययौ च स्थानमीप्सितम् ॥१९२॥
श्रीगुरोर्देवसान्निध्यं स्पष्टं पश्यमथो ब्रुवे । अष्टौ वर्षाण्यविच्छिन्नं सुभिक्षमभवन्मरौ ॥१९३॥
मरुस्थल्यां हि दुष्कालः शाश्वतः श्रूयते जनैः । अष्टवर्षावधि स्पष्टं नैव दृष्टः स केनचित् ॥१९४
महाजनमुखादेतच्छ्रुतं यन्निर्जले स्थले । गुरौ विहरति ज्येष्ठे मासिऽवर्षद् घनो घनः ॥१९५
अन्यदा स्तंभतीर्थेऽगाद् वत्सरैर्भूरिभिर्गुरुः । तदास्य दर्शनादेव बोधिं प्रापुस्सुमेधसः ॥१९६
यतः-सागरीयं मतं त्यक्त्वा मेघाद्याः श्राद्धमुख्यकाः । बोधिं प्राप्ता गुरोरेव वासक्षेपमकारयन्॥

अथास्य काव्यस्योपसंहारमाचरन्नाह-

इत्यादिभिर्यैनतरैरवदातवृन्दैश्चेतश्चमत्कृतिकरैश्चतुरोत्कराणाम् ।
प्राचीनसूरितुलनां कलयन् कलौ किं श्रीगौतमः पुनरयं गुरुरेष जीयात् ॥१९८॥
किं चान्यगच्छीयतया मया यत् संसूत्रितं शास्त्रविरुद्धमत्र ।
तत्सत्यमेवाथ बुधैर्विधेयं काव्योत्तमाच्छ्रीविजयादिदेवात् ॥१९९॥

अथैतत्काव्यकरणे पराशङ्कामाविष्कृत्य निराकुर्वन्नाह-

यदन्यगच्छप्रभवः कविः किं मुक्त्वा स्वसूरिं तपगच्छसूरेः ।
कथं चरित्रं कुरुते पवित्रं शंकेयमार्यैर्न कदापि कार्या ॥२००॥
आत्मार्थसिद्धिः किल कस्य नेष्टा, सा तु स्तुतेरेव महात्मनां स्यात् ।
आभाणकोऽपि प्रथितोऽस्ति लोके, गंगा हि कस्यापि न पैतृकीयम् ॥२०१॥

१९५-सुगमोऽयं । नवरं निर्जल इत्यपेयक्षारकूपैकयसद्भावात् मिष्टनीराऽसद्भावात्, अजले स्थले ओकेशादिस्थले गुरौ श्रीविजयदेवसूरौ विहरति सति अमतो ग्रामे ग्रामे घनोऽतिशायी घनो मेघोऽवर्षत् वृष्टः । येन यत्र यत्र गुरुः समागात्तत्र सरांसि भृतानि दृष्टानि इति योधपुरस्थेन मया महाजनमुखात् श्रुतमिति सत्यमेवेति ।

१९७-अर्थः सुगमः । परं सागरीयं मतमित्येव । तदुत्पत्तिर्यथा तपागच्छीयैरेवोपाध्याय-श्रीधर्मसागरैर्गच्छनायकाज्ञां विनैवात्मीयप्ररूपणात्मकश्छद्ममेव सर्वज्ञशतकं ग्रन्थः कृतः । परम-नर्थमूलत्वं ज्ञात्वा रहस्येव तत्पुस्तकानि पञ्चपाणि विधाप्य ते तु स्वर्गताः । कालक्रमेण १६७१ वर्षे स ग्रन्थः प्रकटीभूतस्ततोऽस्य केनाप्यशोधितत्वान्निर्नामकत्वाच्चौररूपत्वात् समस्तगीतार्थसाक्षिकं भट्टारकश्रीविजयसेनसूरिभिः सोऽप्रमाणीकृतस्ततः सागरशाखीया ये गच्छनायकाज्ञां विनैव तं बलात्कारेण प्रमाणीकृतवन्तस्तेऽपि भट्टारकश्रीविजयदेवसूरिभिः स्वगणाद्बहिः कृतास्ततस्तैः सागरशाखाधरैर्वेषधरैर्द्रव्यलिङ्गिद्वारा स्थापिताचार्यकैः १६८७ वर्षे यन्मतं कल्पितं तत्सागरीयं मतं त्यक्त्वा सा० मेघाद्या बहवः श्रावकाः श्रीविजयदेवसूरेर्देशनादेव बोधिं प्राप्य तस्यैव गुरुत्व-बुद्ध्या वासक्षेपमकारयन्निति ।

तस्मान्मया केवलमर्थसिद्ध्यै जिह्वापवित्रीकरणाय यद्वा।
इति स्तुतः श्रीविजयादिदेवः सूरिस्समं श्रीविजयादिसिंहैः ॥२०२॥
आचन्द्रसूर्यं तपगच्छधुर्यो स्तुतो परेणापि परिच्छदेन।
जीयाच्चिरं स्तान्मम सौख्यलक्ष्म्यै श्रीवल्लभः पाठक इत्यपाठीत् ॥२०३॥

इतिश्री बृहत्खरतरगच्छीय श्रीजिनराजसूरिसन्तानीय पाठक श्रीज्ञानविमलशिष्य श्रीवल्लभोपाध्यायविरचिते श्रीमत्तपागच्छाधिराजपातिशाह श्रीअकब्बरप्रदत्तजगद्गुरुबिरुदधारक श्रीहीरविजयसूरीश्वरपट्टालङ्कार पातिशाहि श्रीअकब्बरसभासंलब्धदुर्वादि जयवाद भट्टारक श्रीविजयसेनसूरीश्वर पट्टपूर्वाचलसहस्रकरानुकारिपातिशाहि श्रीजिहांगीरप्रदत्तमहातपाबिरुदधारि श्रीविजयदेवसूरीश्वरगुणवर्णनप्रबन्धे श्रीमद्विजयदेवमाहात्म्यनाम्नि महाकाव्ये श्रीविजयदेवसूरि सर्वदेशविहारमाभिख्यादिवर्णनो नामैकोनविंशः सर्गः। तत्समाप्तौ च समाप्तं श्रीश्रीश्रीविजयदेवमाहात्म्यनामकं काव्यं चतुरैर्वाच्यमानं चिरं जीयात्।

लिखितोऽयं ग्रन्थः पण्डितश्री५श्रीरङ्गसोमगणि-शिष्यमुनिसोमगणिना। सं० १७०९ वर्षे चैत्रमासे कृष्णपक्षे एकादशी तिथौ बुधौ लिखितं। श्रीराजनगरे तपागच्छाधिराज-भ० श्रीविजयदेवसूरीश्वरविजयराज्ये।

परिशिष्टम्।

[तपागच्छीयैकपट्टावलिगतं विजयसेनसूरिविशेषवर्णनम्]

अथामेतना पट्टावली पुरतोऽनुमन्यते—

सिरिविजयसेणसूरी, पट्टे गुणसट्ठिमे अ ।

'सिरिविजयसेणसूरि'त्ति व्याख्या—एकोनषष्टितमे पट्टे श्रीविजयसेनसूरिः, तच्चरित्रं विस्तरतः श्रीविजयप्रशस्तिकाव्यतोऽवसेयं समासतस्त्वेवम्—संवत् १६०४ वर्षे नारदपुर्यां जन्म, सं. १६१३ वर्षे पितृमातृभ्यां सह श्रीविजयदानसूरिहस्ते दीक्षा, ततः श्रीहीरविजयसूरिभिः सर्वशास्त्राणि पाठयित्वा हींसाख्यग्रामे ध्यानं कृत्वा सं. १६२८ वर्षे फाल्गुनशुक्लसप्तम्यां श्रीअहम्मदावादे सूरिपदं प्रदत्तं। तदनन्तरं सर्वप्रकारेण श्रीतपागच्छे ज्ञानदर्शनचारित्रादिसमृद्धिः शिष्याणां श्रावकाणां च वृद्धिश्च जाता। यतस्तस्मिन् वर्षे ऋषिमेघजीमुख्या लुङ्काख्यमतमुख्यास्तन्मताधिपत्यं हित्वा सर्पः कञ्चुलिकामिव तत्कुमतवासनां त्यक्त्वा श्रीतपागच्छगुरूणां शिष्यतां प्राप्ताः, तत्स्वरूपं तु प्रागुनिरूपितं। ततः श्रीहीरविजयसूरयः १६३९ वर्षे शाहिश्रीअकब्बरेण आकारिता यथा सन्मानिताः, तद्वचतिकरोऽपि पूर्वं प्रकाशितः। ततः क्रमेण श्रीहीरविजयसूरयः श्रीविजयसेनसूरिभिः सार्द्धं श्रीराजधन्यपुरे चतुर्मासीमासीनास्तस्मिन्नवसरे लाहोरनगरस्थेन श्रीअकब्बरसुरत्राणेन श्रीमदाचार्यगुणगणाकर्णनप्रीतान्तःकरणेन तदाकारणाय स्फुरन्मानं प्रैषि। ततः श्रीगुरूणामाज्ञां शेषामिव शीर्षे निधाय ततश्चलन्तः पत्तनप्रभृतिनगराणि बहून् ग्रामांश्च पवित्रयन्तोऽनेकसङ्घलोकैः पूजिताः परिवृताश्च श्रीअर्बुदाचलतीर्थयात्रां विधाय श्रीसीरोहीनगरे प्राप्तास्तदा तन्नायकेन राज्ञा श्रीसुरत्राणसञ्ज्ञेन बह्वाडम्बरपूर्वकं सन्मानिताः। ततः क्रमेण श्रीराणपुर-वरकाणकपार्श्वनाथादियात्रां कृत्वा स्वजन्मनगरीं नारदपुरीं च गत्वा क्रमेण मेदिनीपुर-डोण्डूयाणक-वैराट-माहिमनगरादिषु भव्यलोकान् कोकान् सूर्य इव श्रीसूरिधुर्या उद्बोधयन्तो लोधिआणाग्रामे समेयुः। तत्र श्रीशाहिमान्यशेखश्रीअबुलफजलभ्रातृजन्मा फयजीनामा श्रीसूरीन्नन्तुमागतः। तत्रानेकलोकविधीयमानबहुमानस्वरूपं स्पष्टाष्टावधानादिसाधकशिष्यश्रेणिस्वरूपं च दृष्ट्वाऽतीवचमत्कृतचेतास्ततस्त्वरितं लाहोरनगरे गत्वा श्रीशाहिपुरतस्तमुदन्तं यथादृष्टमभ्यधात्। तच्छ्रुत्वा शाहिरपि घनाघनान्नीलकण्ठ इव श्रीगुरून् द्रष्टुं सोत्कण्ठोऽभूत्। ततः क्रमेण श्रीसूरयोऽपि शाहिप्रदत्तोद्वाद्यवादनानेकानेकतुरङ्गमविचित्रवैजयन्तीतोरणधोरणीरमणीयमहामहपुरस्सरं लाभपुरं पुरं प्रविश्य तद्दिन एव श्रीशेखर्जीदरबारीरामदासप्रमुखप्रधानपुरुषद्वारा काश्मीरीमहलनाम्नि धाम्नि श्रीशाहेर्मिलिताः। शाहिरपि गुरून् वीक्ष्य परमप्रमोदमेदुरः सन् श्रीहीरविजयसूरीणामुदन्तं वर्त्मनि कुशलोदन्तं च पृष्टवान्।

श्रीगुरुभिरपि श्रीहीरसूरिभिर्भवतो धर्माशीर्वादो दत्तोऽस्तीत्याद्युक्तं । भूयो भूपः समग्रावधानानि द्रष्टुकामोऽस्मीति गुरूनाचष्ट । ततो गुर्वाज्ञया गुरुशिष्यश्रीनन्दिविजयाभिधविबुधसाधिताष्टावधानानि दृष्ट्वा वचनागोचरं चमत्कारं प्राप्तः । प्रसन्नः सन् महाऽऽडम्बरपूर्वकं स्वस्थानं प्रापयतामिति स्वजनानादिश्य स्वं धामागमत् । अथेष्टदेवोपदिष्टमिति मन्यमाने राजमान्यैर्वदान्यैस्तत्रत्यास्तिकजनैरष्टदिनानि यावत् केवलं रूप्यकैरेव प्रभावनाद्याडम्बरस्तथा कृतो यथा जैने राज्यमेकच्छत्रमिव जातमिति । गुरूणां गौरवमसहमानेन केनचिद् प्रोक्तं—अमी जैना जगदीश्वरं १ भास्करं २ गङ्गां ३ च न मन्यन्ते तेन हे श्रीशाहे ! भवादृशां भूभुजां नैतेषां दर्शनं योग्यमिति श्रुत्वा गुप्तकोपो भूपोऽन्यदा सभायातान् श्रीअनूपानपृष्टवान् तद्द्विजोक्तमुक्तवान् । ततस्तत्कालोचितसिद्धं मत्वा तत्कालोत्पन्नस्वसमयपरसमयपरमार्थसूक्तिगुम्फितगुरुभिः श्रीसूरीन्द्रैस्तदीयशास्त्रसम्मत्यैव स्वाभीष्टजगदीश्वरस्वरूपं निरूपितं ।

यथा—यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो,
बौद्धा बुद्ध इति प्रमाणपटवः कर्मेति मीमांसकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्तेति नैयायिकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥ १ ॥

अनेन तद्ग्रन्थोक्तकाव्येन तदीयशास्त्रशस्त्रेणैव तन्मदच्छेदश्चक्रे । इति प्रथमं जगदीश्वराङ्गीकारप्रश्नोत्तरम् ।

अधाममधाममधामेदं, वयमेव स्वचेतसि । यस्यास्तव्यसने प्राप्ते, त्यजामो भोजनोदके ॥१॥
इत्यादियुक्तिभिर्द्वितीयं सूर्याङ्गीकारोत्तरम् । तथा गङ्गोदकमन्तराऽस्माकं देवपूजैव न स्यात्, इति तृतीयं गङ्गाङ्गीकारोत्तरम् । इति गुरूक्तवाक्यैः प्रहृष्टः शाहिः श्रीगुरूणां सम्मानं दत्त्वा खलांस्तिरस्कृतवान् । ततस्तत्र द्वयोः श्रीशाहेराग्रहेण चतुर्मासकद्वयं विधाय यदा पुण्यपर्वेक्षणे प्रमुदितेन शाहिना किञ्चिद् याचध्वमित्युक्ते श्रीसूरिः स्माह—हे श्रीशाहे ! गो १ वृषभ २ महिष ३ महिषी ४ हननं, मृतद्रव्यादानं ५ बन्दिग्रहणं ६ चेति षड् जल्पास्तव जगज्जनदुःखप्रदस्य नार्हन्तीति, एतेषां जल्पानां हानमेवास्माकं मुदे श्रीशाहीनां च सम्पदे निदानमित्युक्ते प्रहृष्टेन श्रीशाहिना तत् षड्जल्पस्फुरन्मानं श्रीसूरिनाम्नैव सर्वत्र प्रदत्तम् । आचिरमवतारे श्रीहीरसूरिभिर्बाधावशादन्तिमाभिलाषाय लेखप्रेषणपूर्वमाकारिताः सन्तस्तत्र विविधशारीरकपजयवाताः श्रीसूरिपादाः शीघ्रमेव गुर्वाकारणं कारणमवगत्य चतुर्मासकाभ्यन्तरेऽपि पद्भ्यामविच्छिन्नप्रयाणैर्मेदमण्डलमण्डनीभवन्तः क्रमेण श्रीपत्तनं प्राप्तवन्तः । तत्र श्रीहीरसूरीणां स्वर्गगमनमूनावसरं सत्यार्थं श्रुत्वा तत्संसारस्वभावमनुभाव्य त्यक्तशोकाः गुरुपट्टं तथा गच्छसाम्राज्यं चाध्यासामासुः ।

अथ तेषां गुरुकृत्यानि लिख्यन्ते । यथा—जैशल्मेरदुर्गे १६१२वर्षे दीक्षा कृता । ततः सूरि-

सट्ठिअमे सिरिविजयदेवसूरी संवइ तवगणतरणितुल्लो ॥ १ ॥

षष्टितमे पट्टे श्रीविजयदेवसूरिः । तद्‌वृत्तमपि यथादृष्टं किंचिल्लिख्यते यथा—श्रीराजदेशमण्डने ईडरदुर्गे संवत् १६३४ वर्षे जन्म । ततो नवमे वर्षे—१६४३ वर्षे जनन्या सह दीक्षा । ततः १६५५ वर्षे पण्डितपदं । ततोऽनुक्रमेण १६५६ वर्षे स्तम्भतीर्थे सूरिपदं । तद्व्यतिकरो यथा—सर्वव्यवहारिश्रेणिशिरोमणि सा० श्रीमल्लनामा स्वभ्रातृजन्मना सा० सोमाख्येन सह श्रीआचार्यपदस्थापनार्थमर्थव्ययं कर्तुकामः प्रकामप्रमोदेन मरुमेदपाटलाटसौराष्ट्रकच्छकुङ्कणादिदेशेषु गूर्जरदेशे च प्रतिग्रामं प्रतिनगरं कुङ्कुमपत्रिकाप्रेषणपूर्वं सङ्घलोकान् सहस्रशः समाहूय तपागणयतियतिनीसप्तशतीमितपरिकरमाकारितवान् । अथ सकलसङ्घमिलनानन्तरं श्रीमल्लसाधुना वन्धुरताऽधरीकृतपुरन्दरमन्दिरे निजमन्दिरे दिव्यदुकूलकमनीयमण्डपं शक्रमण्डपमिव निर्माय विजयसेनसूरयो वैशाखशुद्धचतुर्थ्यां चतुर्थे रवियोगे कुमारयोगे मृगाङ्कमृगशिरःसंयोगाद् अमृतसिद्धियोगेऽपि च श्रीविजयदेवसूरिरिति नामस्थापनपूर्वकं सूरिपदं ददुः । अथ श्रीमल्लसाधुना सन्तुष्टेन तद्भाक्तिस्थापके यथा कल्पवृक्ष एवायमिति मेने । किं बहुना तस्मिन्महे सा०श्रीमल्लेन दशसहस्ररूप्यकव्ययः कृतः । ततस्तद्दिनदिने तत्रत्येन ठक्कुरकीकाख्येन तत्पदोत्सवनिमित्तमेवाष्टसहस्ररूप्यकव्ययपूर्वं प्रतिष्ठा कारिता । एवं सर्वसङ्ख्यया श्रीविजयदेवसूरीणां पदमहे पञ्चाशत्सहस्रप्रमिता महिमुन्दिका व्ययिताः । ततः १६५८ वर्षे पत्तने परीक्षकसहस्रवीरसञ्ज्ञेन पञ्चसहस्रमहिमुन्दिकाव्ययपूर्वकं गच्छानुज्ञानन्दिमहश्चक्रे । अथ श्रीविजयदेवसूरयोऽहम्मदावादे प्रतिष्ठाद्वयं, पत्तने प्रतिष्ठाचतुष्टयं, स्तम्भतीर्थे प्रतिष्ठात्रयं बहुद्रव्यव्ययपूर्वकं कृत्वा स्वजन्मभूमौ श्रीईडरदुर्गे चतुर्मासीं चक्रुः । तदा तन्नरपैः सङ्घलोकैरनेके महोत्सवाः कृताः । तन्माहात्म्यहृष्टो राजा श्रीकल्याणमल्लनामा[चिन्ता]मणिपार्श्वमहाभट्टचट्टवेष्टितः प्रतिवर्षं मासमेकं सारमकारयत् । तदा तेषां सूरीणां पुण्योदयार्थं वादिभिर्वादिदर्पसर्वगालङ्करणैः पण्डितवादिसागरगणिगीतार्थशिरोरत्नैरेव सर्वेऽपि चण्डालतया निर्जिता यथा लज्जिताः सन्तोऽहो! गुरूणां गुणवेति स्तुवन्तो राजेन्द्रपुरस्यः स्वस्थं ययुः । तदा तत्र महती प्रभावना जाता । ततो वृद्धनगरे श्रीप्रतिष्ठा कृत्वा राजनगरे चतुर्मासी स्थिता । तदवसरे ईडरदुर्गे श्रीऋषभदेवबिम्बं यवनैर्व्यङ्गितं तदपरमप्रमाणमेव नवीनं बिम्बं कारयित्वा तत्पट्टे महत्यां प्रतिष्ठायां श्रीसूरिभिः प्रतिष्ठाप्य गिरिशिखरस्थचैत्यचैत्योद्धारपूर्वकं स्थापितं । ततोऽन्यदा श्रीमण्डपाचले श्रीमज्जहांगीरपातिशाहदिल्लीपतिजहांगीरभाभिज्ञेयतादिः श्रीसूरीन स्वत्वर्गीयैः अत्रमानमाचार्ये गुरूणां मूर्तिं रूपाकृतिं च वीक्ष्य बहुगोचरं चमत्कारमाजगाम । ... अतो श्रीगुरुभिः सार्धं धर्मगोष्ठीक्षणे विविधधर्मवार्तां पृष्ट्वा साक्षाद् गुरुस्वरूपं निरूप्य हृष्टः च स्वचक्षुषैः परैः प्राग् विज्ञप्तिद् म्लेच्छमाहिमोऽपि साहिबस्य तत्कृतसत्यवचनैः तत्सम्यक् ... श्रीविजयसेनसूरीणां च पट्टे एव एव वृद्धप्रत्ययाद्बहिर्विवादकाले अवस्थ, तस्या ... कृतवत्-

१६८४ वर्षे पुनर्गन्धारभाग्भिश्रेष्ठिना महर्मतो स्वयकरद्वयेन विजयसिंहसूरीणां गच्छानुज्ञा-नन्दि कारिता । ततो मेडतानगरे प्रतिष्ठात्रयं विधाय विम्बपुरे चतुर्मासीस्थितान् गुरून् ज्ञात्वा तच्छीघ्रसीतार्थरञ्जितेन राणाश्रीजगत्सिंहजीकेन श्रीवरकाणके पौषदशम्यां समागतानां लोकानां शुल्कमोचनं तत्रापाटरोपपूर्वं ताम्रपत्रेणोत्कीर्य श्रीगुरूणां पुरः प्राभृतीकृतं तत्कृत्यं अभूतपूर्वं सर्वेषामनुमतम् सञ्जातम् । ततो राणपुरादिषु तीर्थयात्रां कृत्वा झालाश्रीकल्याणजीकेन कुम्भलमेरागतास्कारिताः श्रीमेदपाटदेशं पावित्रयन्तः प्रथमं चमणोरग्रामे प्रतिष्ठाद्वयं, ततो देवकुल-पाटके प्रतिष्ठामेकां, ततो नाडीग्रामे अघोटानगरे चेति प्रतिष्ठापञ्चककरणपूर्वकं श्रीउदयपुरे चतु-र्मासीं चक्रुः । तदवसरे गुर्जरत्रा प्रतिपिपिलिपून् दलवादलमहलमध्यस्थितान् श्रीगुरून् श्रीजगत्सिंहजीसम्बद्धो राणकोऽपि नन्तुमागतश्चिरं गुरुगुणचन्द्रे चकोरीकृतचक्षुस्तद्देशनाऽमृ-तपां पीत्वा प्रीतः प्रकामं सत्कारसन्मानादि दत्त्वा गुरुपुरश्चतुरो जल्पान् प्रपन्नवान् । तथाहि-चम्पकवृति पिछोलके उदयसागरे च तटाके मीनजालानि निषिध्यति १, राज्याभिषेकदिने गुरुवारे जीवामारिः कार्या २, स्वजन्ममासे भाद्रपदाभिधे जीवहिंसा न कार्या ३, मचिदहुर्गे कुम्भलविहारे जीर्णोद्धारः कार्यः ४-इति जल्पचतुष्टयीमहणाभिमदचन्तं भूमिकान्तं वीक्ष्य सकला अपि लोका भृशमाश्चर्यभाजोऽहो ! गुरूणां कोऽपि लोकोत्तरो महिमातिशय इत्यादि-वर्णनपरा जाताः । किंबहुना श्रीकुमारपालभूपालेन श्रीहेमसूरय इव श्रीराणाजीकेन श्रीगुरवो बहु मेनिरे-इत्यादयः कियन्तोऽवदाता लिख्यन्ते । चतस्तपसा साक्षाद्धन्यानगारा इव, सौभाग्येनाभि-नववसुदेवावतारा इव, ध्यानमौनक्रियाकष्टानुष्ठानादिना श्रीमद्भद्रबाहुस्वामिन इव, निर्विकृतिवि-कृतित्यागेन प्रायो भक्तजनगृहाहारत्यागेन च श्रीमानदेवसूरय इव श्रीविजयदेवसूरयः सूर्या इव भरतभूमिपश्चिनीं प्रतिबोधयन्तो मालवमण्डले उज्जयिन्यादौ दक्षिणदेशे च बीजापुर-बर्हानपुरादौ कच्छदेशे च भुजनगरादौ मरुदेशे च जाबालपुर-मेदिनीपुर-पंचाणीग्रामादौ जीर्णोद्धारकारा-पणपूर्वकमनेकशतार्हत्प्रतिमाः प्रतिष्ठयन्तोऽनेकपण्डितपदानि पाठकपदानि स्थापयन्तो दर्शनादेव हीन्दुतुरुष्कादीनामपि चमत्कारं कुर्वन्तो जीवहिंसादिनिषेधनियमांश्च कारयन्तः-

सिरिविजयसीहसूरिप्पमुहेहिं णेगसाहुवग्गेहिं ।
परियरिआ पुहविअले, विहरिंता दिंतु मे भद्दं ॥२॥

श्रीविजयसिंहसूरि-प्रभृत्यनेकशतसाधुभिः परिवृताश्चिरं पृथ्व्यां विहरन्तो 'भद्रं दिशन्तु' कल्याणं कुर्वन्त्विति गाथार्थः ॥२॥ इति गाथा द्वयं पूर्वपट्टावल्यां प्रयोज्यम् ।

तपगणपतिगुणपद्धतिरेवा गुणविजयवाचकैर्लिलिखे ।
गन्धारबन्दिरीयश्रावकसा० माळजीतुष्ट्यै ॥१॥

इति गुर्वावली प्राचीनगुर्वावल्याः पुरोऽनुसन्धीय सुधीभिर्वाचनीया ॥ श्रीरस्तु कल्याणमस्तु ॥